असुराणां	असुरोंके द्वारा	कमठरूपेण	कच्छप रूपसे
उदधिं	(क्षीर) सागरका	मन्दराचलं	मन्दराचलको
मथ्नतां	मन्थन करते समय	पृष्ठः	(अपनी) पीठपर
एकादशे	ग्यारहवें अवतारमें	दध्रे	धारण किया ॥१६॥

धान्वन्तरं द्वादशमं त्रयोदशममेव च ।
अपाययत्सुरानन्यान्मोहिन्या मोहयन् स्त्रिया ॥१७॥

धान्वन्तरं द्वादशमं त्रयोदशमं एव च अपाययत् सुरान् अन्यान् मोहिन्या मोहयन् स्त्रियाः ॥ १७ ॥

द्वादशमं	बारहवाँ अवतार	अन्यान्	(उसने) दूसरे (असुरों) को
धान्वन्तरं	धन्वन्तरिका हुआ	मोहयन्	मोहित करते हुए
च	और	सुरान्	देवताओंको
त्रयोदशमं	तेरहवाँ अवतार	अपाययत्	(अमृत) पिलाया ॥१७॥
स्त्रियाः	स्त्री		
एव	का ही		
मोहिन्या	मोहिनी रूपमें हुआ।		

चतुर्दशं नारसिंहं बिभ्रद्दैत्येन्द्रमूर्जितम् ।
ददार करजैर्वक्षस्येरकां कटकृद्यथा ॥१८॥

चतुर्दशं नारसिंहं बिभ्रत् दैत्येन्द्रं ऊर्जितं ददार करजैः वक्षः एरकां कटकृत् यथा ॥ १८ ॥

चतुर्दशं	चौदहवें (अवतार)में*	बिभ्रत्	धारण करके
नारसिंह	नृसिंह रूप	ऊर्जितं	अत्यन्त बलवान

---

* ग्यारहवें अवतारमें कच्छपका वर्णन है। समुद्र-मन्थनके लिए मन्दराचल धारणार्थ यह अवतार हुआ। भागवतके ही अष्टम स्कन्धके■

दैत्येन्द्रं	दैत्योंके अधिपति हिरण्यकशिपुकी	कटकृत्	चटाई बनानेवाले
वक्षः	छाती	एरकां	एरका नाम (चौड़े लम्बे पत्तेवाली) घासको (चीर देते हैं) ॥१८॥
करजैः	नखोंसे		
ददार	फाड़ डाली		
यथा	जैसे		

पञ्चदशं वामनकं कृत्वागादध्वरं बलेः ।
पदत्रयं याचमानः प्रत्यादित्सुस्त्रिविष्टपम् ॥१९॥

पञ्चदशं वामनकं कृत्वा अगात् अध्वरं बलेः पदत्रयं याचमानः प्रति आदित्सुः त्रिविष्टपम् ॥ १९ ॥

पञ्चदशं	पन्दहवें अवतारमें	त्रिविष्टपं	स्वर्गको
वामनकं	वामन स्वरूप	प्रति	वापस
कृत्वा	बनाकर	आदित्सुः	ले लेनेकी इच्छा करके
बलेः	(दैत्यराज) बलिके		
अध्वरं	यज्ञमें	पदत्रयं	तीन पद (पृथ्वी)
अगात्	गये ।	याचमानः	माँग रहे थे ॥१९॥

अवतारे षोडशमे पश्यन् ब्रह्मद्रुहो नृपान् ।
त्रिःसप्तकृत्वः कुपितो निःक्षत्रामकरोन्महीम् ॥२०॥

अवतारे षोडशमे पश्यन् ब्रह्मद्रुहः नृपान् त्रिःसप्त कृत्वः कुपितः निःक्षत्रां अकरोत् महीम् ॥ २० ॥

षोडशमे	सोलहवें	ब्रह्मद्रुहः	ब्राह्मण द्रोही
अवतारे	अवतारमें	पश्यन्	देखकर
नृपान्	राजाओंको	कुपितः	क्रुद्ध होकर

---

*अनुसार समुन्द्र-मन्थनके समय असुरोंके अधिपति बलि थे जो प्रह्लादके पौत्र हैं । अतः प्रह्लादको रक्षाको होनेवाला नृसिंह अवतार कच्छपसे पहिले हुआ । यहाँकी संख्यामें कालक्रम नहीं है ।

त्रिःसप्तः	इक्कीसबार	निःक्षत्रां	क्षत्रियोंसे रहित
कृत्वः	करके	अकरोत्	बना दिया ॥२०॥
महीं	पृथ्वीको		

ततः सप्तदशे जातः सत्यवत्यां पराशरात् ।
चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोऽल्पमेधसः ॥२१॥

ततः सप्तदशे जातः सत्यवत्यां पराशरात् चक्रे वेदतरोः शाखा दृष्ट्वा पुंसः अल्प मेधसः ॥ २१ ॥

ततः	इसके बाद	मेधसः	मेधा (बुद्धि-प्रतिभा)
सप्तदशे	सत्रहवें (अवतार)में		वाले
पराशरात्	(महर्षि) पराशरसे	दृष्ट्वा	देखकर
सत्यवत्यां	सत्यवतीमें	वेदतरोः	वेदरूपी वृक्षकी
जातः	उत्पन्न होकर	शाखाः	शाखाएँ
पुंसः	पुरुषोंको	चक्रे	निर्मितकीं ॥२१॥
अल्प	थोड़ी		

नरदेवत्वमापन्नः सुरकार्यचिकीर्षया ।
समुद्रनिग्रहादीनि चक्रे वीर्याण्यतः परम् ॥२२॥

नरदेवत्वं आपन्नः सुरकार्यं चिकीर्षया समुद्र निग्रहः आदीनि चक्रे वीर्याणि अतः परम् ॥ २२ ॥

अतः	इसके	आपन्नः	अवतरित हुए और
परं	पश्चात्	समुद्र	सागर
सुरकार्य	देवताओंका काम	निग्रहः	बाँधना तथा
चिकीर्षया	सम्पन्न करनेकी इच्छासे	आदीनि	रावणादि राक्षस वधका
नरदेवत्वं	राजाके रूपमें (रामावतारमें)	वीर्याणि	पराक्रम
		चक्रे	किया ॥२२॥

एकोनविंशेविंशतिमे वृष्णिषु प्राप्य जन्मनी ।
रामकृष्णाविति भुवो भगवानहरद्भरम् ॥२३॥

एकोनविंशे विंशतिमें वृष्णिषु प्राप्य जन्मनी रामकृष्णौ इति भुवा भगवान् अहरत् भरम् ॥ २३ ॥

एकोनविंशे	उन्नीसवें (और)	**इति**	इन नामोंसे
विंशतिमें	बीसवें अवतारमें	**भगवान्**	भगवान्‌ने
वृष्णिषु	वृष्णि वंशमें	**भुवः**	पृथ्वीके
जन्मनि	जन्म	**भरं**	भारको
प्राप्य	प्राप्त करके	**अहरत्**	दूर किया ॥२३॥
रामकृष्णौ	बलराम और श्रीकृष्ण		

ततः कलौ सम्प्रवृत्ते सम्मोहाय सुरद्विषाम् ।
बुद्धो नाम्नाजनसुतः कीकटेषु भविष्यति ॥२४॥

ततः कलौ सम्प्रवृत्ते सम्मोहाय सुरद्विषां बुद्धः नाम्ना अजनसुतः कीकटेषु भविष्यति ॥ २४ ॥

ततः	उसके पश्चात्	**सम्मोहाय**	सम्मोहित करनेके लिए
कलौ	कलियुगके	**कीकटेषु**	मगध प्रदेशमें
सम्प्रवृत्ते	आ जाने (भली प्रकार सक्रिय होने) पर	**अजनसुतः**	अजनके पुत्र
		बुद्धः	बुद्ध
सुरद्विषां	देव-द्वेषियोंको	**नाम्ना**	नामसे
		भविष्यति	उत्पन्न होंगे ॥२४॥

अथासौ युगसंध्यायां दस्युप्रायेषु राजसु ।
जनिता विष्णुयशसो नाम्ना कल्किर्जगत्पतिः ॥२५॥

अथ असौ युगसन्ध्यायां दस्युप्रायेसु राजासु जनिता विष्णुयशसः नाम्ना कल्किः जगत्पतिः ॥ २५ ॥

अथ	इसके पीछे	**राजसु**	राजाओंके
युगसन्ध्यायां	(कलियुग-सतयुगके) सन्धिकालमें	**दस्युप्रायेसु**	प्रायः लुटेरे हो जानेपर

असौ	येही	कल्किः	कल्किके
जगत्पतिः	श्रीजगन्नाथ	नाम्ना	नामसे
विष्णुयशसः	विष्णुयश (ब्राह्मण) के यहाँ	जनिता	उत्पन्न होंगे ॥२५॥

अवतारा ह्यसंख्येया हरेः सत्त्वनिधेर्द्विजाः ।
यथाविदासिनः कुल्या सरसः स्युः सहस्रशः ॥२६॥

अवतारा हि असंख्येयाः हरेः सत्त्वनिधेः द्विजाः यथा अविदासिनः कुल्याः सरसः स्युः सहस्रशः ॥ २६ ॥

द्विजाः	ब्राह्मणो ! (शौनकादिक ऋषियो !)	यथा	जैसे
हि	निश्चय ही	अविदासिनः	अगाध
सत्त्वनिधेः	सत्त्वनिधि	सरसः	सरोवर (झील)से
हरेः	श्रीहरिके	सहस्रशः	हजारों
अवतारा:	अवतार	कुल्याः	छोटे स्रोत (नाले)
असंख्येयः	असंख्य हैं ।	स्युः	निकलते हैं ॥२५॥

ऋषयो मनयो देवा मनुपुत्रा महोजसः ।
कलाः सर्वे हरेरेव सप्रजापतयस्तथा ॥२७॥

ऋषयः मनवः देवाः मनुपुत्राः महौजसः कलाः सर्वे हरेः एव सप्रजापतयः तथा ॥ २७ ॥

ऋषयः	ऋषिगण	सप्रजापतयः	प्रजापतियोंके सहित
मनवः	सब मनु,	सर्वे	सब
देवाः	देवगण,	हरेः	श्रीहरिकी
महौजसः	महान् तेजस्वी	एव	ही
तथा	और	कलाः	कला हैं ॥२७॥
मनुपुत्राः	मनुओंके पुत्र		

एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् ।
इन्द्रारिव्याकुलं लोकं मृडयन्ति युगे युगे ॥२८॥

एते च अंश कलाः पुंसः कृष्णः तु भगवान् स्वयं इन्द्र-अरि व्याकुलं लोकं मृडयन्ति युगे युगे ॥ २८ ॥

पुंसः	परम पुरुषकी	**भगवान्**	परम पुरुष हैं ।
एते	ये सब	**इन्द्र-अरि**	इन्द्रके शत्रु (असुरों)
अंश	अंश हैं		द्वारा
च	अथवा	**व्याकुलं**	व्याकुल हुए
कलाः	कला हैं	**लोकं**	लोकोंकी
तु	किन्तु	**युगे युगे**	प्रत्येक युगमें
कृष्णः	श्रीकृष्ण	**मृडयन्ति**	रक्षा करते हैं ॥२८॥
स्वयं	स्वयं		

जन्म गुह्यं भगवतो य एतत्प्रयतो नरः ।
सायं प्रातर्गृणन् भक्त्या दुःखग्रामाद्विमुच्यते ॥२९॥

जन्म गुह्यं भगवतः यः एतत् प्रयतः नरः सायं प्रातः गृणन् भक्त्या दुःखग्रामात् विमुच्यते ॥ २९ ॥

भगवतः	श्रीभगवानके	**सायं**	शामको
एतत्	इन	**प्रातः**	सवेरे
गुह्यं	गोपनीय	**भक्त्या**	भक्तिपूर्वक
जन्म	अवतारोंका	**गृणन्**	गान (पाठ) करता
यः	जो		है (वह)
नरः	मनुष्य	**दुःखग्रामात्**	दुःखोंके समूहसे
प्रयतः	एकाग्र चित्तसे	**विमुच्यते**	छूट जाता है ॥२९॥

एतद्रूपं भगवतो ह्यरूपस्य चिदात्मनः ।
मायागुणैर्विरचितं महदादिभिरात्मनि ॥३०॥

एतत् रूपं भगवतः हि अरूपस्य चिदात्मनः मायागुणैः विरचितं महदादिभिः आत्मनि ॥ ३० ॥

अरूपस्य	निराकार	**भगवतः**	भगवानके
चिदात्मनः	ज्ञानस्वरूप	**एतत्**	ये सब

रूपं	रूप		(सात्त्विक अहंकार)
आत्मनि	उनके अपनेमें ही		से
हि	निश्चय ही	**विरचितं**	बनाये (प्रकट किये
मायागुणैः	मायाके गुणोंसे		गये) हैं ॥३०॥
महदादिभिः	महतत्त्वादि		

यथा नभसि मेघौघो रेणुर्वा पार्थिवोऽनिले ।
एवं द्रष्टरि दृश्यत्वमारोपितमबुद्धिभिः ॥३१॥

यथा नभसि मेघ ओघः रेणुः वा पार्थिवः अनिले एवं द्रष्टरि दृश्यत्वं आरोपितं अबुद्धिभिः ॥ ३१ ॥

यथा	जैसे	**रेणुः**	धूलि है,
नभसि	आकाशमें	**एवं**	इसी प्रकार
मेघ	बादलोंका	**अबुद्धिभिः**	अज्ञानीजनों द्वारा
ओघः	उमड़ना है	**द्रष्टरि**	दृष्टा (परमात्मा)में
वा	अथवा	**दृश्यत्वं**	दृश्यपना
अनिले	वायुमें	**आरोपितं**	आरोपित किया गया
पार्थिवः	पृथ्विकी		है ॥३१॥

अतः परं यदव्यक्तमव्यूढगुणव्यूहितम् ।
अदृष्टाश्रुतवस्तुत्वात्स जीवो यत्पुनर्भवः ॥३२॥

अतः परं यत् अव्यक्तं अव्यूढ गुण व्यूहितं अदृष्ट अश्रुतः वस्तुत्वात् स जीवः यत् पुनर्भवः ॥ ३२ ॥

अतः	इस (स्थूल रूप) से	**गुण**	गुणों (सत्त्व, रज,
परं	परे		तम) से
यत्	जो	**व्यूहितं**	घेरा हुआ है
अव्यक्तं	व्यक्त न होनेवाला	**अदृष्ट**	अनदेखी
अव्यूढ	बिना व्यूह (किसी घेरे) वाला	**अश्रुतः**	अनसुनी
		वस्तुत्वात्	वस्तु होनेसे

स	वही	**यत्**	जिसका
जीवः	जीव (कही जाती) है।	**पुनर्भवः**	पुनर्जन्म होता है ॥३२॥

यत्रेमे सदसद्रूपे प्रतिषिद्धे स्वसंविदा ।
अविद्ययाऽऽत्मनि कृते इति तद् ब्रह्मब्रह्मदर्शनम् ॥३३॥

यत्र इमे सत् असत् रूपे प्रतिषिद्धे स्वसंविदा अविद्यया आत्मनि कृते इति तत् ब्रह्मदर्शनम् ॥ ३३ ॥

यत्र	जिसमें	**कृते**	निश्चय करनेपर
इमे	ये दोनों	**आत्मनि**	अपने स्वरूपमें
सत्	सूक्ष्म	**प्रतिषिद्धे**	(इनका) निषेध (बाध) होजाने पर
असत्	स्थूल		
रूपे	रूप	**तत्**	वही स्थिति
अविद्यया	अविद्याके द्वारा हैं	**ब्रह्मदर्शनं**	ब्रह्म साक्षात्कार है ॥३३॥
इति	ऐसा		
स्वसंविदाः	अपने बोधसे		

यद्येषोपरता देवी माया वैशारदी मतिः ।
सम्पन्न एवेति विदुर्महिम्नि स्वे महीयते ॥३४॥

यदा एषा उपरता देवी माया वैशारदी मतिः सम्पन्न एव इति विदुः महिम्नि स्वे महीयते ॥ ३४ ॥

यदा	जब	**एव**	ही है
एषा	यह	**इति**	ऐसा
वैशारदी	अत्यन्त निपुणा	**विदुः**	जानते हैं (समझते हैं तत्त्वज्ञ लोग)
देवी माया	मायादेवी रूपा		
मतिः	बुद्धि	**स्वे**	(तव) अपनी
उपरता	निवृत्त हो जाती है (तब अपना आत्मा)	**महिम्नि**	महिमामें
		महीयते	स्थित हो जाता है ॥३४॥
सम्पन्नः	सब अभावोंसे रहित		

एवं जन्मानि कर्माणि ह्यकर्तुरजनस्य च ।
वर्णयन्ति स्म कवयो वेदगुह्यानि हृत्पतेः ॥३५॥

एवं जन्मानि कर्माणि हि अकर्तुः अजनस्य च वर्णयन्ति स्म कवयः वेद गुह्यानि हृत्पतेः ॥ ३५ ॥

एवं	इस प्रकार	**वेदगुह्यानि**	वेदोंमें रहस्य रूपमें वर्णित
हि	निश्चय ही	**जन्मानि**	जन्मों (अवतारों)
अकर्तुः	(जो) अकर्ता हैं	**कर्माणि**	लीलाओंका
च	और	**कवयः**	बुद्धिमान (ज्ञानी) लोग
अजनस्य	अजन्मा है (उन)	**वर्णयन्ति स्म**	वर्णन करते हैं ।३५।
हृत्पतेः	हृदयेश्वर (हृषीकेष) के		

स वा इदं विश्वममोघलीलः
सृजत्यवत्यत्ति न सज्जतेऽस्मिन् ।
भूतेषु चान्तर्हित आत्मतन्त्रः
षाड्वर्गिकं जिघ्रति षड्गुणेशः ॥३६॥

स वा इदं विश्वं अमोघ लीलः सृजति अवति अत्ति न सज्जते अस्मिन् भूतेषु च अन्तर्हितः आत्मतन्त्रः षाड्वर्गिकं जिघ्रति षडगुणेशः ॥३६॥

स	वे		करते) हैं
वा	ही	**अस्मिन्**	(फिर भी) इनमें
अमोघ	अव्यर्थ	**न**	नहीं
लीलः	लीला करनेवाले	**सज्जते**	आसक्त होते,
इदं	इस	**भूतेषु**	प्राणियोंमें
विश्वं	विश्वंकी	**अन्तर्हितः**	अन्तर्हित (व्यापक होकर)
सृजति	सृष्टि करते हैं	**षड्गुणेशः**	(मन तथा शब्द, स्पर्श, रूप, रस, गंध)
अवति	रक्षा करते हैं		
अत्ति	खा लेते (संहार		

	६ गुणोंके स्वामी (रहते)	जिघ्रति	सूँघते (उपभोग करते) हैं।
षाड्वर्गिकं	६ गुण (मन-ज्ञानेन्द्रियों) के विषयोंको	च	और
		आत्मतन्त्रः	परम स्वतन्त्र हैं।३६।

न चास्य कश्चिन्निपुणेन धातु-
रवैति जन्तुः कुमनीष ऊतीः।
नामानि रूपाणि मनोवचोभिः
सन्तन्वतो नटचर्यामिवाज्ञः ॥३७॥

न च अस्य कश्चित् निपुणेन धातुः अवैति जन्तुः कुमनीष ऊतीः नामानि रूपणि मनः वचोभिः सन्तन्वतः नटचर्या इव अज्ञः ॥ ३७ ॥

अस्य	इन	कश्चित्	कोई
धातुः	धाता (भगवान) के	कुमनीषः	कुबुद्धिवाला (अज्ञ)
नामानि	नामोंसे	जन्तुः	प्राणी
च	और	निपुणेन	भली प्रकार
रूपाणि	रूपोंको	नटचर्या	वाजीगरके खेलोंको
मनः	संकल्पसे	अज्ञं	अज्ञानी
वचोभिः	अपनी वेदरूप वाणीसे	इव	की भाँति
सन्तन्वतः	विस्तार करते हुए	न	नहीं जानते ॥३७॥
ऊतीः	वैभवको		

स वेद धातुः पदवीं परस्य
दुरन्तवीर्यस्य रथाङ्गपाणेः।
योऽमायया संततयानुवृत्त्या
भजेत तत्पादसरोजगन्धम् ॥३८॥

स वेद धातुः पदवीं परस्य दुरन्त वीर्यस्य रथाङ्गपाणेः यः अमायया संततया अनुवृत्त्या भजेत तत् पादसरोज गन्धम् ॥ ३८ ॥

धातुः	सबके रक्षक	दुरन्त	अनन्त
रथाङ्गपाणेः	चक्रपाणि	वीर्यस्य	पराक्रमवाले प्रभु

परस्य	परमात्माके		रहनेवाली
पदवीं	स्वरूपको	अनुवृत्त्या	वृत्तिको उन्हींमें
स	वह		लगाये हुए
वेद	जानता है	तत्	उनके
यः	जो	पादसरोज	चरण कमलोंकी
अमायया	निष्कपट भावसे	गन्धं	सुगन्धका
संततया	निरन्तर बनी	भजेत्	सेवन करता है ।३८।

अथेह धन्या भगवन्त इत्थं
यद्वासुदेवेऽखिललोकनाथे ।
कुर्वन्ति सर्वात्मकमात्मभावं
न यत्र भूयः परिवर्त उग्रः ॥३९॥

अथ इह धन्याः भगवन्तः इत्थं यत् वासुदेवे अखिल लोकनाथे कुर्वन्ति सर्वात्मकं आत्मभावं न यत्र भूयः परिवर्तः उग्रः ॥ ३९ ॥

अथ	अहो	सर्वात्मकं	सर्वात्मा रूपसे
इह	इस संसारमें	आत्मभावं	आत्मभाव
भगवन्तः	भगवत्स्वरूप आप	कुर्वन्ति	करते हैं
	लोग ही	यत्र	जहाँ (उस आत्म-
धन्याः	धन्य हैं		भावमें)
यत्	जो	भूयः	पुनः
इत्थं	इस प्रकार	उग्रः	भयानक
अखिल	सम्पूर्ण	परिवर्तः	पुनर्जन्म
लोकनाथे	लोकोंके स्वामी	न	नहीं होता ॥३९॥
वासुदेवे	वासुदेवमें		

इदं भागवतं नाम पुराणं ब्रह्मसम्मितम् ।
उत्तमश्लोकचरितं चकार भगवानृषिः ॥४०॥

इदं भागवतं नाम पुराणं ब्रह्म सम्मितं उत्तमश्लोक चरितं चकार भगवान् ऋषिः ॥ ४० ॥

इदं	यह	उत्तमश्लोक	पवित्र कीर्ति (भगवानका)
भागवतं	भागवत		
नाम	नामवाला	चरितं	चरितवाला
पुराणं	पुराण	भगवान् ऋषिः	ऋषि रूपमें अवतीर्ण भगवान् व्यासने
ब्रह्म	वेद		
सम्मितं	सम्मत	चकार	निर्मित किया ॥४०॥

निःश्रेयसाय लोकस्य धन्यं स्वस्त्ययनं महत् ।
तदिदं ग्राहयामास सुतमात्मवतां वरम् ॥४१॥

निश्रेःयसाय लोकस्य धन्यं स्वस्त्यमनं महत् तत् इदं ग्राहयामास सुतं आत्मवतां वरम् ॥ ४१ ॥

लोकस्य	लोकके	इदं	इस (भागवत) को
निःश्रेयसाय	परमकल्याणके लिए (व्यासजी ने)	आत्मवतां	आत्मज्ञानियोंमें
		वरं	श्रेष्ठ
धन्यं	धन्य	सुतं	अपने पुत्र (शुकदेवजी) को
महत्	महान्		
स्वस्त्ययनं	मंगलकारी	ग्राहयामास	पढ़ाया ॥४१॥
तत्	उस		

सर्ववेदेतिहासानां सारं सारं समुद्धृतम् ।
स तु संश्रावयामास महाराजं परीक्षितम् ॥४२॥

सर्व वेद इतिहासानां सारं सारं समुद्धृतं सतु संश्रावयामास महाराजं परीक्षितम् ॥ ४२ ॥

सर्व	सभी	स तु	उन (शुकदेवजीने) तो
वेद	वेदों		
इतिहासानं	(महाभारतादि) इतिहासोंका	महाराजं	महाराज
		परीक्षितं	परीक्षितको
सारं सारं	तथ्यांश	संश्रावयामास	भली प्रकार सुनाया ॥४२॥
समुद्धृतं	(इस भागवतमें) भली प्रकार ले लिया है ।		

प्रायोपविष्टं गङ्गायां परीतं परमर्षिभिः ।
कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह ॥४३॥

प्रायोपविष्टं गङ्गायां परीतं परमर्षिभिः कृष्णे स्वधाम उपगते धर्मज्ञानादिभिः सह ॥ ४३ ॥

कृष्णे	श्रीकृष्णके	**गंगायां**	गंगा किनारे
धर्मज्ञानादिभिः	धर्मज्ञान (ऐश्वर्यादि) आदि	**परमर्षिभिः**	परमर्षियोंसे
सह	के साथ	**परीतं**	घिरे हुए
स्वधाम	अपने धाम	**प्रायोपविष्टं**	अनशन करनेका व्रत लेकर बैठे ।४३।
उपगते	चले जानेपर (राजा परीक्षित)		

कलौ नष्टदृशामेष पुराणार्कोऽधुनोदितः ।
तत्र कीर्तयतो विप्रा विप्रर्षेर्भूरितेजसः ॥४४॥

कलौ नष्ट दृशां एष पुराण अर्कः अधुना उदितः तत्र कीर्तयतः विप्रा विप्रर्षे भूरि तेजसः ॥ ४४ ॥

कलौ	कलियुगके (प्रभाव)से	**विप्रा**	ब्राह्मणो ! (शौनकादि ऋषियो)
नष्ट दृशां	जिनकी दृष्टि (विवेक) नष्ट हो गया है	**तत्र**	वहाँ (गंगा किनारे)
एष	(उनके लिए) यह	**भूरि**	बहुत अधिक
पुराण	पुराण रूपी	**तेजसः**	तेजस्वी
अर्क	सूर्य	**विप्रर्षे**	श्रीशुकदेवजीके
अधुना	इस समय	**कीर्तयतः**	(इस पुराणका) उपदेश करते समय ॥४४॥
उदितः	उदय हुआ है ।		

अहं चाध्यगमं तत्र निविष्टस्तदनुग्रहात् ।
सोऽहं वः श्रावयिष्यामि यथाधीतं यथामति ॥४५॥

अहं च अध्यगमं तत्र निविष्टः तद् अनुग्रहात् स अहं वः श्रावयिष्यामि यथा अधीतं यथा मति ॥ ४५ ॥

अहं	मैं	**स**	वह (श्रीमद्भागवत)
च	भी	**यथा**	जैसा
तत्र	वहाँ	**अधीतं**	मैंने अध्ययन किया
अध्यगमं	पहुँचा	**यथा**	जैसी-जितनी (मुझमें)
तद्	उन (शुकदेवजी) के	**मति**	बुद्धि है
अनुग्रहात्	अनुग्रहसे	**वः**	आप लोगोंको
निविष्टः	भली प्रकार बैठा।	**श्रावयिष्यामि**	श्रवण कराऊँगा।४५।
अहं	मैं		

इति श्रीमद्भागवते महापुराणे वैयासिक्यां अष्टादशसाहस्र्यां
पारमहंस्यां संहितायां प्रथमस्कन्धे तृतीयोऽध्यायः

अथ चतुर्थोऽध्यायः

व्यास उवाच–

इति ब्रुवाणं संस्तूय मुनीनां दीर्घसत्रिणाम् ।
वृद्धः कुलपतिः सूतं बह्वृचः शौनकोऽब्रवीत् ॥१॥

इति ब्रुवाणं संस्तूय मुनीनां दीर्घ सत्रिणां वृद्धः कुलपतिः सूतं बह्वृचः शौनकः अब्रवीत् ॥ १ ॥

दीर्घ	लम्बे (समय तकके)	**इति**	ऐसा
सत्रिणां	यज्ञमें लगे	**ब्रुवाणं**	बोलनेवाले
मुनीनां	मुनियोंके	**सूतं**	सूतजीकी
कुलपतिः	कुलपति	**संस्तूय**	भली प्रकार प्रशंसा करके
वृद्धः	वृद्ध (बड़े)		
बह्वृचः	ऋग्वेदी	**अब्रवीत्**	बोले ॥१॥
शौनकः	शौनकजी		

शौनक उवाच–

सूत सूत महाभाग वद नो वदतां वर ।
कथां भागवतीं पुण्यां यदाह भगवाञ्छुकः ॥२॥

सूत सूत महाभाग वद नः वदतां वर कथां भागवतीं पुण्यां यत् आह भगवान् शुकः ॥ २ ॥

महाभाग	परम सौभाग्यशाली	**कथां**	कथा
वदतां	प्रवचन करनेवालोंमें	**भगवान्**	भगवान्
वर	श्रेष्ठ	**शुकः**	शुकदेवजीने
सूत सूत	हे सूतजी !	**आह**	सुनाया था
यत्	जो	**नः**	हम लोगोंको (वह कथा)
पुण्यां	पवित्र		
भागवतीं	भागवतकी	**वद**	सुनाइये ॥२॥

कस्मिन् युगे प्रवृत्तेयं स्थाने वा केन हेतुना ।
कुतः सञ्चोदितः कृष्णः कृतवान् संहितां मुनिः ॥३॥

कस्मिन् युगे प्रवृत्ता इयं स्थाने वा केन हेतुना कुतः सञ्चोदितः कृष्णः कृतवान् सहितां मुनिः ॥ ३ ॥

इयं	यह (कथा)	**केन**	किसके द्वारा
कस्मिन्	किस	**सञ्चोदितः**	प्रेरित किये जानेपर
युगे	युगमें	**मुनिः**	मुनि
स्थाने	(किस) स्थानमें	**कृष्णः**	श्रीकृष्ण द्वैपायन व्यासजीने
वा	अथवा		
केन	किस	**संहितां**	(इस) परमहंस संहिताकी
हेतुना	कारणसे		
प्रवृत्ता	हुई थी ?	**कृतवान्**	रचनाकी ? ॥३॥

तस्य पुत्रो महायोगी समदृङ् निर्विकल्पकः ।
एकान्तमतिरुन्निद्रो गूढो मूढ इवेयते ॥४॥

तस्य पुत्रः महायोगी समदृक् निर्विकल्पकः एकान्त मति उन्निद्रः गूढः मूढ इव ईयते ॥ ४ ॥

तस्य	उन (व्यासजीके)	**उन्निद्रः**	जागरूक
पुत्रः	पुत्र (शुकदेवजी)	**गूढः**	छिपे रहनेवाले हैं
महायोगीः	महायोगी	**मूढ**	अज्ञ
समदृक्	समदर्शी	**इव**	जैसे
निर्विकल्पकः	भेदभाव रहित	**ईयते**	प्रतीत होते हैं ॥४॥
एकान्त मतिः	व्यवसायात्मिका (स्थिर) बुद्धिवाले		

दृष्ट्वानुयान्तमृषिमात्मजमप्यनग्नं
देव्यो ह्रिया परिदधुर्न सुतस्य चित्रम् ।
तद्वीक्ष्य पृच्छति मुनौ जगदुस्तवास्ति
स्त्रीपुम्भिदा न तु सुतस्य विविक्तदृष्टेः ॥५॥

दृष्ट्वा अनुयान्तं ऋषिं आत्मजं अपि नग्नं देव्यः ह्रिया परिदधुः न सुतस्य चित्रं तद् वीक्ष्य पृच्छति मुनौ जगदुः तवः अस्ति स्त्री-पुं भिदा न तु सुतस्य विविक्त दृष्टेः ॥ ५ ॥

आत्मजं	पुत्रके	मुनौ	व्यासजीके
अनुयान्तं	पीछे जाते हुए	पृच्छति	पूछनेपर
दृष्ट्वा	(व्यासजीको) देखकर	जगदुः	(देवियोंने) कहा
ह्रिया	लज्जासे	तव	आपमें
देव्यः	देवियोंने	स्त्री-पुं	स्त्री-पुरुषका
परिदधुः	वस्त्र पहिन लिए।	भिदा	भेद-ज्ञान
नग्नं	दिगम्बर	अस्ति	है
अपि	होनेपर भी	विविक्त	अत्यन्त एकाग्र
सुतस्य	पुत्रको (देखकर)	दृष्टेः	दृष्टिवाले
न	नहीं पहिने।	सुतस्य तु	(आपके) पुत्रमें तो
तत्	ऐसी	न	(यह भेद ज्ञान) नहीं
चित्रं	विचित्र बात		है ॥५॥
वीक्ष्य	देखकर		

कथमालक्षितः पौरैः सम्प्राप्तः कुरुजाङ्गलान् ।
उन्मत्तमूकजडवद्विचरन् गजसाह्वये ॥६॥

कथं आलक्षितः पौरैः सम्प्राप्तः कुरुजाङ्गलान् उन्मत्त मूक जड़वत् विचरन् गजसाह्वये ॥ ६ ॥

कुरुजाङ्गलान्	कुरुजाङ्गल देशमें	विचरन्	विचरण करते हुए
गजसाह्वये	हस्तिनापुरमें	सम्प्राप्तः	पहुँचनेपर
उन्मत्त	पागल	पौरैः	नागरिक लोगों द्वारा
मूक	गूंगे	कथं	(वे) कैसे
जड़वत्	मूर्खके समान	आलक्षितः	पहिचाने गये ॥६॥

कथं वा पाण्डवेयस्य राजर्षेर्मुनिना सह ।
संवादः समभूत्तात यत्रैषा सात्वती श्रुतिः ॥७॥

कथं वा पाण्डवेयस्य राजर्षेः मुनिना सह संवादः समभूत तात यत्र एषाः सात्वतीः श्रुतीः ॥ ७ ॥

तात	प्रिय सूतजी	**संवादः**	संवाद
वा	अथवा	**समभूत**	हुआ
पाण्डवेयस्य	पाण्डव वंशमें उत्पन्न	**यत्र**	जिसमें
राजर्षेः	राजर्षि (परीक्षित) का	**एषाः**	यह
		सात्वतीः	सात्वत
मुनिना	मुनि (शुकदेवजी)के	**श्रुतिः**	संहिता (कही
सह	साथ		गयी) ॥७॥
कथं	कैसे		

स गोदोहनमात्रं हि गृहेषु गृहमेधिनाम् ।
अवेक्षते महाभागस्तीर्थीकुर्वंस्तदाश्रमम् ॥८॥

स गोदोहनमात्रं हि गृहेषु गृहमेधिनां अवेक्षते महाभागः तीर्थी कुर्वं तत् आश्रमम् ॥ ८ ॥

महाभागः	महाभाग	**तीर्थी**	पवित्र
सः	शुकदेवजी	**कुर्वन्**	करते हुए
हि	क्योंकि	**गोदोहनमात्रं**	गाय दुही जाय केवल
गृहमेधिनां	गृहस्थोंके		इतनी देर वे
गृहेषु	घरोंमें	**अवेक्षते**	प्रतीक्षा करते
तत्	उस		(ठहरते) हैं ॥८॥
आश्रमं	आश्रम (घर) को		

अभिमन्युसुतं सूत प्राहुर्भागवतोत्तमम् ।
तस्य जन्म महाश्चर्यं कर्माणि च गृणीहि नः ॥९॥

अभिमन्यु सुतं सूत प्राहुः भागवतोत्तमं तस्य जन्म महाश्चर्यं कर्माणि च गृणीहि नः ॥ ९ ॥

सूत	सूतजी !	**प्राहुः**	कहा गया है ।
अभिमन्यु सुतं	अभिमन्युके पुत्र (परीक्षित) को	**तस्य**	उनके
		महाश्चर्यं	महान् आश्चर्यजनक
भागवतोत्तमं	भगवद् भक्तोंमें उत्तम	**जन्म**	जन्मको

च	और	नः	हम लोगोंसे
कर्माणि	कर्मोंको	गृणीहि	कहिये ॥९॥

स सम्राट् कस्य वा हेतोः पाण्डूनां मानवर्धनः ।
प्रायोपविष्टो गङ्गायामनादृत्याधिराट्श्रियम् ॥१०॥

स सम्राट् कस्य वा हेतोः पाण्डूनां मानवर्द्धनः प्रायोपविष्टः गङ्गायां अनादृत्य अधिराट् श्रियम् ॥ १० ॥

वा	अथवा	अधिराट्	सम्राट्पदीय
सः	वे	श्रियं	लक्ष्मीकी
सम्राट्	सम्राट् जो	अनादृत्य	उपेक्षा करके
पाण्डूनां	पाण्डवोंकी	गङ्गायां	गंगा किनारे
मानवर्द्धनः	कीर्ति बढ़ानेवाले थे	प्रायोपविष्टः	अनशन करने बैठे ॥१०॥
कस्य	किस		
हेतोः	कारणसे		

नमन्ति यत्पादनिकेतमात्मनः
शिवाय हानीय धनानि शत्रवः ।
कथं स वीरः श्रियमङ्ग दुस्त्यजां
युवैषतोत्स्रष्टुमहो सहासुभिः ॥११॥

नमन्ति यत् पादनिकेतं आत्मनः शिवाय ह आनीय धनानि शत्रवः कथं स वीरः अंग दुस्त्यजां श्रियं युवैषतः उत्स्रष्टुं अहो सह असुभिः ॥ ११ ॥

अंग	सूतजी !	धनांनि	बहुत-सा धन
यत्	जिनके	आनीय	(साथ) लाकर
पादनिकेतं	पादपीठकां	नमन्ति	प्रणाम करते हैं
शत्रवः	शत्रुगण	स	वह
ह	निश्चय	वीरः	वीर (परिक्षित्)
आत्मनः	अपने	दुस्त्यजां	जिसे छोड़ना बहुत कठिन है
शिवाय	भले (रक्षा) के लिए		

श्रियं	(उस) लक्ष्मीको	सह	साथ
युवैषतः	युवावस्थामें	कथं	कैसे
अहो	आश्चर्यकी बात है	उत्सष्टुं	त्यागनेको (प्रस्तुत
असुभिः	प्राणोंके		हुए) ॥११॥

शिवाय लोकस्य भवाय भूतये
य उत्तमश्लोकपरायणा जनाः ।
जीवन्ति नात्मार्थमसौ पराश्रयं
मुमोच निर्विद्य कुतः कलेवरम् ॥१२॥

शिवाय लोकस्य भवाय भूतये यः उत्तमश्लोक परायणाः जनाः जीवन्ति न आत्मार्थं असौ पराश्रयं मुमोच निर्विद्य कुतः कलेवरम् ॥ १२ ॥

यः	जो	आत्मार्थं	अपने स्वार्थके लिए
उत्तमश्लोक	पुण्ययशा (भगवान)के	न	नहीं।
परायणाः	परायण	असौ	इन (राजा
जनाः	लोग हैं		परिक्षित) ने
लोकस्य	(वे) लोकोंके	निर्विद्य	विरक्त होकर
शिवाय	कल्याणके लिए	पराश्रयं	दूसरोंको आश्रय
भूतये	प्राणियोंके		देनेवाला
भवाय	अभ्युदयके लिए	कलेवरं	(अपना) शरीर
जीवन्ति	जीवन धारण करते	कुतः	क्यों
	हैं,	मुमोच	त्याग दिया ?॥१२॥

तत्सर्वं नः समाचक्ष्व पृष्टो यदिह किञ्चन ।
मन्ये त्वां विषये वाचां स्नातमन्यत्र छान्दसात् ॥१३॥

तत् सर्वं नः समाचक्ष्व पृष्टः यत् इह किञ्चन मन्ये त्वां विषये वाचां स्नातं अन्यत्र छान्दसात् ॥ १३ ॥

छान्दसात्	वेद वाणीको	स्नातं	उसमें अत्यन्त निपुण
अन्यत्र	छोड़कर अन्य	त्वां	आपको
वाचां विषये	वाणीका जितना	मन्ये	हम मानते हैं।
	विषय है		(अतः)

इह	यहाँ	तत्	वह
यत्	जो	सर्वं	सब
किञ्चन	कुछ	नः	हम लोगोंको
पृष्टः	(आपसे) पूछा गया है	समाचक्ष्व	भली प्रकार बतलाइये ॥१३॥

सूत उवाच-

द्वापरे समनुप्राप्ते तृतीये युगपर्यये ।
जातः पराशराद्योगी वासव्यां कलया हरेः ॥१४॥

द्वापरे सम् अनुप्राप्ते तृतीये युग पर्यये जातः पराशरात् योगीः वासव्यां कलया हरेः ॥ १४ ॥

युग	युगोंके	पराशरात्	महर्षि पराशरसे
पर्यये	क्रममें	वासव्यां	वसुपुत्री(सत्यवती)में
तृतीये	तीसरे (युग)	हरेः	श्रीहरिकी
द्वापरे	द्वापरके	कलया	कलासे
सम्	भली प्रकार	योगीः	योगी (व्यासजी)
अनुप्राप्ते	प्रभावमें आ जानेपर	जातः	उत्पन्न हुए ॥१४॥

स कदाचित्सरस्वत्या उपस्पृश्य जलं शुचि ।
विविक्तदेश आसीन उदिते रविमण्डले ॥१५॥

सः कदाचित् सरस्वत्यां उपस्पृश्य जलं शुचि विविक्त देश आसीनः उदिते रविमण्डले ॥ १५ ॥

सः	वे (व्यासजी)	सरस्वत्यां	सरस्वती नदीके किनारे (उसके)
कदाचित्	किसी समय	शुचि	पवित्र
रविमण्डले	सूर्य मण्डलके	जलं	जलको
उदिते	उदय हो जानेपर	उपसृश्य	आचमन करके
विविक्त	एकान्त	आसीनः	बैठे थे ॥१५॥
देश	स्थानमें		

परावरज्ञः स ऋषिः कालेनाव्यक्तरंहसा ।
युगधर्मव्यतिकरं प्राप्तं भुवि युगे युगे ॥१६॥

परावरज्ञः सः ऋषिः कालेन अव्यक्त रंहसा युगधर्म व्यतिकरं प्राप्तं भुवि युगे युगे ॥ १६ ॥

सः	उन	**भुवि**	पृथ्वीपर
परावरज्ञः	लोक-परलोकको जाननेवाले	**युगे युगे**	प्रत्येक युगमें
		प्राप्तं	होनेवाले
ऋषिः	ऋषिने	**युगधर्म**	युगके धर्मको
अव्यक्त	अव्यक्त	**व्यतिकरं**	विकृत करने-वाला ॥१६॥
रंहसा	वेगवाले		
कालेन	कालके द्वारा		

भौतिकानां च भावानां शक्तिह्रासं च तत्कृतम् ।
अश्रद्दधानान्निःसत्त्वान्दुर्मेधान् ह्रसितायुषः ॥१७॥

भौतिकानां च भावानां शक्ति ह्रासं च तत् कृतं अश्रद्दधानान् निःसत्त्वान् दुर्मेधान् ह्रसितायुषः ॥ १७ ॥

च	और	**च**	भी (और)
भौतिकानां	भौतिक	**अश्रद्दधानान्**	श्रद्धाहीन
भावानां	पदार्थोंका	**निःसत्त्वान्**	सत्त्वहीन
तत्	उस (कालके)	**दुर्मेधान**	दुर्बुद्धिवाले
कृतं	करने (प्रभाव) से	**ह्रसित**	क्षीण हुई
शक्तिह्रासं	शक्तिका ह्रास	**आयुषः**	आयुवाले ॥१७॥

दुर्भगांश्च जनान् वीक्ष्य मुनिर्दिव्येन चक्षुषा ।
सर्ववर्णाश्रमाणां यद्दध्यौ हितममोघदृक् ॥१८॥

दुर्भगान् च जनान् वीक्ष्य मुनिः दिव्येन चक्षुषा सर्व वर्ण आश्रमाणां यत् दध्यौ हितं अमोघदृक् ॥ १८ ॥

च	और	**जनान्**	लोगोंको
दुर्भगान्	भाग्यहीन	**दिव्येन**	दिव्य

चक्षुषा	दृष्टिसे	सर्वं	सब
वीक्ष्य	देखकर	वर्णं	वर्णों
यत्	क्योंकि	आश्रमाणां	आश्रमोंका
अमोघ	अव्यर्थ	हितं	भला (हो, इसका)
दृक्	दृष्टिवाले थे,	दध्यौ	विचार किया ॥१८॥
मुनिः	मुनि (व्यासजी) ने		

चातुर्होत्रं कर्म शुद्धं प्रजानां वीक्ष्य वैदिकम् ।
व्यदधाद्यज्ञसन्तत्यै वेदमेकं चतुर्विधम् ॥१९॥

चातुर्होत्रं कर्म शुद्धं प्रजानां वीक्ष्य वैदिकं व्यदधात् यज्ञ संतत्यै वेदं एकं चतुर्विधम् ॥ १९ ॥

वैदिकं	वेद प्रतिपादित	एकं	एक ही
चातुर्होत्रं	चार (होता, अध्वर्यु, उद्गाता और ब्रह्मा) के द्वारा होनेवाला	वेदं	वेदको
		यज्ञ	यज्ञ (की)
		संतत्यैः	परम्परा बनाये रखनेके लिए
कर्म	यज्ञ कर्म		
प्रजानां	प्रजाको	चतुर्विधं	चार प्रकारसे
शुद्धं	शुद्ध करनेवाला है	व्यदधात्	विभाजित किया ॥१९॥
वीक्ष्य	(यह) देखकर		

ऋग्यजुः सामाथर्वाख्या वेदाश्चत्वार उद्धृताः ।
इतिहासपुराणं च पञ्चमो वेद उच्यते ॥२०॥

ऋग् यजुः साम अथर्व आख्याः वेदः चत्वारः उद्धृताः इतिहासं पुराणं च पञ्चमः वेदः उच्यते ॥ २० ॥

ऋग्	ऋग्वेद	आख्याः	नामवाले
यजुः	यजुर्वेद	चत्वाराः	चार
साम	सामवेद	वेदाः	वेदोंका
अथर्व	अथर्ववेद	उद्धृताः	सम्पादन किया ।

च	और	पञ्चमः	पाँचवाँ
इतिहासं	इतिहास (महा-भारतादि)	वेदः	वेद
पुराणं	पुराणोंको	उच्यते	कहा जाता है ॥२०॥

तत्रर्ग्वेदधरः पैलः सामगो जैमिनिः कविः ।
वैशम्पायन एवैको निष्णातो यजुषामुत ॥२१॥

तत्र ऋग्वेद धरः पैलः सामगः जैमिनिः कविः वैशम्पायन एव एकः निष्णातः यजुषां उत ॥ २१ ॥

तत्र	उन (चारों वेदों) में		(हुए)
ऋग्वेद	ऋग्वेद	उत	और
धरः	धारण करनेवाले	वैशाम्पायन	वैशम्पायन
पैलः	पैल हुए,	एव	ही
कविः	बुद्धिमान	एकः	अकेले
जैमिनिः	जैमिनी ऋषि	यजुषां	यजुर्वेदके
सामगः	सामवेदके ज्ञाता	निष्णातः	विद्वान बने ॥२१॥

अथर्वाङ्गिरसामासीत्सुमन्तुर्दारुणो मुनिः ।
इतिहासपुराणानां पिता मे रोमहर्षणः ॥२२॥

अथर्व आंगिरसां आसीत् सुमन्तुः दारुणः मुनिः इतिहास पुराणानां पिता मे रोमहर्षणः ॥ २२ ॥

अथर्व	अथर्ववेदमें	इतिहास	इतिहास (महा-भारतादि)
आंगिरसां	अंगिरा गोत्रीयोंमें	पुराणानां	पुराणोंके (ज्ञाता)
दारुणः	दरुण पुत्र	मे	मेरे
मुनिः	मुनि	पिता	पिता
सुमन्तुः	सुमन्त (प्रवीण)	रोमहर्षणः	रोमहर्षण
आसीत्	हुए,		(हुए) ॥२२॥

त एत ऋषयो वेदं स्वं स्वं व्यस्यन्ननेकधा ।
शिष्यैः प्रशिष्यैस्तच्छिष्यैर्वेदास्ते शाखिनोऽभवन् ॥२३॥

त एत ऋषयः वेदं स्वं स्वं व्यस्यन् अनेकधा शिष्यैः प्रशिष्यैः तत् शिष्यैः वेदाः ते शाखिनः अभवन् ॥ २३ ॥

त	ऊपर बताये गये	प्रशिष्यैः	शिष्योंके शिष्यों,
एत	इन	तत्	उनके भी
ऋषयः	ऋषयोंने	शिष्यैः	शिष्योंने (यही क्रम रखा)
स्वं स्वं	अपने अपने		
वेदं	वेदको	ते	(अतः) वे
अनेकधाः	अनेक प्रकारसे	वेदाः	वेद
व्यस्यन्	व्यवस्थित(सम्पादित) किया ।	शाखिनः	अनेक शाखाओंवाले
		अभवन्	हो गये ॥२३॥
शिष्यैः	उनके शिष्यों,		

त एव वेदा दुर्मेधैर्धार्यन्ते पुरुषैर्यथा ।
एवं चकार भगवान् व्यासः कृपणवत्सलः ॥२४॥

त एव वेदाः दुर्मेधैः धार्यन्ते पुरुषैः यथा एवं चकार भगवान् व्यासः कृपण वत्सलः ॥ २४ ॥

दुर्मेधैः	दुष्ट या कम बुद्धिवाले	एवं	इस प्रकार
पुरुषैः	पुरुषोंके द्वारा	कृपण	दुर्बलजनोंपर
यथा	जैसे	वत्सलः	स्नेह रखनेवाले
त एव	उन्हीं	भगवान् व्यासः	भगवान् व्यासने
वेदाः	वेदोंका	चकार	(विभाजन) कर दिया ॥२४॥
धार्यन्ते	धारण (याद रखना) सम्भव बने		

स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा ।
कर्मश्रेयसि मूढानां श्रेय एवं भवेदिह ।
इति भारतमाख्यानं कृपया मुनिना कृतम् ॥२५॥

स्त्रीः शूद्रः द्विज बन्धूनां त्रयी न श्रुतिगोचरा कर्म श्रेयसि मूढानां श्रेय एवं भवेत् इह इति भारतं आख्यानं कृपया मुनिना कृतम् ॥२५॥

स्त्रीः	स्त्रियों	मूढानां	अनजानोंका
शूद्रः	शूद्रों	एवं	इस प्रकार
द्विजबन्धूनां	पतित द्विजातियों (के लिए)	इह	संसारमें
		श्रेयः	कल्याण
त्रयी	(कर्म, ज्ञान,उपासना प्रतिपादक) वेद	भवेत्	होगा
		इति	ऐसा (सोचकर)
श्रुतिगोचरा	श्रवण-गोचर	कृपया	कृपा करके
न	नहीं है (इनका वेदाध्यनमें अधिकार नहीं है ।)	मुनिना	मुनि व्यासजीने
		भारतं	महाभारत रूप
		आख्यानं	कथात्मक ग्रंथ
श्रेयसि	कल्याणकारी	कृतं	बनाया ॥२५॥
कर्म	कर्मोंके (विषयमें)		

एवं प्रवृत्तस्य सदा भूतानां श्रेयसि द्विजाः ।
सर्वात्मकेनापि यदा नातुष्यद्धृदयं ततः ॥२६॥

एवं प्रवृत्तस्य सदा भूतानां श्रेयसि द्विजाः सर्वात्मकेन अपि यदा न अतुष्यत् हृदयं ततः ॥ २६ ॥

द्विजाः	ब्राह्मणो (शौनकादि ऋषियो) !	प्रवृत्तस्य	लगे रहनेपर
		अपि	भी
सदा	सर्वदा	यदाहृदयं	जब हृदय
सर्वात्मकेन	सम्पूर्ण शक्तिसे	अतुष्यत्	सन्तुष्ट
एवं	इस प्रकार	न	नहीं हुआ,
भूतानां	प्राणियोंके	ततः	तब ॥२६॥
श्रेयसि	कल्याणमें		

नातिप्रसीदद्धृदयः सरस्वत्यास्तटे शुचौ ।
वितर्कयन् विविक्तस्थ इदं प्रोवाच धर्मवित् ॥२७॥

नाति प्रसीदत् हृदयः सरस्वत्याः तटे शुचौ वितर्कयन् विविक्तस्थः इदं प्रोवाच धर्मवित् ॥ ७ ॥

शुचौ	पवित्र	प्रसीदत्	निर्मल होता है (यह देखकर)*
सरस्वत्याः	सरस्वतीके		
तटे	किनारेपर	धर्मवित्	धर्मज्ञ (व्यासजी)
विविक्तस्थः	एकान्तमें बैठनेपर भी	वितर्कयन्	विचार करते हुए (मन-ही-मन)
हृदयः	हृदय	इदं	यह
नाति	बहुत नहीं	प्रोवाच	बोले ॥२७॥

धृतव्रतेन हि मया छन्दांसि गुरवोऽग्नयः ।
मानिता निर्व्यलीकेन गृहीतं चानुशासनम् ॥२८॥

धृतव्रतेन हि मया छन्दांसि गुरवः अग्नयः मानिताः निर्व्यलीकेन गृहीतं च अनुशासनम् ॥ २८ ॥

मया	मैंने	मानिताः	सम्मान किया है
निर्व्यलीकेन	निष्कपट भावसे	च	और
धृतव्रतेन हि	व्रत धारण करके ही	अनुशासनं	(उनकी) आज्ञाका
छन्दांसि	वेदोंका,	गृहीतं	(ग्रहण) पालन
गुरवः	गुरुजनोंका,		किया है ॥२८॥
अग्नयः	हवनीय अग्नियोंका		

भारतव्यपदेशेन ह्याम्नायार्थश्च दर्शितः ।
दृश्यते यत्र धर्मादि स्त्रीशूद्रादिभिरप्युत ॥२९॥

भारत व्यपदेशेन हि आम्नाय अर्थः च दर्शितः दृश्यते यत्र धर्म आदि स्त्री शूद्र आदिभिः अपि उत ॥ २९ ॥

भारत	महाभारत (की)	च	भी
व्यपदेशेन	(रचनाके) बहानेसे	दर्शितः	बतला दिया है ।
हि	निश्चय ही	यत्र	जिसमें
आम्नाय	वेदोंका	स्त्री	स्त्री
अर्थः	अर्थ	शूद्र	शूद्र

---

* स्थान पवित्र है, एकान्त है तब भी हृदय बहुत सन्तुष्ट नहीं ?

आदिभिः	आदिके द्वारा भी	उत	निश्चयपूर्वक
धर्मः	धर्म,	दृश्यते	देखे (जाने) जाते
आदि	आदि		हैं ॥२९॥
अपि	भी		

तथापि बत मे दैह्यो ह्यात्मा चैवात्मना विभुः ।
असम्पन्न इवाभाति ब्रह्मवर्चस्यसत्तमः ॥३०॥

तथापि बत मे दैह्यः हि आत्मा च एव आत्मना विभुः असम्पन्न इव आभाति ब्रह्मवर्चस्य सत्तमः ॥ ३० ॥

ब्रह्मवर्चस्य	ब्रह्मचर्यके तेजसे	विभुः	सर्वव्यापक
सत्तमः	भली प्रकार पूर्ण हूँ	आत्मना	अपने स्वरूप
तथापि	फिर भी	च एव	से ही
बत	आश्चर्य हैं कि	असम्पन्न	अपूर्णकी
मेहि	मेरा तो	इव	भाँति
दैह्यः	देहस्थ	आभाति	प्रतीत होता है ।३०।
आत्मा	चित्त		

किं वा भागवता धर्मा न प्रायेण निरूपिताः ।
प्रियाः परमहंसानां त एव ह्यच्युतप्रियाः ॥३१॥

किं वा भागवताः धर्मा न प्रायेण निरूपिताः प्रियाः पारमहंसानां त एव हि अच्युतः प्रियाः ॥ ३१ ॥

वा	अथवा	निरूपिताः	निरूपण
किं	क्या	न	नहीं किया है
पारमहंसानां	परमहंसोंको	हि	क्योंकि
प्रियाः	प्रिय लगनेवाले	त	वही
भागवताः	भक्ति सम्बन्धी	एव	तो
धर्माः	धर्मोंका	अच्युतः	भगवानको भी
प्रायेण	प्रधानतापूर्वक	प्रियाः	प्रिय हैं ॥३१॥

तस्यैवं खिलमात्मानं मन्यमानस्य खिद्यतः ।
कृष्णस्य नारदोऽभ्यागादाश्रमं प्रागुदाहृतम् ॥३२॥

तस्य एवं खिलं आत्मानं मन्यमानस्य खिद्यतः कृष्णस्य नारदः अभि आगत् आश्रमं प्राक् उदाहृतम् ॥ ३२ ॥

एवं	इस प्रकार		व्यासके
आत्मानं	अपनेको	प्राग्	पहिले
खिलं	अपूर्ण	उदाहृतं	बतलाये गये
मन्यमानस्य	मानते हुए	आश्रमं	आश्रमपर
तस्य	उनके	नारदः	देवर्षि नारद
खिद्यतः	खेद करते हुए	अभि	अचानक
कृष्णस्य	श्रीकृष्ण द्वैपायन	आगात्	आगये ॥३२॥

तमभिज्ञाय सहसा प्रत्युत्थायागतं मुनिः ।
पूजयामास विधिवन्नारदं सुरपूजितम् ॥३३॥

तं अभिज्ञाय सहसा प्रत्युत्थाय आगतं मुनिः पूजयामास विधिवत् नारदं सुरपूजितम् ॥ ३३ ॥

मुनिः	मुनि व्यासने	सुरपूजितं	देवताओंसे भी पूजित
सहसा	अचानक	तं	उन
आगतं	आये हुए	नारदं	नारदजीकी
अभिज्ञाय	जानकर	विधिवत्	विधिपूर्वक
प्रत्युत्थाय	उठकर खड़े हुए	पूजयामास	पूजाकी ॥३३॥

इति श्रीमद्भागवते महापुराणे वैयासिक्यां अष्टादशसाहस्र्यां
पारमहंस्यां संहितायां प्रथमस्कन्धे चतुर्थोऽध्यायः

अथ पञ्चमोऽध्यायः

सूत उवाच–

अथ तं सुखमासीन उपासीनं बृहच्छ्रवाः ।
देवर्षिः प्राह विप्रर्षि वीणापाणिः स्मयन्निव ॥१॥

अथ तं सुखं आसीनं उपासीनं बृहत् श्रवाः देवर्षिः प्राह विप्रर्षि वीणापाणिः स्मयन् इव ॥ १ ॥

अथ	तदनन्तर	**स्मयन् इव**	मुस्कराते हुए से
सुखं	सुखपूर्वक	**तं**	उन
आसीनं	बैठे हुए	**उपासीनं**	समीप बैठे
बृहत् श्रवाः	बहुश्रुत	**विप्रर्षि**	व्यासजीसे
वीणापाणिः	हाथमें वीणा लिए	**प्राह**	कहा ॥१॥
देवर्षिः	नारदजीने		

नारद उवाच–

पाराशर्य महाभाग भवतः कच्चिदात्मना ।
परितुष्यति शारीर आत्मा मानस एव वा ॥२॥

पाराशर्य महाभाग भवतः कच्चित् आत्मना परितुष्यति शारीर आत्मा मानस एव वा ॥ २ ॥

महाभाग	महान् भाग्यशाली	**आत्मा वा**	बुद्धि और
पाराशर्य	पराशर-नन्दनजी !	**मानस**	मन
भवतः	आपके	**एव**	भी
आत्मना	अपने प्रयत्नसे	**कच्चित्**	निश्चित
शारीर	शरीरका	**परितुष्यति**	सन्तुष्ट तो है ? ॥२॥

जिज्ञासितं सुसम्पन्नमपि ते महदद्भुतम् ।
कृतवान् भारतं यस्त्वं सर्वार्थपरिबृंहितम् ॥३॥

जिज्ञासितं सुसम्पन्नं अपि ते महत् अद्भुतं कृतवान् भारतं यः त्वं सर्व अर्थ परिबृंहितम् ॥ ३ ॥

ते	आपकी	अद्भुतं	अद्भुत
जिज्ञासितं	जिज्ञासा	सर्वं	सब
अपि	तो	अर्थं	पुरुषार्थोंके (प्रतिपादनसे)
सुसम्पन्नं	भली प्रकार पूर्ण हो चुकी है	परिबृंहितं	परिपूर्ण
यः	जो	भारतं	महाभारतकी
त्वं	आपने	कृतवान्	रचना की ॥३॥
महत्	महान्		

जिज्ञासितमधीतं च यत्तद्ब्रह्म सनातनम् ।
अथापि शोचस्यात्मानकृतार्थ इव प्रभो ॥४॥

जिज्ञासितं अधीतं च यत् तत् ब्रह्म सनातनं अथ अपि शोचसि आत्मानं अकृतार्थं इव प्रभो ॥ ४ ॥

यत्	जो	अथ	अब
सनातनं	नित्य	प्रभो	समर्थ होते हुए
ब्रह्म	परमब्रह्म है	अपि	भी
तत्	उसकी भी	आत्मानं	अपनेको
जिज्ञासितं	जिज्ञासाकी	अकृतार्थं	कृतार्थ न हुएकी
च	और	इव	भाँति
अधीतं	(उसका) अधिगम किया है	शोचसि	चिन्ता करते हो ॥४॥

व्यास उवाच–

अस्त्येव मे सर्वमिदं त्वयोक्तं
तथापि नात्मा परितुष्यते मे ।
तन्मूलमव्यक्तमगाधबोधं
पृच्छामहे त्वाऽऽत्मभवात्मभूतम् ॥५॥

अस्ति एव मे सर्वं इदं त्वया उक्तं तथापि न आत्मा परितुष्यते मे तत् मूलं अव्यक्तं अगाध बोधं पृच्छामहे त्वां आत्मभव आत्मभूतं ॥ ५ ॥

त्वया	आपके द्वारा	**न**	नहीं होता है।
उक्तं	बतलाया गया	**आत्मभव**	स्वयंभू ब्रह्माजीके
इदं	यह	**आत्मभूतं**	मानसपुत्र
सर्वं	सब	**अगाधं**	अगाध
मे	मुझमें	**बोधं**	ज्ञानवाले
अस्ति	है	**त्वां**	आपसे
एव	ही	**तत्**	उसका
तथापि	फिर भी	**अव्यक्तं**	प्रकट न होनेवाला
मे	मेरा	**मूलं**	कारण
आत्मा	चित्त	**पृच्छामहे**	पूछता हूँ ॥५॥
परितुष्यते	सन्तुष्ट		

स वै भवान् वेद समस्तगुह्य-
मुपासितो यत्पुरुषः पुराणः ।
परावरेशो मनसैव विश्वं
सृजत्यवत्यत्ति गुणैरसङ्गः ॥६॥

स वै भवान् वेद समस्त गुह्यं उपासितः यत् पुरुषः पुराणः परावर ईशः मनसा एव विश्वं सृजति अवति अत्ति गुणैः असंगः ॥ ६ ॥

स	वह	**मनसा**	मनसे
वै	निश्चय	**एव**	ही
भवान्	आप	**गुणैः**	(प्रकृतिके) गुणोंसे
समस्त	सम्पूर्ण	**असंगः**	अलिप्त रहते हुए
गुह्यं	रहस्योंको	**विश्वं**	विश्वकी
वेद	जानते हैं	**सृजति**	सृष्टि करते हैं
यत्	क्योंकि	**अवति**	रक्षा करते हैं
परावर	लोक-परलोकके	**अत्ति**	खा लेते (प्रलय
ईशः	स्वामी (जो)		करते) हैं

पुराणः	(उन) सनातन	उपासितः	(आपने)उपासनाकी
पुरुषः	पुरुषकी		है ॥६॥

त्वं पर्यटन्नर्क इव त्रिलोकी-
मन्तश्चरो वायुरिवात्मसाक्षी ।
परावरे ब्रह्मणि धर्मतो व्रतैः
स्नातस्य मे न्यूनमलं विचक्ष्व ॥७॥

त्वं परि अटन अर्क इव त्रिलोकीं अन्तः चरः वायुः इव आत्म साक्षी परावरे ब्रह्मणि धर्मतः व्रतैः स्नातस्य मे न्यूनं अलं विचक्ष्व ॥ ७ ॥

त्वं	आप	साक्षी	देखनेवाले हैं,
अर्क	सूर्यकी	धर्मतः	धर्मपूर्वक
इव	भाँति	व्रतैः	नियमोंका पालन
त्रिलोकीं	तीनों लोकोंमें		करके
परि	चारों ओर	परावरे	परमब्रह्म और
अटन	घूमते हुए	ब्रह्मणि	अवर ब्रह्म (वेदों)में
वायुः	वायुकी	स्नातस्य	पूर्णत्व प्राप्त
इव	भाँति	मे	मेरी
अन्तः	भीतर भी	अलं	भारी
चरः	विचरण करके	न्यूनं	न्यूनताको
आत्म	(सबके) चित्तके	विचक्ष्व	बतलाइये ॥७॥

नारद उवाच–

भवतानुदितप्रायं यशो भगवतोऽमलम् ।
येनैवासौ न तुष्येत मन्ये तद्दर्शनं खिलम् ॥८॥

भवता अनुदितं प्रायं यशः भगवतः अमलं येन एव असौ न तुष्येत मन्ये तत् दर्शनं खिलम् ॥ ८ ॥

भवता	आपने	यशः	यशका
भगवतः	भगवान्के	प्रायः	प्रायः
अमलं	निर्मल	अनुदितः	वर्णन नहीं किया है।

येन	जिससे	तत्	वह
असौ	ये (भगवान)	दर्शनं	शास्त्र या ज्ञान
एव	ही	खिलं	अपूर्ण
न	नहीं	मन्ये	(मैं) मानता हूँ ॥८॥
तुष्येत	सन्तुष्ट होते		

यथा धर्मादयश्चार्था मुनिवर्यानुकीर्तिताः ।
न तथा वासुदेवस्य महिमा ह्यनुवर्णितः ॥९॥

यथा धर्म आदयः च अर्थाः मुनिवर्यः अनुकीर्तिताः न तथा वासुदेवस्य महिमा हि अनुवर्णितः ॥ ९ ॥

मुनिवर्यः	मुनि श्रेष्ठ !	कीर्तिताः	वर्णन किया है
यथा	जैसे (आपने)	हि	क्योंकि
धर्म	धर्म	तथा	वैसे
आदयः	आदि अर्थ,काम,मोक्ष	वासुदेवस्य	भगवान् वासुदेवकी
च	और	महिमा	महिमाका
अर्थाः	पुरुषार्थोंका	अनुवर्णितः	बार बार वर्णन
अनु	बार बार	न	नहीं किया है ॥९॥

न यद्वचश्चित्रपदं हरेर्यशो
जगत्पवित्रं प्रगृणीत कर्हिचित् ।
तद्वायसं तीर्थमुशन्ति मानसा
न यत्र हंसा निरमन्त्युशिक्क्षयाः ॥१०॥

न यत् वचः चित्रपदं हरेः यशः जगत् पवित्रं प्रगृणीत कर्हिचित् तत् वायसं तीर्थं उशन्ति मानसाः न यत्र हंसाः निरमन्ति उशिक्षयाः ॥ १० ॥

यत्	जिस	पवित्रं	पवित्र करनेवाला
चित्रपदं	विचित्र (अलंकारादि युक्त) पदवाली	हरेः	श्रीहरिका
		यशः	सुयश
वचः	वाणीमें	न प्रगृणीत	भली प्रकार नहीं गाया गया है
जगत्	जगतको		

तत्	तो वह	मानसाः	मानसरोवर निवासी
उशन्ति	उच्छिष्ट फेंकनेके		
वायसं	कौओंके	उशिक्षयाः	उत्तम शिक्षावाले
तीर्थं	स्थान (के समान) है	हंसाः	हंसगण
यत्र	जहाँ	न	नहीं
कर्हिचित्	कभी भी	निरमन्ति	भली प्रकार रमण करते ॥१०॥

तद्वाग्विसर्गो जनताघविप्लवो
यस्मिन् प्रतिश्लोकमबद्धवत्यपि ।
नामान्यनन्तस्य यशोऽङ्कितानि यत्
शृण्वन्ति गायन्ति गृणन्ति साधवः ॥११॥

तत् वाक् विसर्गः जनताः अघ विप्लवाः यस्मिन् प्रतिश्लोकं अबद्ध वत् अपि नामानि अनन्तस्य यशः अंकितानि यत् शृण्वन्ति गायन्ति गृणन्ति साधवः ॥ ११ ॥

अबद्ध	ठीक (छन्द अलंकार रहित)	प्रतिश्लोकं	प्रत्येक श्लोक (पद) में
वत्	होनेपर	अनन्तस्य	भगवानके
अपि	भी	यशः	सुयशसे
तत्	उस	अंकितानि	अंकित
वाक्	वाणीका	नामानि	नाम हैं,
विसर्गः	बोलना	यत्	क्योंकि
जनताः	लोगोंके	साधवः	साधु (महात्मा) गण
अघ	पापोंका	शृण्वन्ति	उसे सुनते हैं
विप्लवः	विनाशक है	गायन्ति	गाते हैं
यस्मिन्	जिसमें	गृणन्ति	कीर्तन करते हैं ।११।

नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरञ्जनम् ।
कुतः पुनः शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यकारणम् ॥१२॥

नैष्कर्म्यं अपि अच्युत भाव वर्जितं न शोभते ज्ञानं अलं निरञ्जनं कुतः पुनः शश्वत् अभद्रं इश्वरे न च अर्पितं कर्म यदपि अकारणम् ॥ १२ ॥

अच्युत	भगवत्	**न**	नहीं
भाव	भावसे	**अर्पितं**	अर्पण हुआ
वर्जितं	रहित	**कर्म च**	(सकाम) कर्म तो
निरञ्जनं	निर्मल	**शश्वत्**	सदा ही
नैष्कर्म्यं	मोक्षदायी	**अभद्रं**	अमंगल रूप (है)
ज्ञानं	ज्ञान	**यद्यपि**	यद्यपि
अपि	भी	**अकारणं**	निष्काम हो
अलं	पूर्णतः		(तो भी)
न शोभते	शोभा नहीं देता	**कुतः**	कहाँ (शोभित हो
पुनः	फिर		सकते हैं) ॥१२॥
ईश्वरे	भगवानको		

अथो महाभाग भवानमोघदृक् शुचिश्रवाः सत्यरतो धृतव्रतः ।
उरुक्रमस्याखिलबन्धमुक्तये समाधिनानुस्मर तद्विचेष्टितम् ॥१३॥

अथो महाभाग भवान् अमोघ दृक् शुचि श्रवाः सत्यरतः धृतव्रतः उरुक्रमस्य अखिल बन्ध मुक्तये समाधिना अनुस्मर तत् विचेष्टितम् ॥ १३ ॥

महाभाग	महाभाग्यवान् व्यासजी !	**अखिल**	सब लोगोंको
भवान्	आप	**बन्ध**	बन्धन (जन्म-मरण) से
अमोघ	अव्यर्थ	**मुक्तये**	मुक्त करनेके लिए
दृक्	दृष्टि (ज्ञान) वाले हैं,	**तत्**	उन
		उरुक्रमस्य	अनन्त पराक्रमके
शुचि	पवित्र (शास्त्रों) का	**विचेष्टितं**	लीलाओंको
श्रवाः	श्रवण करनेवाले हैं,	**समाधिना**	समाधि (एकाग्रता) के द्वारा
सत्यरतः	सत्यनिष्ठ हैं,	**अनुस्मर**	भली प्रकार स्मरण कीजिये ॥१३॥
धृतव्रतः	व्रतधारी हैं,		
अथो	अतः अब		

ततोऽन्यथा किंचन यद्विवक्षतः
पृथग्दृशस्तत्कृतरूपनामभिः ।
न कुत्रचित्क्वापि च दुःस्थिता मति-
र्लभेत वाताहतनौरिवास्पदम् ॥१४॥

ततः अन्यथा किंचन यत् विवक्षतः पृथक् दृशः तत् कृत रूप नामभिः न कुत्रचित् क्वापि च दुःस्थिता मतिः लभेत वात आहतः नौः इव आस्पदम् ॥ १४ ॥

ततः	उस (भगवतलीला)से	दुःस्थिता	भटकती हुई
अन्यथा	पृथक	मतिः	(उसकी) बुद्धि
यत्	जो	कुत्रचित्	कहीं भी
किंचन	कुछ भी	क्वापि	कभी
विवक्षतः	बोलना चाहता है	च	भी
पृथक्	(भगवानसे) अलग	वात	वायु (अन्धड़) से
दृशः	दृष्टिवाला (हो जाता) है	आहतः	मारी गयी
		नौः	नौकाके
तत्	उस (पृथक दृष्टि)	इव	समान
कृत	बनाये	आस्पदं	स्थिर होनेका आधार
रूप	रूपों	न	नहीं
नामभिः	नामोंमें	लभेत	प्राप्त कर पाती ।१४।

जुगुप्सितं धर्मकृतेऽनुशासतः
स्वभावरक्तस्य महान् व्यतिक्रमः ।
यद्वाक्यतो धर्म इतीतरः स्थितो
न मन्यते तस्य निवारणं जनः ॥१५॥

जुगुप्सितं धर्मकृते अनुशासनः स्वभाव-रक्तस्य महान् व्यतिक्रमः यत् वाक्यतः धर्म इति इतरः स्थितः न मन्यते तस्य निवारणं जनः ॥ १५ ॥

स्वभाव-रक्तस्य	स्वभावसे ही आसक्तोंके लिए	जुगुप्सितं	निन्दित कर्मोंका
		धर्मकृते	धर्मके लिए

अनुशासतः	एक सीमामें आज्ञा देनेसे	**इति**	ऐसा ही है (मानकर)
महान्	बहुत बड़ा	**इतरः**	अधर्ममें
व्यतिक्रमः	उलट-पुलट हुआ है।	**स्थितः**	स्थित
यत्	क्योंकि	**जनः**	लोग
वाक्यतः	(आपकी उस) आज्ञाको ही	**तस्य**	उसका
		निवारणं	मना करना
धर्म	धर्म	**न**	नहीं
		मन्यते	मानते ॥१५॥*

विचक्षणोऽस्यार्हति वेदितुं विभो-
रनन्तपारस्य निवृत्तितः सुखम् ।
प्रवर्तमानस्य गुणैरनात्मन-
स्ततो भवान्दर्शय चेष्टितं विभोः ॥१६॥

विचक्षणः अस्य अर्हति वेदितुं विभोः अनन्त पारस्य निवृत्तितः सुखं प्रवर्तमानस्य गुणैः अनात्मनः ततः भवान् दर्शय चेष्टितं विभोः ॥ १६ ॥

विचक्षणः	विशेष विचारवान्	**वेदितुं**	जाननेमें
निवृत्तितः	(संसारसे) विरक्त होनेके कारण	**अर्हति**	समर्थ होता है।
		ततः	इसलिए
अस्य	इन	**गुणैः**	(सत्त्वादि) गुणोंके द्वारा
अनन्त पारस्य	अनन्तअपार		
विभोः	सर्वव्यापक (परमात्मा) के	**अनात्मनः**	अनात्मा (जड़ जगत) में
सुखं	आनन्दको		

---

* आपने तो मांसाहारादिको रोकनेके लिए अमुक विधिसे ही उसको करनेकी आज्ञा दी; किन्तु लोगोंने उस आज्ञाको ही धर्म मान लिया और उसके निवारण 'अहिंसा परमोधर्मः' आदिको नहीं मानते। यह धर्ममें महान् व्यतिक्रम होगया।

प्रवर्तमानस्य	प्रवृत्तिमें लगे लोगोंके लिए	चेष्टितं	लीलाओंका
		दर्शय	दर्शन कराइये (वर्णन कीजिये)।१६।
विभोः	भगवानकी		

त्यक्त्वा स्वधर्मं चरणाम्बुजं हरे-
र्भजन्नपक्वोऽथ पतेत्ततो यदि ।
यत्र क्व वाभद्रमभूदमुष्य किं
को वार्थ आप्तोऽभजतां स्वधर्मतः ॥१७॥

त्यक्त्वा स्वधर्मं चरणाम्बुजं हरेः भजन् अपक्वः अथ पतेत् ततः यदि यत्र क्व वा अभद्रं अभूत् अमुष्य किं क्वः वा अर्थ आप्तः अभजतां स्वधर्मतः ॥ १७ ॥

स्व	अपने (वर्णाश्रम विहित)	क्व	कहीं
		वा	होवे
धर्मं	धर्मको	अमुष्य	उसका
त्यक्त्वा	छोड़कर	किं	क्या
हरेः	श्रीहरिके	अभद्रं	अमंगल
चरणाम्बुजं	चरण-कमलोंका	अभूत	हुआ (या हो सकता है) ?
भजन्	भजन करते हुए		
अपक्वः	दृढ़निष्ठा रहित	स्वधर्मतः	अपने धर्मपूर्वक रहते
अथ	कहीं		
यदि	यदि	अभजतां	भजन न करने वालोंको
ततः	उस (भजन) से		
पतेत्	गिर जाय (भजन छोड़ दे)	कः वा	कौनसा
		अर्थ	पुरुषार्थ
यत्र	चाहे जहाँ	आप्तः	प्राप्त हुआ है ? ।१७।

तस्यैव हेतोः प्रयतेत कोविदो न लभ्यते यद्भ्रमतामुपर्यधः ।
तल्लभ्यते दुःखवदन्यतः सुखं कालेन सर्वत्र गभीररंहसा ॥१८॥

तस्य एव हेतोः प्रयतेत कोविदः न लभ्यते यत् भ्रमतां उपरि अधः तत् लभ्यते दुःखवत् अन्यतः सुखं कालेन सर्वत्र गभीर रंहसा ॥ १८ ॥

कोविदः	चतुरव्यक्ति	तत्	वह
तस्य	उसके	सुखं	(सांसारिक) सुख
एव	ही	दुःखवत्	दु खकी भाँति
हेतोः	लिए	सर्वत्र	सब कहीं (सब
प्रयतेत	पूरा प्रयत्न करे		योनियोंमें)
यत्	जो	गभीर	गंभीर
उपरि	ऊपर (स्वर्गादि)	रंहसा	वेगवाले
अधः	(नरकादि) नीचे	कालेन	कालके द्वारा
भ्रमतां	भटकते (जन्म लेते)		(समय पाकर)
	रहनेपर भी	अन्यतः	अप्रयास (स्वतः)
न	नहीं	लभ्यते	प्राप्त होता ही
लभ्यते	मिलता		है ॥।८॥

न वै जनो जातु कथंचनाव्रजेन्
मुकुन्दसेव्यन्यवदङ्ग संसृतिम् ।
स्मरन्मुकुन्दाङ्घ्र्युपगूहनं पुनर
विहातुमिच्छेन्न रसग्रहो यतः ॥१९॥

न वै जनः जातु कथंचन आव्रजेत् मुकुन्द सेवा अन्यत् अंग संसृतिं स्मरन् मुकुन्द अंघ्रि उपगूहनं पुनः विहातुं इच्छेत् न रसग्रहः यतः ॥ १९ ॥

अंग	प्रिय व्यासजी !	न आव्रजेत्	पूरी तरह नहीं
मुकुन्द	भगवानकी		पड़ता ।
सेवा	सेवा (करनेवाला)	मुकुन्द	भगवानके
जनः	भक्त	अंघ्रि	श्रीचरणोंके
कथंचन	किसी प्रकार	उपगूहनं	आलिंगनका
जातु	जन्म लेनेपर भी	स्मरन्	स्मरण करके
वै	निश्चय ही	पुनः	फिर
अन्यत्	(दूसरोंके समान)	बिहातुं	(उनको) छोड़नेकी
	दूसरी योनियोंमें	न इच्छेत्	इच्छा नहीं करता
संसृतिं	जन्म-मरणके चक्रमें		

यतः	क्योंकि		चस्का पड़ चुका
रसग्रहः	(उस) रसका		है ॥१९॥

इदं हि विश्वं भगवानिवेतरो यतो जगत्स्थाननिरोधसम्भवाः ।
तद्धि स्वयं वेद भवांस्तथापि वै प्रादेशमात्रं भवतः प्रदर्शितम् ॥२०॥

इदं हि विश्वं भगवान् इव इतरः यतः जगत् स्थान निरोध सम्भवाः तत् हि स्वयं वेद भवान् तथापि वै प्रादेशमात्रं भवतः प्रदर्शितम् ॥ २० ॥

यतः	जिनसे	इतरः	(पर इससे) पृथक
जगत्	संसारकी		भी वे हैं ।
स्थान	स्थिति	तत्	इसको
निरोध	प्रलय	हि	क्योंकि
सम्भवाः	उत्पत्ति होती है	भवान्	आप
हि	निश्चय ही	स्वयं	स्वयं
इदं	यह	वेद	जानते हैं
विश्वं	विश्व	तथापि	फिर भी
भगवान्	भगवान्‌की	वै	निश्चय ही
इव	ही भाँति हैं (भगवान ही हैं) ।	भवतः	आपके लिए
		प्रादेशमात्रं	संकेतमात्र
		प्रदर्शितम्	दिखलाया है ॥२०॥

त्वमात्मनाऽऽत्मानमवेह्यमोघदृक्
परस्य पुंसः परमात्मनः कलाम् ।
अजं प्रजातं जगतः शिवाय तन्
महानुभावाभ्युदयोऽधिगण्यताम् ॥२१॥

त्वं आत्मना आत्मानं अवेहि अमोघ दृक् परस्य पुंसः परमात्मनः कलां अजं प्रजातं जगतः शिवाय तत् महानुभावः अभ्युदयः अधिगण्यताम् ।२१।

त्वं	आप	दृक्	दृष्टिवाले हैं (अतः)
अमोघ	अव्यर्थ	आत्मानं	अपने आपको

आत्मना	अपने द्वारा ही
अवेहि	जानिये (कि आप स्वयं)
परस्य	परम
पुंसः	पुरुषकी
परमात्मनः	परमात्माकी
कलां	कला हैं
अजं	अजन्मा (होनेपर भी)
जगतः	संसारके
शिवाय	कल्याणके लिए
प्रजातं	अवतीर्ण हुए हैं
तत्	इसलिए
महानुभावः	महान् प्रभाववाले भगवान्‌की
अभ्युदयः	उत्कर्ष (लीलाओं) का
अधिगण्यताम्	भली प्रकार वर्णन कीजिये ॥२१॥

इदं हि पुंसस्तपसः श्रुतस्य वा
स्विष्टस्य सूक्तस्य च बुद्धिदत्तयोः ।
अविच्युतोऽर्थः कविभिर्निरूपितो
यदुत्तमश्लोकगुणानुवर्णनम् ॥२२॥

इदं हि पुंसः तपसः श्रुतस्य वा सु इष्टस्य सूक्तस्य च बुद्धिदत्तयोः अविच्युतः अर्थः कविभिः निरूपितः यत् उत्तमश्लोक गुणान् अनुवर्णनम् ॥२२॥

पुंसः	मनुष्योंकी
तपसः	तपस्या,
श्रुतस्य	वेदाध्ययन,
वा	और
सु इष्टस्ट	उत्तम यज्ञानुष्ठान
सूक्तस्य	स्वाध्याय,
बुद्धि	ज्ञान,
च	और
दत्तयोः	दानका
अविच्युतः	अविचल
अर्थः	प्रयोजन
इदं	यह
हि	ही (है) ।
कविभिः	बुद्धिमानों द्वारा (इसीका)
निरूपितः	निरूपण किया गया है
यत्	कि
उत्तमश्लोक	उत्तम यशवाले (भगवान) के
गुणान्	गुणोंका
अनुवर्णनम्	बार बार वर्णन किया जाय ॥२२॥

अहं पुरातीतभवेऽभवं मुने
दास्यास्तु कस्याश्चन वेदवादिनाम् ।
निरूपितो बालक एव योगिनां
शुश्रूषणे प्रावृषि निर्विविक्षताम् ॥२३॥

अहं पुरा अतीत भवे अभवं मुने दास्यास्तु कस्याश्चन वेदवादिनां निरूपितः बालकः एव योगिनां शुश्रूषणे प्रावृषि निर्विविक्षताम् ॥ २३ ॥

मुने	मुनि व्यासजी !
अहं	मैं
पुरा	पहिले
अतीत	बीते हुए
भवे	जन्ममें
कस्याश्चन	किसी
वेदवादिनां	वेदवादीकी
दास्यास्तु	दासीमें
अभवं	उत्पन्न हुआ था ।
बालकः	बालक (अवस्थामें)
एव	ही
प्रावृषि	वर्षा ऋतुमें
निर्विविक्षतां	(चातुर्मास्य) निवास करनेवाले
योगिनां	योगियोंकी
शुश्रूषणे	सेवामें
निरूपितः	नियुक्त किया गया था ॥२३॥

ते मय्यपेताखिलचापलेऽर्भके दान्तेऽधृतक्रीडनकेऽनुवर्तिनि ।
चक्रुः कृपां यद्यपि तुल्यदर्शनाः शुश्रूषमाणे मुनयोऽल्पभाषिणि ॥२४॥

ते मयि अपेते अखिल चापले अर्भके दान्ते अधृतः क्रीडनके अनुवर्तिनि चक्रुः कृपां यद्यपि तुल्य दर्शनाः शुश्रूषमाणेः मुनयः अल्पभाषिणि ॥ २४ ॥

अर्भके	छोटे बालक(होनेपर भी)
अखिल	सब
चापले	चपलताओंको
अपेते	छोड़े हुए,
दान्ते	इन्द्रियोंको वशमें रखनेवाले,
क्रीडनके	खिलौनोंको
अधृतः	न लेनेवाले,
अनुवर्तिनि	आज्ञापालक,
शुश्रूषमाणे	सेवापरायण,
अल्पभाषिणि	कम बोलनेवाले
मयि	मुझपर
ते	उन
मुनयः	मुनियोंने
यद्यपि	यद्यपि
तुल्यदर्शनाः	समदर्शी थे (फिर भी)
कृपां	कृपा
चक्रुः	की ॥२४॥

उच्छिष्टलेपाननुमोदितो द्विजैः
सकृत्स्म भुञ्जे तदपास्तकिल्बिषः ।
एवं प्रवृत्तस्य विशुद्धचेतस-
स्तद्धर्म एवात्मरुचिः प्रजायते ॥२५॥

उच्छिष्ट लेपान् अनुमोदितः द्विजैः सकृत् स्म भुञ्जे तत् अपास्त किल्बिषः एवं प्रवृत्तस्य विशुद्ध चेतसः तत् धर्म एव आत्म रुचिः प्रजायते ॥ २५ ॥

द्विजैः	उन ब्राह्मणोंसे	अपास्त	मिट गये ।
अनुमोदितः	अनुमति पाकर*	एवं	इस प्रकार
उच्छिष्ट	जूठा,	प्रवृत्तस्य	व्यवहार करते हुए
लेपान्	(बर्तनोंमें) लगा हुआ लेप	विशुद्ध तेजसः	अत्यन्त शुद्ध चित्तवाले
सकृत्	एक बार	आत्म	मेरी अपनी
स्म	ही	रुचिः	रुचि
भुञ्जे	खा लेता था ।	तत्	उन (योगियों) के
तत्	उससे	धर्म एव	धर्ममें ही
किल्बिषः	पाप	प्रजायते	उत्पन्न हो गयी ।२५।

तत्रान्वहं कृष्णकथाः प्रगायताम्
अनुग्रहेणाशृणवं मनोहराः ।
ताः श्रद्धया मेऽनुपदं विशृण्वतः
प्रियश्रवस्यङ्ग ममाभवद्रुचिः ॥२६॥

तत्र अन्वहं कृष्णकथाः प्रगायतां अनुग्रहेण अशृणवं मनोहराः ताः श्रद्धया मे अनुपदं विशृण्वतः प्रियश्रवस्य अङ्ग मम अभवत् रुचिः ॥ २६ ॥

अङ्ग	प्रिय (व्यासजी) !	अन्वहं	प्रतिदिन
तत्र	वहाँ	मनोहराः	मनोहर

* क्योंकि स्मृतिमें आज्ञा है कि ब्राह्मण शूद्रको अपना उच्छिष्ट न दे ।

कृष्ण कथाः	श्रीकृष्ण की कथा	श्रद्धया	श्रद्धापूर्वक
प्रगायतां	(उन महात्माओंके द्वारा) भली प्रकार गायन की जाती हुई	मे	मेरे
		विश्रृण्वतः	ध्यानपूर्वक सुनते हुए
		प्रिय श्रवस्य	प्रियकीर्ति (भगवान) में
अनुग्रहेण	(उन महापुरुषोंकी) कृपासे	मम	मेरी
अश्रृणवं	सुनता था।	रुचिः	रुचि
ताः	उस (कथा) का	अभवत्	होगयी ॥२६॥
अनुपदं	एक-एक पद		

तस्मिंस्तदा लब्धरुचेर्महामुने
प्रियश्रवस्यस्खलिता मतिर्मम ।
ययाहमेतत्सदसत्स्वमायया
पश्ये मयि ब्रह्मणि कल्पितं परे ॥२७॥

तस्मिन्ः तदा लब्ध रुचेः महामुने प्रियश्रवस्य अस्खलिता मतिः मम यया अहं एतत् सदसत् स्वमायया पश्ये मयि ब्रह्मणि कल्पितं परे ॥२७॥

महामुने	महामुनि व्यासजी !	यया	जिस (बुद्धि)के द्वारा
तदा	तब	अहं	मैं
तस्मिन्	उन (भगवान) में	स्वमायया	अपनी मायासे
रुचेः	रुचिके	एतत्	यह
लब्धः	प्राप्त होनेपर	सदसत्	सत् असत् (जगत्)
प्रियश्रवस्य	प्रिय कीर्ति (भगवान) के विषयमें	मयि	मुझ
		परे	परम
मम	मेरी	ब्रह्मणि	ब्रह्ममें
मतिः	बुद्धि	कल्पितं	कल्पित
अस्खलिता	निश्चल होगयी,	पश्ये	देखने लगा ॥२७॥

इत्थं शरत्प्रावृषिकावृतू हरे-
र्विश्रृण्वतो मेऽनुसवं यशोऽमलम् ।
संकीर्त्यमानं मुनिभिर्महात्मभिर्
भक्तिः प्रवृत्ताऽऽत्मरजस्तमोपहा ॥२८॥

इत्थं शरत् प्रावृषिकाः ऋतू हरेः विशृण्वतः मे अनुसवं यशः अमलं संकीर्त्यमानं मुनिभिः महात्मभिः भक्तिः प्रवृत्ताः आत्म रजः तमः अपहा ॥२८॥

इत्थं	इस प्रकार	**मे**	मेरे द्वारा
शरत्	शरद	**विशृण्वतः**	बहुत ध्यानपूर्वक (बराबर) श्रवण करनेसे
प्रावृषिकाः	प्रावृट्*		
ऋतू	ऋतुओंमें		
महात्मभिः	महात्मा	**आत्म**	अपने चित्तका
मुनिभिः	मुनियोंके द्वारा	**रजः**	रजोगुण (चंचलता)
अनुसवं	तीनों समय	**तमः**	तमोगुण (लय हो जाना) को
हरेः	श्रीहरिके		
अमलं	निर्मल	**अपहा**	मिटा देनेवाली
यशः	यशका	**भक्तिः**	भक्ति
संकीर्त्यमानं	संकीर्तन किये जानेसे	**प्रवृत्ताः**	सक्रिय हो गयी ।२८।

तस्यैवं मेऽनुरक्तस्य प्रश्रितस्य हतैनसः ।
श्रद्दधानस्य बालस्य दान्तस्यानुचरस्य च ॥२९॥

तस्य एवं मे अनुरक्तस्य प्रश्रितस्य हत एनसः श्रद्दधानस्य बालस्य दान्तस्य अनुचरस्य च ॥ २९ ॥

एवं	इस प्रकार	**श्रद्दधानस्य**	श्रद्धा करनेवाले,
तस्य	उस	**दान्तस्य**	इन्द्रियोंको वशमें रखनेवाले
मे	मुझ		
अनुरक्तस्य	प्रेम (भक्ति) करनेवाले	**च**	और
		अनुचरस्य	आज्ञापालक सेवक
प्रश्रितस्य	विनीतके	**बालस्य**	बालकको ॥२९॥
हत एनसः	निष्पाप हुए,		

* आयुर्वेदके ग्रन्थोंमें ऋतुओंका नाम थोड़ा भिन्न है। उनके अनुसार ज्येष्ठ-आषाढ़ मास वर्षाऋतु और श्रावण-भाद्र प्रावृट् ऋतुके हैं। चातुर्मास प्रावृट् (आषाढ़ शु० ११) से प्रारम्भ होता है।

ज्ञानं गुह्यतमं यत्तत्साक्षाद्भगवतोदितम् ।
अन्ववोचन् गमिष्यन्तः कृपया दीनवत्सलाः ॥३०॥

ज्ञानं गुह्यतमं यत् तत् साक्षात् भागवता उदितं अन्वोचन् गमिष्यन्तः कृपया दीनवत्सलाः ॥ ३० ॥

यत्	जो	दीनवत्सलाः	दीनोंपर वात्सल्य रखनेवाले (उन मुनियोंने)
साक्षात्	स्वयं		
भगवता	भगवानके द्वारा		
उदितं	प्रकट हुआ (उपदिष्ट)	गमिष्यन्तः	जानेके समय
गुह्यतमं	अत्यन्त रहस्यात्मक	कृपया	कृपापूर्वक
ज्ञानं	ज्ञान है	अन्वोचन्	उपदेश किया ॥३०॥
तत्	वह		

येनैवाहं भगवतो वासुदेवस्य वेधसः ।
मायानुभावमविदं येन गच्छन्ति तत्पदम् ॥३१॥

येन एव अहं भगवतः वासुदेवस्य वेधसः माया अनुभावं अविदं येन गच्छन्ति तत् पदम् ॥ ३१ ॥

येन	जिसके द्वारा	अनुभावं	प्रभावको
एव	ही	अविदं	जान सका
अहं	मैंने	येन	जिसके जाननेपर
वेधसः	सृष्टिकर्ता	तत्	उन (भगवानके)
भगवतः	भगवान्	पदं	पदको
वासुदेवस्य	वासुदेवकी	गच्छन्ति	जाते (पाते) हैं ।३१।
माया	मायाके		

एतत्संसूचितं ब्रह्मंस्तापत्रयचिकित्सितम् ।
यदीश्वरे भगवति कर्म ब्रह्मणि भावितम् ॥३२॥

एतत् संसूचितं ब्रह्मन् तापत्रय चिकित्सितं यत् ईश्वरे भगवति कर्म ब्रह्मणि भावितम् ॥ ३२ ॥

ब्रह्मन्	व्यासजी !	ईश्वरे	सर्व नियन्ता
एतत्	यह	ब्रह्मणि	परमात्मा
तापत्रय	तीनों तापोंकी	भगवति	सर्वेश्वर्ययुक्तमें
चिकित्सितं	चिकित्सा	कर्म	कर्मका
संसूचितं	भली प्रकार (मैंने) सूचित कर दी।	भावितं	भावनासे समर्पण है ॥३२॥
यत्	कि वह		

आमयो यश्च भूतानां जायते येन सुव्रत।
तदेव ह्यामयं द्रव्यं न पुनाति चिकित्सितम् ॥३३॥

आमयः यश्च भूतानां जायते येन सुव्रत तत् एव हि आमयं द्रव्यं न पुनाति चिकित्सितम् ॥ ३३ ॥

सुव्रत	उत्तम व्रतनिष्ठ (व्यासजी) !	एव	ही
भूतानां	प्राणियोंको	आमयं	रोगकारी
येन	जिसके द्वारा (जिस वस्तुके सेवनसे)	द्रव्यं	पदार्थ
यश्च	जो	हि	क्या
आमयः	रोग	चिकित्सितं	चिकित्सामें प्रयुक्त होनेपर*
जायते	उत्पन्न हो जाता है	पुनाति	पवित्र (आरोग्य)
तत्	वह	न	नहीं करता ?॥३३॥

एवं नृणां क्रियायोगाः सर्वे संसृतिहेतवः।
त एवात्मविनाशाय कल्पन्ते कल्पिताः परे ॥३४॥

एवं नृणां क्रियायोगाः सर्वे संसृति हेतवः त एव आत्म विनाशाय कल्पन्ते कल्पिताः परे ॥ ३४ ॥

---

* होम्योपैथीका मूल सिद्धान्त ही है कि जिस पदार्थके सेवनसे जो रोग होते हैं, उसी पदार्थ के द्वारा (उसकी सूक्ष्म मात्रासे) वे रोग दूर हो जाते हैं। इस नियम को यहाँ बतलाया गया है। अतः होम्योपैथी नवीन आविष्कार नहीं है।

एवं	इसी प्रकार	परे	परमात्मामें
सर्वे	सब	कल्पिताः	भावित (समर्पित) करनेपर
क्रियायोगाः	क्रियायोग		
नृणां	मनुष्योंके	आत्म	अपने (कर्म परम्पराके ही)
संसृति	जन्म-मरणके		
हेतवः	कारण हैं ।	विनाशाय	नष्ट करनेके
त	वे	कल्पन्ते	कारण बन जाते हैं ॥३४॥
एव	ही		

यदत्र क्रियते कर्म भगवत्परितोषणम् ।
ज्ञानं यत्तदधीनं हि भक्तियोगसमन्वितम् ॥३५॥

यत् अत्र क्रियते कर्म भगवत् परितोषणं ज्ञानं यत् तत् अधीनं हि भक्तियोगः समन्वितम् ॥ ३५ ॥

हि	क्योंकि	अधीनं	आधीन (उसके द्वारा ही)
अत्र	इस लोकमें		
यत्	जो	यत्	जो
कर्म	कर्म	भक्तियोगः	भक्तियोगसे
भगवत्	भगवान्‌को	समन्वितं	समन्वित
परितोषणं	सन्तुष्ट करनेके लिए	ज्ञानं	ज्ञान है (वह है) ॥३५॥
क्रियते	किया जाता है		
तत्	उसके		

कुर्वाणा यत्र कर्माणि भगवच्छिक्षयासकृत् ।
गृणन्ति गुणनामानि कृष्णस्यानुस्मरन्ति च ॥३६॥

कुर्वाणाः यत्र कर्माणि भगवत् इच्छया असकृत् गृणन्ति गुण नामानि कृष्णस्य अनुस्मरन्ति च ॥ ३६ ॥

यत्र	जिस (भगवदर्थ कर्मके मार्गमें)	असकृत्	बराबर
		कर्माणि	कर्मोंको
भगवत	भगवानकी	कुर्वाणाः	करते हुए (लोग)
इच्छया	इच्छानुसार	कृष्णस्य	श्रीकृष्णके

गुण	गुणोंको	च	और
नामानि	(और) नामोंको	अनुस्मरन्ति	बराबर स्मरण
गृणन्ति	गाते हैं		करते हैं ॥३६॥

नमो भगवते तुभ्यं वासुदेवाय धीमहि ।
प्रद्युम्नायानिरुद्धाय नमः सङ्कर्षणाय च ॥३७॥

नमः भगवते तुभ्यं वासुदेवाय धीमहि प्रद्युम्नाय अनिरुद्धाय नमः सङ्कर्षणाय च ॥ ३७ ॥

तुभ्यं	आप	प्रद्युम्नाय	प्रद्युम्नको,
भगवते	भगवान्	अनिरुद्धाय	अनिरुद्धको
वासुदेवाय	वासुदेवको	च	और
नमः	नमस्कार है ।	सङ्कर्षणाय	सङ्कर्षण (बलराम)
धीमहि	(आपका हम)		जी को
	ध्यान करते हैं ।	नमः	नमस्कार है ॥३७॥

इति मूर्त्यभिधानेन मन्त्रमूर्तिममूर्तिकम् ।
यजते यज्ञपुरुषं स सम्यग्दर्शनः पुमान् ॥३८॥

इति मूर्ति अभिधानेन मन्त्रमूर्ति अमूर्तिकं यजते यज्ञपुरुषं स सम्यक् दर्शनः पुमान् ॥ ३८ ॥

इति	इस प्रकार (जो)	यजते	यजन करता है
मूर्ति	(चतुर्व्यूहात्मक)	स	वह
	मूर्तियोंके	पुमान्	पुरुष
अधिधानेन	नामोंसे	सम्यक्	ठीक
अमूर्तिकं	निराकार	दर्शनः	देखने (जानने)
मन्त्रमूर्ति	मन्त्रस्वरूप		वाला है ॥३८॥
यज्ञपुरुषं	यज्ञ पुरुषका		

इमं स्वनिगमं ब्रह्मन्नवेत्य मदनुष्ठितम् ।
अदान्मे ज्ञानमैश्वर्यं स्वस्मिन् भावं च केशवः ॥३९॥

इमं स्व निगमं ब्रह्मन् अवेत्य मत् अनुष्ठितं अदात् मे ज्ञानं ऐश्वर्यं स्वस्मिन् भावं च केशवः ॥ ३९ ॥

ब्रह्मन्	व्यासजी !	केशवः	भगवान् केशवने
इमं	इस	मे	मुझे
स्व	अपने द्वारा	ज्ञानं	ज्ञान,
निगमं	उपदिष्टका	ऐश्वर्यं	ऐश्वर्य
मत्	मेरे द्वारा	च	और
अनुष्ठितं	अनुष्ठान किया गया है,	स्वस्मिन्	अपनेमें
		भावं	भक्ति
अवेत्य	(ऐसा) जानकर	अदात्	प्रदान की ॥३९॥

त्वमप्यदभ्रश्रुत विश्रुतं विभोः
समाप्यते येन विदां बुभुत्सितम् ।
आख्याहि दुःखैर्मुहुरर्दितात्मनां
संक्लेशनिर्वाणमुशन्ति नान्यथा ॥४०॥

त्वं अपि अदभ्र श्रुत विश्रुतं विभोः समाप्यते येन विदां बुभुत्सितं आख्याहि दुःखैः मुहुः अर्दित आत्मनां संक्लेश निर्वाणं उशन्ति न अन्यथा ॥४०॥

त्वं	आप	समाप्यते	परितुष्ट होती है ।
अपि	भी	दुःखैः	दुःखोंसे
अदभ्र	परिपूर्ण	मुहुः	बार बार
श्रुतः	ज्ञानवाले हैं	अर्दित	रौंदे
स वा अयं सखि अनुगीतः सत्कथः वेदेषु गुह्येषु च गुह्यवादिभिः य एकः ईशः जगत् आत्मलीलया सृजति अवति अत्ति न तत्र सज्जते ॥२४॥

वेदेषु	वेदोंमें	**य**	जो
गुह्येषु	गोपनीय भागोंमें	**एकः**	अकेले ही
गुह्यवादिषु	गोपनीय बतलाने वालों द्वारा	**आत्मलीलया**	अपनी लीलासे
अनुगीतः	बार-बार गायी गयी (जिनकी)	**जगत्**	संसारकी
		सृजति	सृष्टि करते हैं
		अवति	पालन करते हैं
सत्कथः	पवित्र कथा है	**अत्ति**	लीन कर लेते हैं
सखिः	सखि	**तत्र**	इस (सृष्टि आदिमें)
स वा	निश्चय वे	**सज्जते**	आसक्त होते
अयं	यही हैं	**न**	नहीं ॥२४॥

यदा ह्यधर्मेण तमोधियो नृपा
जीवन्ति तत्रैष हि सत्त्वतः किल ।
धत्ते भगं सत्यमृतं दयां यशो
भवाय रूपाणि दधद्युगे युगे ॥२५॥

यदा हि अधर्मेण तमोधियाः नृपाः जीवन्ति तत्र एष हि सत्त्वतः किल धत्ते भग सत्यं ऋतं दयां यशः भवाय रूपाणि दधत् युगे युगे ॥ २५ ॥

हि	क्योंकि	**युगे युगे**	प्रत्येक युगमें
यदा	जब	**हि**	निश्चित
तमोधियाः	तामसी बुद्धिवाले	**रूपाणि**	रूपों (अवतार) को
नृपाः	राजा लोग	**दधत्**	धारण करके
अधर्मेण	अधर्मपूर्वक	**भगं**	ऐश्वर्यको
जीवन्ति	जीवन चलाते हैं	**सत्यं**	सत्यको
तत्र	तब	**ऋतं**	ऋतको
किल	निश्चय	**दयां**	दयाको (और)
एष	यही	**यशः**	यशको
सत्त्वतः	सत्त्व गुणका आश्रय लेकर	**धत्ते**	धारण करते (बचाते) हैं ॥२५॥
भवाय	(जगत्के) कल्याणके लिए		

अहो अलं श्लाघ्यतमं यदोः कुल-
महो अलं पुण्यतमं मधोर्वनम् ।
यदेष पुंसामृषभः श्रियः पतिः
स्वजन्मना चङ्क्रमणेन चाञ्चति ॥२६॥

अहो अलं श्लाध्यतमं यदोः कुलं अहो अलं पुण्यतमं मधोः वनं यत् एष पुंसां ऋषभः श्रियः पतिः स्वजन्मना चङ्क्रमेण च अञ्चति ॥ २६ ॥

अहो	अहो	**पुंसां ऋषभः**	पुरुष शिरोमणि
यदोःकुलं	यदुकुल	**श्रियः पतिः**	श्रीपति
श्लाघ्यतमं	परमप्रशंसनीय है	**स्वजन्मना**	अपने अवतारसे
अहो	अहो	**च**	और
मधोर्वनं	मथुरा	**चङ्क्रमेणेन**	घूम फिरकर
पुण्यतमं	पवित्रतम है	**अञ्चति**	(इन्हें) शोभित करते हैं ॥२६॥
यत्	क्योंकि		
एष	ये		

अहो बत स्वर्यशसस्तिरस्करी
कुशस्थली पुण्ययशस्करी भुवः ।
पश्यन्ति नित्यं यदनुग्रहेषितं
स्मितावलोकं स्वपतिं स्म यत्प्रजाः ॥२७॥

अहो बत स्वः यशसः तिरस्करीः कुशस्थलीः पुण्य यशस्करीः भुवः पश्यन्ति नित्यं यत् अनुग्रह ईषितं स्मित अवलोकं स्वपतिं स्म यत् प्रजाः॥२७॥

अहो	अहो	यत्	जिसकी
बत	निश्चय	प्रजाः	प्रजा
स्वः	स्वर्गके	नित्यं	नित्य
यशसः	सुयशका	अनुग्रह	अनुग्रहपूर्वक
तिरस्करीः	तिरस्कार करनेवाली (और)	ईषितं	चेष्टा करते
		स्मित	मन्द मुस्करान भरी
भुवः	पृथ्वीके	अवलोकं	दृष्टिसे देखते
पुण्य	पवित्र	स्वपन्ति	अपने (इन) स्वामीको
यशस्करीः	यश देनेवाली		
कुशस्थलीः	द्वारिका है	पश्यन्ति	देखती है ॥२७॥
यत्	क्योंकि		

नूनं व्रतस्नानहुतादिनेश्वरः
सम्मर्चितो ह्यस्य गृहीतपाणिभिः ।
पिबन्ति याः सख्यधरामृतं मुहु-
र्व्रजस्त्रियः सम्मुमुहुर्यदाशयाः ॥२८॥

नूनं व्रत स्नान हुता दिनेश्वरः सम्मर्चितः हि यस्य गृहीत पाणिभिः पिबन्ति यः सखि अधरामृतं मुहुः व्रजस्त्रियः सम्मुमुहुः यत् आशयाः ॥ २८॥

सखि	सखि !	दिनेश्वरः	सूर्य भगवानका (अथवा अपने जीवनके इन स्वामीका)
नूनं	निश्चय ही		
व्रत	व्रत		
स्नान	(तीर्थ) स्नान		
हुत	यज्ञोंके द्वारा		

सर्माचितः	भली प्रकार पूजन किया होगा (उन्होंने)	**यत्**	जिसकी
		आशयाः	चाहसे
यस्य	जिनका	**सम्मुमुहुः**	सम्मोहित होती रहीं
गृहीत पाणिभिः	(इन्होंने) पाणिग्रहण किया	**याः**	वे
		मुहुः	बार-बार (उस)
हि	क्योंकि	**अधरामृतं**	अधरामृतको
व्रजस्त्रियः	गोपियां	**पिबन्ति**	पीती हैं ॥२८॥

या वीर्यशुल्केन हृताः स्वयंवरे
प्रमथ्य चैद्यप्रमुखान् हि शुष्मिणः ।
प्रद्युम्नसाम्बाम्बसुतादयोऽपरा
याश्चाहृता भौमवधे सहस्रशः ॥२९॥

या वीर्यशुल्केन हृताः स्वयंवरे प्रमथ्य चैद्य प्रमुखान् हि शुष्मिणः प्रद्युम्नः साम्बः आम्बः सुतआदयः अपराः याः च आहृताः भौमवधे सहस्रशः ॥ २९ ॥

या	जो	**प्रद्युम्नः**	प्रद्युम्न
वीर्यशुल्केन	पराक्रमका मूल्य देकर	**साम्बः**	साम्ब
		आम्बः	आम्ब
चैद्य प्रमुखान्	शिशुपाल जिनमें मुख्य था उन	**आदयः**	आदि हैं
		च	और
शुष्मिणः	मतवाले राजाओंको	**याः**	जो
प्रमथ्य	मथ (पराजित) करके	**अपराः**	दूसरी
		सहस्रशः	हजारों
स्वयंवरे	स्वयंवरमें	**भौमवधे**	नरकासुरको मारनेपर
हृताः	हरण कर लाये		
हि	जिनके	**आहृताः**	ले आये ॥२९॥
सुतः	पुत्र		

एताः परं स्त्रीत्वमपास्तपेशलं
निरस्तशौचं बत साधु कुर्वते ।
यासां गृहात्पुष्करलोचनः पति-
र्नजात्वपैत्याहृतिभिर्हृदि स्पृशन् ॥३०॥

एताः परं स्त्रीत्वं अपास्त पेशलं निरस्त शौचं बत साधु कुर्वते यासां गृहात् पुष्करलोचनः पतिः न जातु अपैति आहृतिभिः हृदिस्पृशन् ॥३०॥

पेशलं	स्वतन्त्रता	गृहात्	घरोंसे
अपास्त	रहित	पुष्कर लोचनः	(ये) कमललोचन
शौचं	पवित्रता	पतिः	पति
निरस्तं	रहित	जातु	कभी
स्त्रीत्वं	स्त्री जीवनको	न	नहीं
बत	निश्चय	अपैति	जाते
साधु	उत्तम	आहृतिभिः	उपहारों द्वारा
कुर्वते	कर देनेवाली	हृदि	हृदयको
एताः	ये सब	स्पृशन्	स्पर्श करते रहते
परं	श्रेष्ठतम हैं		हैं ॥३०॥
यासां	जिनके		

*सूत उवाच**–

एवंविधा गदन्तीनां स गिरः पुरयोषिताम् ।
निरीक्षणेनाभिनन्दन् सस्मितेन ययौ हरिः ॥३१॥

एवं विधा गदन्तीनां स गिरः पुरयोषितां निरीक्षणेन अभिनन्दन् सस्मितेन ययौ हरि ॥ ३१ ॥

एवं	इस	गदन्तीनां	कही हुई
विधा	प्रकार	स	उस
पुरयोषितां	नगरकी स्त्रियोंकी	गिरः	वाणीका

* यह उवाच अन्य प्रतियोंमें नहीं है ।

सस्मितेन	मुस्कराहट युक्त	**हरिः**	श्रीकृष्ण
निरीक्षणेन	दृष्टिपातसे	**ययौ**	गये ॥३१॥
अभिनन्दन	अभिनन्दन करते		

अजातशत्रुः पृतनां गोपीथाय मधुद्विषः ।
परेभ्यः शङ्कितः स्नेहात्प्रायुङ्क्त चतुरङ्गिणीम् ॥३२॥

अजातशत्रुः पृतनां गोपीथाय मधुद्विषः परेभ्यः शङ्कितः स्नेहात् प्रायुङ्क्त चतुरङ्गिणीम् ॥ ३ ॥

अजातशत्रुः	युधिष्ठिरने	**चतुरङ्गिणीं**	(चार अंग–पैदल,
स्नेहात्	स्नेहवश		घुड़सवार, हाथी
परेभ्यः	शत्रुओंकी ओरसे		और रथवाली)
शङ्कितः	शङ्कित होकर		चतुरंगिणी
मधुद्विषः	मधुसूदनकी	**पृतनां**	सेना
गोपीथाय	सुरक्षाके लिए	**प्रायुङ्क्त**	नियुक्त किया ॥३२॥

अथ दूरागतान् शौरिः कौरवान् विरहातुरान् ।
संनिवर्त्य दृढं स्निग्धान् प्रायात्स्वनगरीं प्रियैः ॥३३॥

अथ दूर आगतान् शौरिः कौरवान् विरह आतुरान् संनिवर्त्य दृढं स्निग्धान् प्रायात् स्वनगरीं प्रियैः ॥ ३३ ॥

अथ	तदनन्तर	**शौरिः**	श्रीकृष्णने
दृढं	दृढ	**संनिवर्त्य**	लौटाकर
स्निग्धान्	स्नेह रखनेवाले	**प्रियैः**	(उद्धव, सात्यकि
विरह	वियोगसे		आदि) प्रियजनोंके
आतुरान्	व्याकुल		साथ
दूर	दूरतक	**स्वनगरीं**	अपने नगर
आगतान्	आये		(द्वारिका) को
कौरवान्	कुरुवंशी लोगोंको	**प्रायात्**	चले ॥३३॥

कुरुजाङ्गलपाञ्चालान् शूरसेनान् सयामुनान् ।
ब्रह्मावर्तं कुरुक्षेत्रं मत्स्यान् सारस्वतानथ ॥३४॥

कुरु जाङ्गल पञ्चालान् शूरसेनान् सयामुनान् ब्रह्मावर्तं कुरुक्षेत्रं मत्स्यान् सारस्वतान् अथ ॥ ३४ ॥

मरुधन्वमतिक्रम्य सौवीराभीरयोः परान् ।
आनर्तान् भार्गवोपागाच्छ्रान्तवाहो मनाग्विभुः ॥३५॥

मरु धन्वं अतिक्रम्य सौवीर आभीरयोः परान् आनर्तात् भार्गव उपागच्छत् श्रान्तः वाहः मनाक् विभुः ॥ ३५ ॥

मरुधन्वं	मरुधन्व	विभुः	समर्थ श्रीकृष्ण
सौवीर	सौवीर	आनर्तान्	आनर्त प्रदेशके
आभीरयोः	आभीर आदि	उपागच्छत्	समीप पहुँच गये
परान्	दूसरे प्रदेशोंको	वाहः	वाहन (घोड़े)
अतिक्रम्य	पार करके	मनाक्	थोड़े
भार्गव	शौनकजी !	श्रान्तः	थक गये थे ॥३५॥

तत्र तत्र ह तत्रत्यैर्हरिः प्रत्युद्यतार्हणः ।
सायं भेजे दिशं पश्चाद्गविष्ठो गां गतस्तदा ॥३६॥

तत्र तत्र ह तत्रत्यैः हरिः प्रति उद्यत अर्हणः सायं भेजे दिशं पश्चात् गविष्ठः गां गतः तदा ॥ ३६ ॥

तत्र तत्र	स्थान स्थानपर	गां	पृथ्वीपर
ह	बार बार	गतः	उतरकर
तत्रत्यैः	वहाँ रहनेवालों द्वारा	तदा	तब
हरिः	श्रीकृष्णके	पश्चात्	पश्चिम
प्रति	प्रति	दिशं	दिशाकी ओर (मुख करके)
अर्हणः	पूजा (उपहार)	गविष्ठः	सूर्याराधन (सन्ध्या) किया ॥३६॥
उद्यतः	उपस्थित किया गया		
सायं	सन्ध्याकाल		
भेजे	होनेपर		

इति श्रीमद्भागवते महापुराणे वैयासिक्यां अष्टादशसाहस्र्यां पारमहंस्यां संहितायां प्रथमस्कन्धे दशमोऽध्यायः

अथ एकादशोऽध्यायः

सूत उवाच-

आनर्तान् स उपव्रज्य स्वृद्धाञ्जनपदान् स्वकान् ।
दध्मौ दरवरं तेषां विषादं शमयन्निव ॥१॥

आनर्तान् स उपव्रज्य स्वृद्धान् जनपदान् स्वकान् दध्मौ दरवरं तेषां विषादं शमयन् इव ॥ १ ॥

स	उन श्रीकृष्णने	**विषादं**	(वियोग्य जन्य) विषादको
स्वृद्धान्	समृद्ध	**शमयन्**	शान्त करते हुए
स्वकान्	अपनी (प्रजाकी)	**इव**	से
जनपदान्	बस्तियोंवाले	**दरवरं**	(अपना) श्रेष्ठ शंख
आनत न्	आनर्तमें	**दध्मौ**	बजाया ॥१॥
उपव्रज्य	पहुँचकर		
तेषां	उन (प्रजाजनों) के		

स उच्चकाशे धवलोदरो दरो-
ऽप्युरुक्रमस्याधरशोणशोणिमा ।
दाध्मायमानः करकञ्जसम्पुटे
यथाब्जखण्डे कलहंस उत्स्वनः ॥२॥

स उच्चकाशे धवलोदर दरः अपि उरुक्रमस्य अधरशोण शोणिमा दाध्मायमानः करकञ्ज सम्पुटे यथा अब्जखण्डे कलहंस उत्स्वनः ॥२॥

स	वह	**अधरशोण**	लाल लाल ओष्ठोंकी
धवलोदर	श्वेत पेटवाला	**शोणिमा**	लालीसे
दरः	शंख	**करकञ्ज**	हस्तकमलके
अपि	भी	**सम्पुटे**	सम्पुटमें
उरु क्रमस्य	अनन्त पराक्रम श्रीकृष्णके	**दाध्मायमानः**	बजाया जाता
		उच्चकाशे	अत्यन्त शोभित हुआ

यथा	जैसे	कलहंस	राजहंस
अब्जखण्डे	कमलके ऊपर (बैठा)	उत्स्वनः	कूज रहा हो ॥२॥

तमुपश्रुत्य निनदं जगद्भयभयावहम् ।
प्रत्ययुः प्रजाः सर्वा भर्तृदर्शनलालसाः ॥३॥

तं उपश्रुत्य निनदं जगत् भय भयावहं प्रति उद्ययुः प्रजाः सर्वाः भर्तृ दर्शन लालसाः ॥ ३ ॥

तं	उस	प्रजाः	प्रजा
जगत	जगतके	भर्तृ	स्वामीके
भय	भयको	दर्शन	दर्शनकी
भयावहं	भयभीत करनेवाले	लालसाः	लालसासे
निनदं	शंखनादको	प्रति	उनकी ओर
उपश्रुत्य	सुनकर	उद्ययुः	आने लगी ॥३॥
सर्वाः	सब		

तत्रोपनीतबलयो रवेर्दीपमिवादृताः ।
आत्मारामं पूर्णकामं निजलाभेन नित्यदा ॥४॥

तत्र उपनीतः बलयोः रवेः दीपं इव आदृताः आत्माराम पूर्णकामं निजलाभेन नित्यदा ॥ ४ ॥

तत्र	वहाँ	रवेः	सूर्यके लिए
नित्यदा	सर्वदा	दीपं	दीपदान
निजलाभेन	अपने स्वरूपकी उपलब्धिसे	इव	के समान
		बलयोः	उपहार
पूर्णकामं	पूर्णकाम	उपनीतः	लाकर
आत्मारामं	आत्माराम श्रीकृष्णके लिए	आदृताः	आदर किया ॥४॥

प्रीत्युत्फुल्लमुखाः प्रोचुर्हर्षगद्गदया गिरा ।
पितरं सर्वसुहृदमवितारमिवार्भकाः ॥५॥

प्रीति उत्फुल्ल मुखाः प्रोचुः हर्ष गद्गदया गिरा पितरं सर्व सुहृदं अवितारं इव अर्भकाः ॥ ५ ॥

प्रीति	प्रीतिसे	**सर्व सुहृदं**	सबके सुहृद
उत्फुल्ल	प्रफुल्ल	**अवितारं**	रक्षक श्रीकृष्णसे
मुखाः	मुखवाले (वे प्रजाजन)	**अर्भकाः**	बालक जैसे
		पितरं	पितासे
हर्ष	हर्षसे	**इव**	उस समान
गद्गदया	गद्गद	**प्रोचुः**	बोले ॥५॥
गिरा	वाणीसे		

*पौराः ऊचुः—**

नताः स्म ते नाथ सदाङ्घ्रिपङ्कजं
विरिञ्चवैरिञ्च्यसुरेन्द्रवन्दितम् ।
परायणं क्षेममिहेच्छतां परं
न यत्र कालः प्रभवेत् परः प्रभुः ॥६॥

नताः स्म ते नाथ सदा अङ्घ्रिपंकजं विरञ्चि वैरिञ्चि सुरेन्द्रवन्दितं परायणं क्षेमं इह इच्छतां परं न यत्र कालः प्रभवेत् परं प्रभुः ॥ ६ ॥

नाथ	प्रभो !	**वन्दितं**	(वे) वन्दित हैं।
ते	आपके	**इह**	इस संसारमें
अंघ्रिपङ्कजं	चरणकमलोंको	**परं**	परम
सदा	सदा	**क्षेमं**	कल्याण
नताः स्म	हम नमस्कार करते हैं।	**इच्छतां**	चाहनेवालोंके लिए
		परायणं	आश्रय हैं।
विरञ्चि	ब्रह्माजी	**परं**	परम
वैरिञ्च	शंकर	**प्रभुः**	प्रभु
सुरेन्द्र	इन्द्रसे	**कालः**	काल

* यह उवाच अन्य प्रतियोंमें नहीं है।

यत्र	जहाँ (आपके चरणोंके समीप)	न	समर्थ नहीं होता ॥६॥
प्रभवेत	प्रभाव डालनेमें		

भवाय नस्त्वं भव विश्वभावन
त्वमेव माताथ सुहृत्पतिः पिता ।
त्वं सद्गुरुर्नः परमं च दैवतं
यस्यानुवृत्त्या कृतिनो बभूविम ॥७॥

भवाय नः त्वं भव विश्वभावन त्वं एव माता अथ सुहृत् पतिः पिताः त्वं सद्गुरुः नः परमं च दैवतं यस्य अनुवृत्त्याः कृतिनः बभूव इमः ॥ ७ ॥

विश्वभावन	विश्व रक्षक !	त्वं	आप
नः	हमारे	नः	हमारे
भवाय	अभ्युदयके लिए	सद्गुरुः	सद्गुरु
त्वं	आप	च	तथा
भव	होवें	परमं	परं
त्वं	आप	दैवतं	आराध्यदेव हैं
एव	ही	यस्य	जिनकी
माता	(हमारे) माता	अनुवृत्त्याः	आज्ञापालनसे
अथ	और	इमः	हम सब
सुहृत्	हितैषी	कृतिनः	कृतार्थ
पतिः	स्वामी	बभूव	होते हैं ॥७॥
पिताः	पिता हैं		

अहो सनाथा भवता स्म यद्वयं
त्रैविष्टपानामपि दूरदर्शनम् ।
प्रेमस्मितस्निग्धनिरीक्षणाननं
पश्येम रूपं तव सर्वसौभगम् ॥८॥

अहो सनाथाः भवताः स्म यत् वयं त्रैविष्टपानां अपि दूरदर्शनं प्रेमस्मित स्निग्ध निरीक्षण आननं पश्येम रूपं तव सर्व सौभगम् ॥ ८ ॥

अहो	अहो	तव	आपके
भवताः	आपके द्वारा	प्रेमस्मित	प्रेम भरी मुस्कान (एवं)
सनाथाः	(हम) सनाथ	स्निग्धनिरीक्षणं	स्नेह सहित अवलोकन युक्त
स्म	हैं	आननं	मुखको (तथा)
यत्	क्योंकि	सर्व	समस्त
त्रैविष्टपानां	देवताओंके लिए	सौभगं	सौभाग्यमय
अपि	भी	रूपं	रूपको
दूरदर्शनं	आपका दर्शन दुर्लभ है	पश्येम	देखते हैं ॥८॥
वयं	हम सब		

यर्ह्यम्बुजाक्षापससार भो भवान्
कुरून् मधून् वाथ सुहृद्दिदृक्षया ।
तत्राब्दकोटिप्रतिमः क्षणो भवेद्
रवि विनाक्ष्णोरिव नस्तवाच्युत ॥९॥

यर्हि अम्बुजाक्ष अपससार भो भवान् कुरून् मधून् वा अथ सुहृत् दिदृक्षया तत्र अब्द कोटि प्रतिमः क्षणः भवेत् रवि विनाः अक्ष्णोः इव नः तव अच्युत ॥ ९ ॥

भो	हे	तत्र	वहां
अम्बुजाक्ष	कमललोचन	अपससार	चले जाते हो
यर्हि	जब	अथ	तब
भवान्	आप	अच्युत	अच्युत !
कुरून्	कुरुवंशियों	तव	तुम्हारे
वा	अथवा	विना	विना
मधून्	मधुवंशियो (मथुराके लोगों) को*	नः	हमारे
सुहृत्	सम्बन्धियोंको	क्षणः	प्रत्येक क्षण
दिदृक्षया	देखनेकी इच्छासे	कोटि	करोड़ों
		अब्द	वर्षोंके

* इससे सिद्ध है कि श्रीकृष्ण द्वारिकासे मथुरा भी आते थे

समं	समान	**विनाः**	विना
भवेत्	हो जाते हैं	**अक्ष्णोः**	आँखोंके
रवि	सूर्यके	**इव**	समान ॥९॥

*सूत उवाच**–

इति चोदीरिता वाचः प्रजानां भक्तवत्सलः ।
शृण्वानोऽनुग्रहं दृष्ट्या वितन्वन् प्राविशत्पुरीम् ॥१०॥

इति च उदीरताः वाचः प्रजानां भक्तवत्सलः शृण्वानः अनुग्रहं दृष्ट्या वितन्वन् प्राविशत् पुरीम् ॥ १० ॥

इति च	इस प्रकारकी	**दृष्ट्या**	दृष्टिसे
उदीरताः	कही गयी	**अनुग्रहं**	अनुग्रह
प्रजानां	प्रजाकी	**वितन्वन्**	वितरित करते
वाचः	बात	**पुरीं**	(द्वारिका) पुरीमें
शृण्वानः	सुनते हुए	**प्राविशत्**	प्रविष्ट हुए ॥१०॥
भक्तवत्सलः	भक्त वत्सल		

मधुभोजदशार्हार्हकुकुरान्धकवृष्णिभिः ।
आत्मतुल्यबलैर्गुप्तां नागैर्भोगवतीमिव ॥११॥

मधु भोज दशार्ह अर्ह कुकुर अन्धक वृष्णिभिः आत्मतुल्यैः बलैः गुप्तां नागैः भौगवतीं इव ॥ ११ ॥

नागैः	नागोंसे (रक्षित)	**कुकुर**	कुकुरवंशी
भोगवतीं	भोगवतीपुरी	**अन्धक**	अन्धकवंशी (और)
इव	की भाँति	**वृष्णिभिः**	वृष्णिवंशी
अर्ह	आदरणीय	**आत्मतुल्यैः**	अपने समान
मधु	मधुवंशी	**बलैः**	बलवानोंसे
भोज	भोजवंशी	**गुप्तां**	रक्षित थी ॥११॥
दशार्ह	दशार्हवंशी		

---

* यह उवाच अन्य किसी प्रतिमें नहीं है ।

सर्वर्तुसर्वविभवपुण्यवृक्षलताश्रमैः ।
उद्यानोपवनारामैर्वृतपद्माकरश्रियम् ॥१२॥

सर्व ऋतु सर्व विभव पुण्य वृक्ष लता आश्रमैः उद्यान उपवन आरामैः वृत पद्माकर श्रियम् ॥ १२ ॥

सर्व	सब	**उद्यान**	फलोंके बगीचे
ऋतु	ऋतुओंमें	**उपवन**	पुष्पोंके बड़े वृक्षोंके बगीचों
सर्व	सब		
विभव	वैभवों (से युक्त)	**आरामैः**	फुलवारीसे
पुण्य	पवित्र	**वृत**	घिरी
वृक्ष	वृक्षों	**पद्माकर**	कमलयुक्त (सरोवरों) से
लता	लताओंवाले		
आश्रमैः	आश्रमों	**श्रियं**	सुशोभित ॥१२॥

गोपुरद्वारमार्गेषु कृतकौतुकतोरणाम् ।
चित्रध्वजपताकाग्रैरन्तः प्रतिहतातपाम् ॥१३॥

गोपुर द्वार मार्गेषु कृत कौतुक तोरणां चित्रध्वज पताका अग्रैः प्रतिहत आतपम् ॥ १३ ॥

मार्गेषु	पथोंमें	**चित्रध्वज**	चित्रित ध्वजा (डंडे)
गोपुरद्वार	गोपुर बने द्वारोंपर	**अग्रैः**	(जिनके) ऊपर
कौतुक	शोभाके लिए	**पताका**	झण्डे लगनेसे
कृत	लगाये गये	**अन्तः**	पुरीके भीतर
तोरणां	बन्दनवारवाली (द्वारिका)	**आतपां**	धूप
		प्रतिहत	रुक गयी थी ॥१३॥

सम्मार्जितमहामार्गरथ्यापणकचत्वराम् ।
सिक्तां गन्धजलैरुप्तां फलपुष्पाक्षताङ्कुरैः ॥१४॥

सम्मार्जित महामार्ग रथ्या आपण चत्वरां सिक्तां गन्धजलैः उप्तां फल पुष्प अक्षत अङ्कुरैः ॥ १४ ॥

महामार्ग	राजपथ	सिक्तां	(पथा) सींचे गये थे
रथ्या	गलियाँ	फल	फल
आपण	बाजार	पुष्प	पुष्प
चत्वरां	चबूतरे	अक्षत	अक्षत
सम्मार्जित	स्वच्छ कर दिये गये थे।	अङ्कुरैः	दूर्वाङ्कुर
गन्धजलैः	सुगन्धित जलसे	उप्तां	बिखरे थे ॥१४॥

द्वारि द्वारि गृहाणां च दध्यक्षतफलेक्षुभिः ।
अलंकृतां पूर्णकुम्भैर्बलिभिर्धूपदीपकैः ॥१५॥

द्वारि द्वारि गृहांणा च दधि अक्षत फल इक्षुभिः अलंकृतां पूर्णकुम्भैः वलिभिः धूप दीपकैः ॥ १५ ॥

च	और	दधि	दही
गृहाणां	घरोंके	अक्षत	अक्षत
द्वारि द्वारि	प्रत्येक द्वार	फल	फल
पूर्णकुम्भैः	भरे हुए कलशोंसे (जो)	ईक्षुभिः	गन्ने आदि
		वलिभिः	उपहारोंसे पूजित थे
धूप	धूप	अलंकृतां	सुशोभित थे ॥१६॥
दीपकैः	दीपकोंसे		

निशम्य प्रेष्ठमायान्तं वसुदेवो महामनाः ।
अक्रूरश्चोग्रसेनश्च रामश्चाद्भुतविक्रमः ॥१६॥

निशम्य प्रेष्ठं आयान्तं वसुदेवः महामनाः अक्रूरः च उग्रसेनः च रामः च अद्भुत विकमः ॥ १६ ॥

प्रेष्ठं	अपने प्रिय (श्रीकृष्ण) को	अक्रूरः	अक्रूरजी
		च	तथा
आयान्तं	आते हुए	उग्रसेनः	राजा उग्रसेन
निशम्य	सुनकर	च	एवं
महामनाः	महामना	अद्भुत विक्रमः	अद्भुत पराक्रमी
वसुदेवः	वसुदेवजी	रामः	श्रीबलरामजी॥१६॥
च	और		

प्रद्युम्नश्चारुदेष्णश्च साम्बो जाम्बवतीसुतः ।
प्रहर्षवेगोच्छशितशयनासनभोजनाः ॥१७॥

प्रद्युम्नः चारुदेष्णः च साम्बः जाम्बवती सुतः प्रहर्षवेग उच्छशित शयन आसन भोजनाः ॥ १७ ॥

प्रद्युम्नः	प्रद्युम्न	**शयन**	शय्या
चारुदेष्णः	चारुदेष्ण	**आसन**	आसन
च	और	**भोजनाः**	भोजन
जाम्ववतीसुतः	जाम्बवतीके पुत्र	**उच्छशित**	त्यागकर
साम्बः	साम्ब		झटपट ॥१७॥
प्रहर्षवेगः	अत्यन्त हर्षके वेगसे		

वारणेन्द्रं पुरस्कृत्य ब्राह्मणैः ससुमङ्गलैः ।
शङ्खतूर्यनिनादेन ब्रह्मघोषेण चादृताः ।
प्रत्युज्जग्मू रथैर्हृष्टाः प्रणयागतसाध्वसाः ॥१८॥

वारणेन्द्रं पुरस्कृत्य ब्राह्मणैः ससुमङ्गलैः शङ्खतूर्य निनादेन ब्रह्मघोषेण च आदृताः प्रत्यजग्मुः रथैः हृष्टाः प्रणय आगत साध्वसाः ॥ १८ ॥

वारणेन्द्रं	गजराजको	**प्रणय**	प्रेमके कारण
पुरस्कृत्य	आगे करके	**साध्वसाः**	हड़बड़ी
ससुमंगलैः	मंगल द्रव्योंके साथ	**आगत**	में आये
ब्राह्मणैः	ब्राह्मणों (सहित)	**रथैः**	रथोंपर बैठकर
आदृताः	आदरपूर्वक	**हृष्टाः**	हर्षमें भरे
शङ्ख	शंख	**प्रत्यजग्मुः**	(अगवानी करने)
तूय	तुरही		भगवानको ओर
निनादेन	बजाते हुए		चले ॥१८॥
च	और		
ब्रह्मघोषेण	वेदमन्त्रोंका पाठ करते हुए		

वारमुख्याश्च शतशो यानैस्तद्दर्शनोत्सुकाः ।
लसत्कुण्डलनिर्भातकपोलवदनश्रियः ॥१९॥

वारमुख्याः च शतशः यानैः तत् दर्शनोत्सुकाः लसत् कुण्डल निर्भात कपोल वदन श्रियः ॥ १९ ॥

च	और	तत्	उन (श्रीकृष्ण) के
कुण्डल	कुण्डलोंसे	दर्शनोत्सुकाः	दर्शनोंको उत्सुका
लसत्	सुशोभित	शतशः	सैकड़ों
कपोल	कपोल	वारमुख्याः	वाराङ्गनायें
वदन	मुखकी	यानैः	वाहनोंपर बैठकर (चलीं) ॥१९॥
श्रियः	शोभा		
निर्भातः	से शोभित		

नटनर्तकगन्धर्वाः सूतमागधवन्दिनः ।
गायन्ति चोत्तमश्लोकचरितान्यद्भुतानि च ॥२०॥

नट नर्तक गन्धर्वाः सूत मागधवन्दिनः गायन्ति च उत्तमश्लोक चरितानि अद्भुतानि च ॥ २० ॥

नट	नट	वन्दिनः	वन्दी (यशोगायक)
नर्तक	नर्तक	उत्तमश्लोक	पवित्र कीर्ति (भगवान) के
गन्धर्वाः	गन्धर्व (गायक)	अद्भुतानि	अद्भुत
सूत	सूत (चरित वर्णन करनेवाले)	चरितानि	चरितोंको
मागध	मागध (वंशावली गायक)	च	भी
च	और	गायन्ति	गारहे थे ॥२०॥

भगवांस्तत्र बन्धूनां पौराणामनुवर्तिनाम् ।
यथाविध्युपसंगम्य सर्वेषां मानमादधे ॥२१॥

भगवान् तत्र बन्धूनां पौराणां अनुवर्तिनां यथाविधि उपसंगम्य सर्वेषां मानं आदधे ॥ २१ ॥

तत्र	वहां	बन्धूनां	सम्बन्धिसे
भगवान्	भगवानने	पौराणां	नगरवासियोंसे

अनुवर्तिनां	सेवकोंसे	सर्वेषां	सबका
यथा विधि	विधि (सामाजिक रीति) के अनुसार	मानं	सम्मान
		आदधे	किया ॥२१॥
उपसंगम्य	मिलकर		

प्रह्वाभिवादनाश्लेषकरस्पर्शस्मितेक्षणैः ।
आश्वास्य चाश्वपाकेभ्यो वरैश्चाभिमतैर्विभुः ॥२२॥

प्रह्व अभिवादन आश्लेष करस्पर्श स्मितेक्षणैः आश्वास्य च आश्वपाकेभ्यः वरैः च अभिमतैः विभुः ॥ २२ ॥

प्रह्व	मस्तक झुकाकर प्रणाम (किसीको तथा)	आश्वास्य	आश्वासन देकर
		च	और
		आश्वपाकेभ्यः	चाण्डालादि पर्यन्तको
अभिवादन	बोलकर प्रणाम (या)	अभिमतैः	अभीष्ट
		वरैः	मांग पूरी करके
आश्लेष	आलिंगन (करके अथवा)	च	च
		विभुः	समर्थ (भगवानने सबको सत्कृत किया) ॥२२॥
करस्पर्श	हाथ मिलाकर (या)		
स्मितेक्षणैः	मुस्कराकर देखकर,		

स्वयं च गुरुभिर्विप्रैः सदारैः स्थविरैरपि ।
आशीर्भिर्युज्यमानोऽन्यैर्वन्दिभिश्चाविशत्पुरम् ॥२३॥

स्वयं च गुरुभिः विप्रैः सदारैः स्थविरैः अपि आशीर्भिः युज्यमानः अन्यैः वन्दिभिः च आविशत् पुरम् ॥ २३ ॥

स्वयं	स्वयं	युज्यमानः	प्राप्त करते हुए
च	भी	च	और
सदारैः	पत्नियों सहित	अन्यैः	दूसरों (अपनेसे छोटों) से
विप्रैः	ब्राह्मणों द्वारा		
स्थविरैः	वृद्धोंसे	वन्दिभिः	वन्दित होते
अपि	भी	पुरं	नगरमें
आशीर्भिः	आशीर्वाद	आविशत्	प्रविष्ट हुए ॥२३॥

राजमार्गं गते कृष्णे द्वारकायाः कुलस्त्रियः ।
हर्म्याण्यारुरुहुर्विप्र तदीक्षणमहोत्सवाः ॥२४॥

राजमार्गं गते कृष्णे द्वारकायाः कुलस्त्रियः हर्म्याणि आरुरुहुः विप्र तत् ईक्षण महोत्सवाः ॥ २४ ॥

विप्र	शौनकजी !	**तत्**	उनके
कृष्णे	श्रीकृष्णके	**ईक्षण**	दर्शनकी
राजमार्गं	राजपथपर	**महोत्सवाः**	भारी उत्सुकतासे
गते	पहुँचनेपर	**हर्म्याणि**	अटारियोंपर
द्वारकायाः	द्वारिकाकी	**आरुरुहुः**	चढ़ गयीं ॥२४॥
कुलस्त्रियः	कुलीन स्त्रियां		

नित्यं निरीक्षमाणानां यदपि द्वारकौकसाम् ।
न वितृप्यन्ति हि दृशः श्रियोधामाङ्गमच्युतम् ॥२५॥

नित्यं निरीक्षमाणानां यदपि द्वारका ओकसां न एव तृप्यन्ति हि दृशः श्रियो धामं अंग अच्युतम् ॥ २५ ॥

द्वारका	द्वारिका	**न**	नहीं
ओकसां	निवासियों द्वारा	**एव**	ही है
नित्यं	सदा	**हि**	क्योंकि
निरीक्षमाणानां	देखे जानेवाले	**अच्युतं**	श्रीकृष्णका
यदपि	यद्यपि (भगवान हैं फिर भी)	**अंग**	श्रीअंग
		श्रियोधाम	शोभाका धाम है ॥२५॥
दृशः	दृष्टि		
तृप्यन्ति	तृप्ति होती		

श्रियो निवासो यस्योरः पानपात्रं मुखं दृशाम् ।
बाहवो लोकपालानां सारङ्गाणां पदाम्बुजम् ॥२६॥

श्रियः निवासः यस्य उरः पानपात्रं मुखं दृशां बाहवः लोकपालानां सारंगाणां पदाम्बुजम् ॥ २६ ॥

यस्य	जिनका	**श्रियः**	लक्ष्मीका
उरः	वक्षस्थल	**निवासः**	निवास है,

मुखं	मुख	लोकपालानां	लोकपालोंकी (और)
दृशां	नेत्रोंका	पदाम्बुजं	चरणकमल
पानपात्रं	पीनेका पात्र है,	सारंगाणां	भक्तोंके (आश्रय)
बाहवः	भुजायें		हैं ॥२६॥

सितातपत्रव्यजनैरुपस्कृतः
प्रसूनवर्षैरभिवर्षितः पथि ।
पिशङ्गवासा वनमालया बभौ
घनो यथार्कोडुपचापवैद्युतैः ॥२७॥

सित आतपत्र व्यजनैः उपस्कृतः प्रसूनवर्षैः अभिवर्षितः पथि पिशङ्गवासा वनमालया बभौ घनः यथा अर्क उडुचाप वैद्युतैः ॥ २७ ॥

सित	श्वेत	वनमालया	वनमालाधारी श्रीकृष्ण
आतपत्र	छत्र (तथा)	बभौ	(ऐसे) शोभित हुए
व्यजनः	पंखोंसे	यथा	जैसे
उपस्कृतः	सुशोभित	घनः	मेघ (एक साथ)
प्रसूनवर्षैः	पुष्पवर्षा	अर्क	सूर्य
अभि	चारों ओरसे	उडु	चन्द्रमा
वर्षितः	होती	चाप	इन्द्रधनुष (एवं)
पथि	मार्गमें	वैद्युतैः	विद्युतसे ॥२७॥
पिशङ्गवासा	पीताम्बर पहिने		

प्रविष्टस्तु गृहं पित्रोः परिष्वक्तः स्वमातृभिः ।
ववन्दे शिरसा सप्त देवकीप्रमुखा मुदा ॥२८॥

प्रविष्टः तु गृहं पित्रोः परिष्वक्तः स्व मातृभिः ववन्दे शिरसा सप्त देवकी प्रमुखा मुदा ॥ २८ ॥

तु	तब	स्व	अपनी
पित्रोः	पिताके	मातृभिः	माताओं द्वारा
गृहं	भवनमें	परिष्वक्तः	आलिंगित होकर
प्रविष्टः	प्रवेश किया		

देवकी प्रमुखा	जिनमें देवकी मुख्य हैं उन	मुदा	हर्षित होकर
		शिरसा	मस्तकसे (पृथ्वीपर सिर रखकर)
सप्त	सातों (माताओं) को	ववन्दे	प्रणाम किया ॥२८॥

ताः पुत्रमङ्कमारोप्य स्नेहस्नुतपयोधराः ।
हर्षविह्वलितात्मानः सिषिचुर्नेत्रजैर्जलैः ॥२९॥

ताः पुत्रं अङ्कं आरोप्य स्नेह स्तुत पयोधराः हर्ष विह्वलित आत्मानः सिषुचुः नेत्रजः जलैः ॥ २९ ॥

ताः	उन (माताओं) ने	पुत्रं	पुत्र (श्रीकृष्ण) को
स्नेह	स्नेहके कारण	अङ्कं	गोदमें
स्तुत	टपकते	आरोप्य	लेकर
पयोधराः	पयोधरवाली	नेत्रजैः	नेत्रोंके
हर्ष	हर्षसे	जलैः	(हर्ष) अश्रुसे
विह्वलित	विह्वल	सिषुचुः	सींच दिया ॥२९॥
आत्मानः	चित्त		

अथाविशत् स्वभवनं सर्वकाममनुत्तमम् ।
प्रासादा यत्र पत्नीनां सहस्राणि च षोडश ॥३०॥

अथ आविशत् स्वभवनं सर्वं कामं अनुत्तमं प्रासादा यत्र पत्नीनां सहस्राणि च षोडश ॥ ३० ॥

अथ	तदनन्तर	यत्र	जिसमें
सर्वं	सब	पत्नीनां	पत्नियोंके
कामं	भोगोंसे सम्पन्न	षोडशसहस्राणि	सोलह हजार
अनुत्तमं	अत्यन्त श्रेष्ठ	प्रासादा	महल
स्वभवनं	अपने भवनमें	च	थे ॥३०॥
आविशत्	प्रविष्ट हुए		

पत्न्यः पतिं प्रोष्य गृहानुपागतं
विलोक्य संजातमनोमहोत्सवाः ।
उत्तस्थुरारात् सहसाऽऽसनाशयात्
साकं व्रतैर्व्रीडितलोचनाननाः ॥३१॥

पत्न्यः पतिं प्रोष्य गृहान् उपागतं विलोक्य संजात मनः महोत्सवाः उत्तस्थुः आरात् सहसा आसन् आशयात् साकं व्रतैः व्रीडित लोचन आननाः ॥ ३१ ॥

पत्न्यः	पत्नियोंने	**आसन**	आसन छोड़कर
प्रोष्य	प्रवाससे लौटे	**आशयात्**	चित्तसे
पतिं	पतिको	**व्रतैः**	व्रतोंको (जो पतिके
गृहान्	अपने घरोंमें		प्रवासमें जानेसे कर
आरात्	निकट		रही थीं)
उपागतं	पहुँचा	**साकं**	साथ (छोड़कर)
विलोक्य	देखकर	**व्रीडित**	लज्जा भरे
मनः	मनमें	**लोचन**	नेत्र
महोत्सवाः	अत्यन्त उल्लास	**आननाः**	मुखवाली
संजात	उत्पन्न हुआ	**उत्तस्थुः**	उठ खड़ी
सहसा	सहसा		हुईं ॥३१॥

तमात्मजैर्दृष्टिभिरन्तरात्मना
दुरन्तभावाः परिरेभिरे पतिम् ।
निरुद्धमप्यास्रवदम्बु नेत्रयो-
विलज्जतीनां भृगुवर्य वैक्लवात् ॥३२॥

तं आत्मजैः दृष्टिभिः अन्तरात्मना दुरन्तभावाः परिरेभिरे पतिं निरुद्धं अपि आस्रवत् अम्बुः नेत्रयोः विलज्जतीनां भृगुवर्य वैक्लवात् ॥३२॥

भृगुवर्य	भृगुश्रेष्ठ शौनकजी !	**विलज्जतीनां**	बहुत लज्जित होती
तं	उन		थीं, पर
पतिं	अपने पति	**वैक्लवात्**	व्याकुलताके कारण
	(श्रीकृष्ण) का	**निरुद्धं**	रोकनेपर
आत्मजैः	पुत्रोंके माध्यमसे	**अपि**	भी
दृष्टिभिः	नेत्रोंसे	**नेत्रयोः**	नेत्रोंसे
अन्तरात्मना	हृदयसे	**अम्बुः**	आंसू
परिरेभिरे	आलिंगत किया	**आस्रवत्**	निकलने लगे ॥३२॥
दुरन्तभावाः	असीम प्रेमसे		

यद्यप्यसौ पार्श्वगतो रहोगत-
स्तथापि तस्याङ्घ्रियुगं नवं नवम् ।
पदे पदे का विरमेत तत्पदा-
च्चलापि यच्छ्रीर्न जहाति कर्हिचित् ॥३३॥

यदपि असौ पार्श्वगतः रहोगतः तथापि तस्य अंघ्रि युगं नवं नवं पदे पदे का विरमेत तत् पदात् चला अपि यत् श्रीः न जहाति कर्हिचित् ॥ ३३ ॥

यदपि	यद्यपि	श्रीः	लक्ष्मी
असौ	ये (श्रीकृष्ण)	यत्	जिनको
रहोजुषः	एकान्तमें	कर्हिचित्	कभी भी
पार्श्वगतः	बगलमें ही रहते थे	न	नहीं
तथापि	फिर भी	जहाति	छोड़ती
अस्य	इनके	तत्	उनके
अंघ्रि	चरण	पदात्	चरणोंका
युगं	द्वय	पदा पदा	नित्य प्राप्त
नवं नवं	नित्य नवीन लगते हैं	का	कौन
चला	चञ्चला	विरमेत्	पृथक होना
अपि	होनेपर भी		चाहेगी ॥३३॥

एवं नृपाणां क्षितिभारजन्मना-
मक्षौहिणीभिः परिवृत्ततेजसाम् ।
विधाय वैरं श्वसनो यथानलं
मिथो वधेनोपरतो निरायुधः ॥३४॥

एवं नृपाणां क्षितिभार जन्मनां अक्षौहिणीभिः परिवृत्त तेजसां विधाय वैरं श्वसनः यथा अनलं मिथः वधेन उपरतः निरायुधः ॥ ३४ ॥

एवं	इस प्रकार	अक्षौहिणीभिः	अक्षौहिणी (सेनाओं) से
क्षितिभार	पृथ्वीके भार रूप	परिवृत्त	घिरे होनेसे
जन्मनां	उत्पन्न		

तेजसां	तेजस्वी बने	अनलं	अग्निको बढ़ा
नृपाणां	राजाओंमें		देता है
मिथः	परस्पर	निरायुधः	(स्वयं) निरायुध
वैरं	शत्रुता		रहते
विधाय	उत्पन्न करके,	वधेन	(अनेक) वधसे
यथा	जैसे	उपरतः	उपराम
श्वसनः	फूंक मारना		होगये ॥३४॥

स एष नरलोकेऽस्मिन्नवतीर्णः स्वमायया ।
रेमे स्त्रीरत्नकूटस्थो भगवान् प्राकृतो यथा ॥३५॥

स एष नरलोके अस्मिन् अवतीर्णः स्व मायया रेमे स्त्रीरत्न कूटस्थः भगवान् प्राकृतः यथा ॥ ३५ ॥

स	वही	मायया	मायासे
कूटस्थः	कूटस्थ	अवतीर्णः	अवतरित हुए हैं ।
भगवान्	भगवान	यथा	जैसे
एष	ये	प्राकृतः	साधारण पुरुष हों
अस्मिन्	इस	स्त्रीरत्न	उत्तम स्त्रियोंके साथ
नरलोके	मनुष्य लोकमें	रेमे	विहार करते
स्व	अपनी		रहे ॥३५॥

उद्दामभावपिशुनामलवल्गुहास-
व्रीडावलोकनिहतो मदनोऽपि यासाम् ।
सम्मुह्य चापमजहात्प्रददोत्तमास्ता
यस्येन्द्रियं विमथितुं कुहकैर्न शेकुः ॥३६॥

उद्दाम भाव पिशुन अमल वल्गुहासः व्रीडा अवलोक निहतः मदनः अपि यासां संमुह्य चापं अजहात् प्रमदोत्तमाः ताः यस्य इन्द्रियं विमथितुं कुहकैः न शेकुः ॥ ३६ ॥

उद्दाम	प्रबलतम	अमल	निर्मल
भाव	प्रेमसे	वल्गु	मधुर
पिशुन	भरी	यांसां	जिनकी

हास	हँसी (और)	**प्रमदोत्तमाः**	श्रेष्ठ नारियाँ
व्रीडा	लज्जापूर्वक	**कुहकैः**	अपने विलास
अवलोक	देखनेसे		प्रयत्नोंसे
निहतः	आहत	**यस्य**	जिनकी
मदनः	कामदेवने	**इन्द्रियं**	इन्द्रियोंको
अपि	भी	**विमथितुं**	मथित (असंयत)
सम्मुह्य	मूर्छित होकर		करनेमें
चापं	(अपना) धनुष	**न**	नहीं
अजहात्	फेंक दिया	**शेकुः**	समर्थ हुईं ॥३६॥
ताः	वे		

तमयं मन्यते लोको ह्यसङ्गमपि सङ्गिनम् ।
आत्मौपम्येन मनुजं व्यापृण्वानं यतोऽबुधः ॥३७॥

तं अयं मन्यते लोकः हि असङ्गं अपि संगिनं आत्मः उपमन्येनं मनुजं व्यापृण्वानं यतः अबुधः ॥ ३७ ॥

तं	उन (भगवान श्रीकृष्ण) को	**व्यापृण्वानं**	सर्वत्र व्यापक नियम बनाकर
असंगं	असंग होने	**संगिनं**	आसक्त
अपि	पर भी	**मनुजं**	(सामान्य) मनुष्य
अयं	यह	**मन्यते**	मानते हैं
लोकः	(संसारके) लोग	**हि**	क्योंकि
आत्मः	अपने	**अबुधाः**	अज्ञानी
उपमन्येन	समान	**यतः**	जो हैं ॥३७॥

एतदीशनमीशस्य प्रकृतिस्थोऽपि तद्गुणैः ।
न युज्यते सदाऽऽत्मस्थैर्यथा बुद्धिस्तदाश्रया ॥३८॥

एतत् ईशनं ईशस्य प्रकृतिस्थः अपि तद् गुणैः न युज्यते सदा आत्मस्थैः यथा बुद्धिः तत् आश्रयाः ॥ ३८ ॥

एतत्	यही	**ईशनं**	ईश्वरता है
ईशस्य	ईश्वरकी	**प्रकृतिस्थः**	प्रकृतिमें रहकर

अपि	भी	आत्मस्थैः	अपने स्वरूपमें ही
तद्	उसके		स्थित रहते हैं।
गुणैः	गुणोंसे	यथा	जैसे
युज्यते	संसक्त होते	तत्	उनके
न	नहीं	आश्रया	आश्रयमें रहनेवाली
सदा	नित्य	बुद्धिः	बुद्धि ॥३८॥

तं मेनिरेऽबला मूढाः स्त्रैणं चानुव्रतं रहः।
अप्रमाणविदो भर्तुरीश्वरं मतयो यथा ॥३९॥

तं मेनिरे अबला मूढाः स्त्रैणं च अनुव्रतं रहः अप्रमाण विदः भर्तुः ईश्वरं मतयः यथा ॥ ३९ ॥

यथा	जैसे	अबला	उनकी रानियोंने
मतयः	बुद्धियाँ	तं	उनको
ईश्वरं	ईश्वरको (नहीं जान	रहः	एकान्तमें
	पातीं वैसे)	अनुव्रतं	अपना अनुयायी
भर्तुः	अपने स्वामीके	च	और
प्रमाण	प्रमाण (प्रभाव) को	स्त्रैणं	स्त्रीजित
अविदः	न जाननेवाली	मेनिरे	मान लिया ॥३९॥
मूढाः	अज्ञानी		

इति श्रीमद्भागवते महापुराणे वैयासिक्यां अष्टादशसाहस्र्यां
पारमहंस्यां संहितायां प्रथमस्कन्धे एकादशोऽध्यायः

अथ द्वादशोऽध्यायः

शौनक उवाच–

अश्वत्थाम्नोपसृष्टेन ब्रह्मशीर्ष्णोरुतेजसा ।
उत्तराया हतो गर्भ ईशेनाजीवितः पुनः ॥१॥

अश्वत्थाम्ना उपसृष्टेन ब्रह्मशीर्ष्णाः उरु तेजसा उत्तरायाः हतः गर्भः ईशेन आजीवितः पुनः ॥ १ ॥

अश्वत्थाम्ना	अश्वत्थामाके द्वारा	**हतः**	मार दिया गया था
उपसृष्टेन	प्रयोग किए गये	**पुनः**	फिर
उरु तेजसा	अत्यन्त तेजस्वी	**ईशेन**	श्रीकृष्ण द्वारा
ब्रह्मशीर्ष्णाः	ब्रह्मशिरास्त्र द्वारा	**आजीवितः**	जिला दिया
उत्तरायाः	उत्तराका		गया ॥१॥
गर्भः	गर्भस्थ शिशु		

तस्य जन्म महाबुद्धेः कर्माणि च महात्मनः ।
निधनं च यथैवासीत्स प्रेत्य गतवान् यथा ॥२॥

तस्य जन्म महाबुद्धेः कर्माणि च महात्मनः निधनं च यथा एव आसीत् स प्रेत्य गतवान् यथा ॥ २ ॥

महाबुद्धेः	महान् बुद्धिमान सूतजी !	**यथा**	जैसे
		एव	भी
तस्य	उस	**निधनं**	मृत्यु हुई
महात्मनः	महात्माका	**यथा**	जैसे
जन्म	जन्म	**प्रेत्य**	मरकर
च	और	**गतवान्**	जिस गतिको
कर्माणि	कर्म		गये ॥२॥
च	एवं		

तदिदं श्रोतुमिच्छामो गदितुं यदि मन्यसे ।
ब्रूहि नः श्रद्दधानानां यस्य ज्ञानमदाच्छुकः ॥३॥

तत् इदं श्रोतुं इच्छामः गदितुं यदि मन्यसे ब्रूहि नः श्रद्दधानानां यस्य ज्ञानं अदात् शुकः ॥ ३ ॥

यस्य	जिनको	**इच्छामः**	हम सबको इच्छा है
शुकः	शुकदेवजीने	**यदि**	यदि
ज्ञानं	ज्ञान	**गदितुं**	कहने योग्य
अदात्	प्रदान किया	**मन्यसे**	आप मानते हों तो
तत्	वह	**नः**	हम
इदं	यह	**श्रद्दधानां**	श्रद्धालुओंको
श्रोतुं	सुननेकी	**ब्रूहि**	बतलाइये ॥३॥

सूत उवाच–

अपीपलद्धर्मराजः पितृवद् रञ्जयन् प्रजाः ।
निःस्पृहः सर्वकामेभ्यः कृष्णपादाब्जसेवया ॥४॥

अपीपलत् धर्मराजः पितृवत् रञ्जयन् प्रजाः निस्पृहः सर्व कामेभ्यः कृष्ण पादाब्ज सेवया ॥ ४ ॥

कृष्ण	श्रीकृष्णके	**धर्मराजः**	युधिष्ठिर
पादाब्ज	चरणकमलोंकी	**पितृवत्**	पिताके समान
सेवया	सेवा (के प्रभाव) से	**प्रजाः**	प्रजाको
सर्व	सब	**रञ्जयन्**	प्रसन्न करते हुए
कामेभ्यः	कामनाओं (भोगों)से	**अपीपलत्**	उसका पालन करते
निस्पृहः	निस्पृह		थे ॥४॥

सम्पदः क्रतवो लोका महिषी भ्रातरो मही ।
जम्बूद्वीपाधिपत्यं च यशश्च त्रिदिवं गतम् ॥५॥

सम्पदः क्रतवः लोकाः महिषीः भ्रातरः मही जम्बूद्वीप आधिपत्यं च यशः च त्रिदिवं गतम् ॥५॥

सम्पदः	सम्पत्ति	जम्बूद्वीप	जम्बूद्वीपका
क्रतवः	यज्ञ	आधिपत्यं	स्वामित्व
लोकाः	उत्तम लोकोंको पानेका अधिकार	च	और
		त्रिदिवं	स्वर्गतक
महिषीः	पत्नी	गतं	पहुँचा
भ्रातरः	भाई	यशः	सुयश
मही	पृथ्वी	च	भी ॥५॥

किं ते कामाः सुरस्पार्हा मुकुन्दमनसो द्विजाः ।
अधिजह्रुर्मुदं राज्ञः क्षुधितस्य यथेतरे ॥६॥

किं ते कामाः सुरस्पार्हाः मुकुन्द मनसः द्विजाः अधिजह्रुः मुदं राज्ञः क्षुधितस्य यथा इतरे ॥ ६ ॥

द्विजाः	ब्राह्मणो ! (शौनकादि)	क्षुधितस्य	भूखके लिए
		यथा	जैसे
सुरस्पार्हाः	देवता भी जिनकी स्पृहा करते थे	इतरे	(भोजनके अतिरिक्त) दूसरे पदार्थ
ते	वे	किं	क्या
कामाः	भोग	मुदं	प्रसन्नता
मुकुन्द मनसः	मुकुन्दमें लगे मनवाले	अधिजह्रुः	दे सकते थे ? ॥६॥
राज्ञः	राजा युधिष्ठिरको		

मातुर्गर्भगतो वीरः स तदा भृगुनन्दन ।
ददर्श पुरुषं कञ्चिद्दह्यमानोऽस्त्रतेजसा ॥७॥

मातुः गर्भगतः वीरः स तदा भृगुनन्दन ददर्श पुरुषं कंचित् दह्यमानः अस्त्र तेजसा ॥ ७ ॥

भृगुनन्दन	शौनकजी !	अस्त्रतेजसा	ब्रह्मास्त्रके तेजसे
मातुः	माताके	दह्यमानः	जलते हुए
गर्भं गतः	गर्भमें पहुँचा	कंचित्	किसी
स	उस	पुरुषं	पुरुषको
वीरः	वीर परीक्षितने	ददर्श	देखा ॥७॥

अङ्गुष्ठमात्रममलं स्फुरत्पुरटमौलिनम् ।
अपीच्यदर्शनं श्यामं तडिद्वाससमच्युतम् ॥८॥

अंगुष्ठमात्रं अमलं स्फुरत् पुरट मौलिनं अपीच्य दर्शनं श्यामं तडित् वास समं अच्युतम् ॥ ८ ॥

अंगुष्ठमात्रं	केवल अंगूठेके बराबर	**श्यामं**	श्याम वर्ण
अमलं	निर्मल	**तडित**	बिजलीके
स्फुरत्	चमकते	**समं**	समान
पुरट	सोनेका	**वास**	वस्त्रधारी
मौलिनं	मुकुटवाला	**अच्युतं**	निर्विकार (अभय) ॥८॥
अपीच्य दर्शनं	अत्यन्त सुन्दर		

श्रीमद्दीर्घचतुर्बाहुं तप्तकाञ्चनकुण्डलम् ।
क्षतजाक्षं गदापाणिमात्मनः सर्वतोदिशम् ।
परिभ्रमन्तमुल्काभां भ्रामयन्तं गदां मुहुः ॥९॥

श्रीमत् दीर्घ चतुर्बाहुं तप्त काञ्चन कुंडलं क्षतजाक्षं गदा पाणिं आत्मनः सर्वतः दिशं परिभ्रमन्तं उल्काभां भ्रामयन्त गदां मुहुः ॥ ९ ॥

श्रीमत्	शोभाशाली	**आत्मनः**	अपने
दीर्घ	लम्बी	**सर्वतः दिशं**	सब दिशाओंमें
चतुर्बाहुं	चार भुजाओंवाला	**उल्काभां**	उल्काके समान प्रज्वलित
तप्त	तपाये हुए	**परिभ्रमन्तं**	घूमता हुआ
काञ्चन	स्वर्णके	**मुहुः**	बार-बार
कुंडलं	कुण्डल पहिने	**गदां**	गदाको
क्षतजाक्षं	घावके समान लाल नेत्रवाला	**भ्रामयन्तं**	घुमाता हुआ ॥९॥
गदापाणिं	हाथमें गदा लिए		

अस्त्रतेजः स्वगदया नीहारमिव गोपतिः ।
विधमन्तं संनिकर्षे पर्यैक्षत क इत्यसौ ॥१०॥

अस्त्र तेजः स्वगदया नीहारं इव गोपतिः विधमन्तं सन्निकर्षे परिऐक्षत् कः इति असौ । ।१० ॥

अस्त्र तेजः	ब्रह्मास्त्रके तेजको	**सन्निकर्षे**	अत्तन्त समीप
स्वगदया	अपनी गदासे	**परि**	चारों ओर
नीहारं	कुहरे	**ऐक्षत**	देखा
गोपतिः	सूर्यके	**असौ**	यह
इव	समान	**कः**	कौन
विधमन्तं	कष्ट करते हुए	**इति**	है ? ॥१०॥

विधूय तदमेयात्मा भगवान्धर्मगुब् विभुः ।
मिषतो दशमासस्य तत्रैवान्तर्दधे हरिः ॥११॥

विधूय तत् अमेय आत्मा भगवान धर्म गुब् विभुः मिषतः दशमासस्य तत्र एव अन्तर्दधे हरिः ॥ ११ ॥

तत्	वे	**दशमासस्य**	दस महीनेके (गर्भस्थ शिशुके)
अमेय	अप्रमेय		
आत्मा	स्वरूप	**मिषतः**	देखते देखते
धर्म	धर्म	**हरिः**	(वे) श्रीहरि
गुव्	रक्षक	**तत्र**	वहाँ
भगवान्	भगवान	**एव**	ही
विभुः	सर्वव्यापक	**अन्तर्दधे**	अन्तर्धान होगये ॥११॥
विधूय	(ब्रह्मास्त्रके तेजको) नष्ट करके		

ततः सर्वगुणोदर्के सानुकूलग्रहोदये ।
जज्ञे वंशधरः पाण्डोर्भूयः पाण्डुरिवौजसा ॥१२॥

व्रतः सर्वगुणः उदर्क सानुकूलः ग्रह उदये जज्ञे वंशधरः पाण्डोः भूयः पाण्डुः इव ओजसा ॥ १२ ॥

ततः	तदनन्तर	**सानुकूलः**	सानुकूल
सर्वगुण	सर्वगुण युक्त	**ग्रह**	ग्रहोंके
उदर्के	कालमें	**उदये**	उदय होनेपर

भूयः	फिर	पाण्डोः	पाण्डुका
ओजसा	ओजसे	वंशधरः	वंश चलानेवाला
पाण्डुः	पाण्डुके	जज्ञे	उत्पन्न हुआ ॥१२॥
इव	समान		

तस्य प्रीतमना राजा विप्रैर्धौम्यकृपादिभिः ।
जातकं कारयामास वाचयित्वा च मङ्गलम् ॥१३॥

तस्य प्रीतमनाः राजाः विप्रैः धौम्य कृप आदिभिः जातकं कारयामास वाचयित्वा च मङ्गलम् ॥ १३ ॥

राजाः	राजा युधिष्ठिरने	मङ्गलं	स्वस्ति
प्रीतमना	प्रसन्न चित्त होकर	वाचयित्वा	पाठ कराके
विप्रैः	ब्राह्मण	तस्य	उस (परिक्षित) का
धौम्य	धौम्य	जातकं	जातकर्म संस्कार
कृप	कृपाचार्य	च	भी
आदिभिः	आदिकों द्वारा	कारयामास	करवाया ॥१३॥

हिरण्यं गां महीं ग्रामान् हस्त्यश्वान्नृपतिर्वरान् ।
प्रादात्सुअन्नं च विप्रेभ्यः प्रजातीर्थे सतीर्थवित् ॥१४॥

हिरण्यं गां महीं ग्रामान् हस्ति अश्वान् नृपतिः वरान् प्रादात् सुअन्नं च विप्रेभ्यः प्रजातीर्थे स तीर्थवित् ॥ १४ ॥

स	उन	महीं	भूमि
तीर्थवित्	तीर्थका मर्म जाननेवाले	ग्रामान्	गाँव
		हस्ति	हाथी
नृपतिः	राजाने	वरान्	श्रेष्ठ
प्रजातीर्थे	सन्तति जन्म रूप तीर्थ कालमें	अश्वान्	घोड़े
		च	और
विप्रेभ्यः	ब्राह्मणोंको	सुअन्नं	उत्तम भोजन
हिरण्यं	सोना	प्रादात्	प्रदान किया ॥१४॥
गां	गौयें		

तमूचुर्ब्राह्मणास्तुष्टा राजानं प्रश्रयान्वितम् ।
एष ह्यस्मिन् प्रजातन्तौ पुरूणां पौरवर्षभ ॥१५॥

तं ऊचुः ब्राह्मणाः तुष्टा राजानं प्रश्रय अन्वितं एष हि अस्मिन् प्रजा तन्तौ पुरूणां पौरव ऋषभ ॥ १५ ॥

तं	उन	ऋषभ	शिरोमणि !
प्रश्रय	विनय	एष	यह
अन्वितं	युक्त	हि	क्योंकि
राजानं	राजासे	अस्मिन्	इस
तुष्टा	सन्तुष्ट	पुरूणां	पुरुवंशकी
ब्राह्मणाः	ब्राह्मण	प्रजातन्तु	सन्तति
ऊचुः	बोले		परम्पराको ॥१५॥
पौरव	पुरुवंश		

दैवेनाप्रतिघातेन शुक्ले संस्थामुपेयुषि ।
रातो वोऽनुग्रहार्थाय विष्णुना प्रभविष्णुना ॥१६॥

दैवेन अप्रतिघातेन शुक्ले संस्थां उपेयुषि रातः वः अनुग्रहार्थं विष्णुना प्रभविष्णुना ॥ १६ ॥

अप्रतिघातेन	दुर्निवार	अनुग्रहार्थाय	अनुग्रह करनेके लिए
दैवेन	कालके द्वारा	प्रभविष्णुना	सर्व समर्थ
शुक्ले	(इस) पवित्र वंशको	विष्णुना	श्रीकृष्णने
संस्थां	समाप्तप्राय	रातः	(इस शिशुकी)
उपेयुषि	कर देनेपर		रक्षाकी ॥१६॥
वः	आप लोगोंपर		

तस्मान्नाम्ना विष्णुरात इति लोके बृहच्छ्रवाः ।
भविष्यति न संदेहो महाभागवतो महान् ॥१७॥

तस्मात् नाम्ना विष्णु रातः इति लोके बृहत् श्रवाः भविष्यति न संदेह महाभागवतः महान् ॥ १७ ॥

तस्मात्	इसलिए	भविष्यति	होगा
लोके	संसारमें	सन्देहः	(इसमें) सन्देह
विष्णुरातः	विष्णुरात	न	नहीं
इति	इस	महान्	महान्
नाम्ना	नामसे	महाभागवतः	महाभागवत
वृहत्	बड़े		(होगा) ॥१७॥
श्रवाः	सुयशवाला		

युधिष्ठिर उवाच–

अप्येष वंश्यान् राजर्षीन् पुण्यश्लोकान् महात्मनः ।
अनुवर्तिता स्विद्यशसा साधुवादेन सत्तमाः ॥१८॥

अपि एष वंश्यान् राजर्षीन् पुण्यश्लोकान् महात्मनः अनुवर्तितः स्वित् यशसाः साधुवादेन सत्तमाः ॥ १८ ॥

सत्तमाः	महापुरुषो !	महात्मनः	महात्मा
अपि	क्या	राजर्षीन्	राजर्षियोंके
एष	यह शिशु	वंश्यान्	वंशोंका
यशसाः	अपने सुयशसे	अनुवर्तिताः	अनुकरण करनेवाला
साधुवादेन	अच्छाइयोंसे	स्वित्	होगा ? ॥१८॥
पुण्यश्लोकान्	पवित्र कीर्ति		

ब्राह्मणा ऊचुः

पार्थ प्रजाविता साक्षादिक्ष्वाकुरिव मानवः ।
ब्रह्मण्यः सत्यसंधश्च रामो दाशरथिर्यथा ॥१९॥

पार्थ प्रजा अविताः साक्षात् इक्ष्वाकुः इव मानवः ब्रह्मण्यः सत्यसंधः च रामः दाशरथिः यथा ॥ १९ ॥

पार्थ	युधिष्ठिर !	इक्ष्वाकुः	इक्ष्वाकु
साक्षात्	साक्षात्	इव	के समान
मानवः	मनुपुत्र	प्रजा	प्रजाका

अविता	रक्षक होगा।	**रामः**	राम थे
च	और	**ब्रह्मण्यः**	ब्राह्मण भक्त (तथा)
यथा	जैसे	**सत्यसंधः**	सत्यपरायण
दाशरथिः	दशरथ नन्दन		होगा ॥१९॥

एष दाता शरण्यश्च यथा ह्यौशीनरः शिबिः।
यशो वितनिता स्वानां दौष्यन्तिरिव यज्वनाम् ॥२०॥

एष दाता शरण्यः च यथा हि औशीनरः शिविः यशः वितन्विता स्वानां दौष्यन्तिः इव यज्वनाम् ॥ २० ॥

एष	यह	**यज्वनां**	यज्ञकर्ताओंमें
हि	निश्चय	**दौष्यन्तिः**	दुष्यन्त पुत्र भरतके
यथा	जैसे	**इव**	समान
औशीनरः	उशीनर देशके नरेश	**स्वानां**	अपने स्वजनोंका
शिविः	शिवि थे	**यशः**	सुयश
दाता	दानी	**वितन्विता**	फैलानेवाला
च	और		होगा ॥२०॥
शरण्यः	शरण देनेवाला होगा।		

धन्विनानग्रणीरेष तुल्यश्चार्जुनयोर्द्वयोः।
हुताश इव दुर्धर्षः समुद्र इव दुस्तरः ॥२१॥

धन्विनां अग्रणीः एष तुल्यः च अर्जुनयोः द्वयोः हुताश इव दुर्धर्षः समुद्र इव दुस्तरः ॥ १ ॥

एष	यह	**तुल्यः**	समान
धन्विनां	धनुर्धारियोंमें	**अग्रणीः**	अग्रणी होगा।
द्वयोः	दोनों*	**च**	और
अर्जुनयोः	अर्जुनोंके	**हुताश**	अग्निके

---

* सहस्रार्जुन और परीक्षितके पितामह अर्जुन।

इव	समान	इव	समान
दुर्धर्ष	दुर्धर्ष	दुःस्तरः	दुस्तर होगा ॥२१॥
समुद्र	समुद्रके		

मृगेन्द्र इव विक्रान्तो निषेव्यो हिमवानिव ।
तितिक्षुर्वसुधेवासौ सहिष्णुः पितराविव ॥२२॥

मृगेन्द्र इव विक्रान्तः निषेव्यः हिमवान् इव तितीक्षुः वसुधा इव असौ सहिष्णुः पितराः इव ॥ २२ ॥

असौ	यह	वसुधा	पृथ्वीके
मृगेन्द्र	सिंहके	इव	समान
इव	समान	तितीक्षुः	तितीक्षु,
विक्रान्तः	पराक्रमी,	पितराः	माता-पिताके
हिमवान्	हिमालयके	इव	समान
इव	समान	सहिष्णुः	सहनशील
निषेव्यः	सेवन करने योग्य,		होगा ॥२२॥

पितामहसमः साम्ये प्रसादे गिरिशोपमः ।
आश्रयः सर्वभूतानां यथा देवो रमाश्रयः ॥२३॥

पितामह समः साम्ये प्रसादे गिरिश उपमः आश्रयः सर्वभूतानां यथा देवः रमाश्रयः ॥ २३ ॥

साम्ये	समतामें	रमाश्रयः	भगवान विष्णु
पितामह	ब्रह्माजीके	देवः	देव
समः	समान,	यथा	जैसे
प्रसादे	कृपा करनेमें	सर्वभूतानां	सब प्राणियोंका
गिरिश	शंकरजीके	आश्रयः	आश्रय होगा ॥२३॥
उपमः	समान,		

सर्वसद्गुणमाहात्म्ये एष कृष्णमनुव्रतः ।
रन्तिदेव इवोदारो ययातिरिव धार्मिकः ॥२४॥

सर्व सद्गुण माहात्म्ये एष कृष्णं अनुव्रतः रन्तिदेव इव उदारः ययाति इव धार्मिकः ॥ २४ ॥

एष	यह	उदारः	उदार
सर्व	सब	रन्तिदेव	रन्तिदेवके
सद्गुण	सद्गुणोंके	इव	समान,
माहात्म्ये	माहात्म्यधारणमें	धार्मिकः	धर्मात्मा
कृष्णं	श्रीकृष्णका	ययाति	ययातिके
अनुव्रतः	अनुयायी होगा,	इव	समान होगा ॥२४॥

धृत्या बलिसमः कृष्णे प्रह्लाद इव सद्ग्रहः ।
आहर्तैषोऽश्वमेधानां वृद्धानां पर्युपासकः ॥२५॥

धृत्याः बलि समः कृष्णे प्रह्लाद इव सद्ग्रहः आहर्ता एष अश्वमेधानां वृद्धानां पर्युपासकः ॥ २५ ॥

एष	यह	प्रह्लाद	प्रह्लादके
धृत्या	धैर्यमें	इव	समान होगा ।
बलि	बलिके	अश्वमेधानां	अश्वमेध यज्ञोंका
समः	समान,	आहर्ता	करनेवाला,
कृष्णे	श्रीकृष्णके प्रति	वृद्धानां	बड़ोंका
सत् आग्रहः	दृढ़ निष्ठामें	पर्युपासकः	सेवक होगा ॥२५॥

राजर्षीणां जनयिता शास्ता चोत्पथगामिनाम् ।
निग्रहीता कलेरेष भुवो धर्मस्य कारणात् ॥२६॥

राजर्षिणां जनयिता शास्ता च उत्पथ गामिनां निगृहीता कलेः एष भुवः धर्मस्य कारणात् ॥ २६ ॥

राजर्षीणां	राजर्षियोंको	एष	यह
जनयिता	जन्म देनेवाला	भुवः	पृथ्वी (एवं)
च	और	धर्मस्य	धर्मके
उत्पथ	कुमार्गसे	कारणात्	कारणसे
गामिनां	चलनेवालोंका	कलेः	कलियुगका
शास्ता	शासन करनेवाला होगा ।	निगृहीता	नियन्त्रीण करनेवाला होगा ॥२६॥

तक्षकादात्मनो मृत्युं द्विजपुत्रोपसर्जितात् ।
प्रपत्स्यत उपश्रुत्य मुक्तसङ्गः पदं हरेः ॥२७॥

तक्षकात् आत्मनः मृत्युं द्विजपुत्रः उपसर्जितात् प्रपत्स्यत् उपश्रुत्य मुक्तसंगः पदं हरेः ॥ २७ ॥

द्विजपुत्र	ब्राह्मणकुमार द्वारा	उपश्रुत्य	सुनकर
उपसर्जितात्	(शाप देकर) उत्पन्नकी गयी	मुक्तसंगः	आसक्ति त्यागकर
		हरेः	श्रीहरिके
तक्षकात्	तक्षक द्वारा	पदं	चरणोंकी
आत्मनः	अपनी	प्रपत्स्यत्	शरण लेगा ॥२ ॥
मृत्युं	मृत्यु होना		

जिज्ञासितात्मयाथात्म्यो मुनेर्व्यासिसुतादसौ ।
हित्वेदं नृप गङ्गायां यास्यत्यद्धाकुतोभयम् ॥२८॥

जिज्ञासितं आत्म याथात्मः मुनेः व्याससुतात् असौ हित्वा इदं नृप गंगायां यास्यति अद्धा अकुतः भयम् ॥ २८ ॥

नृप	राजन् !	इदं	इस देहको
असौ	यह	गंगायां	गंगा किनारे
मुनेः	मुनि	हित्वा	त्यागकर
व्याससुतात्	शुकदेवजीसे	अद्धा	प्रत्यक्ष
आत्म	आत्माकी	अकुतः भयं	परमनिर्भय पदको
याथात्म्यः	यथार्थताकी	यास्यति	जायगा ॥२८॥
जिज्ञासितं	जिज्ञासा करके		

*सूत उवाच**–

इति राज्ञ उपादिश्य विप्रा जातककोविदाः ।
लब्धापचितयः सर्वे प्रतिजग्मुः स्वकान् गृहान् ॥२९॥

इति राज्ञः उपादिश्य विप्रा जातक कोविदाः लब्धा अपचितयः सर्वे प्रतिजग्मुः स्वकान् गृहान् ॥ २९ ॥

---

* यह उवाच अन्य प्रतियोंमें नहीं है ।

इति	इस प्रकार	अपचितयः	दक्षिणा
राज्ञः	राजा युधिष्ठिरको	लब्धा	प्राप्त करके
उपादिश्य	बतलाकर	सर्वे	सब
जातक	ज्योतिष शास्त्रके	स्वकान	अपने
कोविदा	विद्वान्	गृहान्	घरोंको
विप्राः	ब्राह्मण	प्रतिजग्मुः	लौट गये ॥२९॥

स एष लोके विख्यातः परीक्षिदिति यत्प्रभुः ।
गर्भे दृष्टमनुध्यायन् परीक्षेत नरेष्विह ॥३०॥

स एष लोके विख्यातः परीक्षित् इति यत् प्रभुः गर्भे दृष्टं अनुध्यायन् परीक्षेत् नरेषु इह ॥ ३० ॥

स	वही	गर्भे	गर्भमें
एष	यह (बालक)	दृष्टं	देखे हुए (भगवान) को
लोके	संसारमें	अनुध्यायन्	बार बार ध्यान करते हुए
परीक्षित	परीक्षित	इह	यहाँ संसारमें
इति	इस नामसे	नरेषु	मनुष्योंमें
विख्यातः	प्रसिद्ध हुआ	परीक्षेत्	ढूंढ़ता रहता है ॥३०॥
यत्	क्योंकि		
प्रभुः	इस समर्थने		

स राजपुत्रो ववृधे आशु शुक्ल इवोडुपः ।
आपूर्यमाणः पितृभिः काष्ठाभिरिव सोऽन्वहम् ॥३१॥

स राजपुत्रः ववृधे आशु शुक्ल इव उडुपः आपूर्यमाणः पितृभिः काष्ठाभिः इव सः अन्वहम् ॥ ३१ ॥

शुक्ल	शुक्ल पक्षमें	पितृभिः	पितमहों द्वारा
काष्ठाभिः इव	कलाओंसे युक्तकी भाँति	आपूर्यमाणः	लालित-पालित होता
उडुपः	चन्द्रमाके	सः	वह
इव	समान	आशु	जल्दी
स	वह	अन्वहं	प्रतिदिन
राजपुत्रः	राजकुमार	ववृधे	बढ़ने लगा ॥३१॥

यक्ष्यमाणोऽश्वमेधेन ज्ञातिद्रोहजिहासया ।
राजालब्धधनो दध्यावन्यत्र करदण्डयोः ॥३२॥

यक्ष्यमाणः अश्वमेधेन ज्ञातिद्रोह जिहासया राजा अलब्ध धनः दध्या अन्यत्र कर दण्डयोः ॥ ३२ ॥

ज्ञातिद्रोह	जाति सम्बन्धियोंके द्रोह (वध) का	**दण्डयोः**	अर्थ दण्डसे
		अन्यत्र	पृथक
जिहासया	प्रायश्चित करनेके लिए	**धनः**	धन
		अलब्ध	न मिलनेसे
अश्वमेधेन	अश्वमेध यज्ञ	**राजः**	राजा युधिष्ठिर
यक्षमाणः	करनेकी इच्छा करनेपर	**दध्या**	चिन्ता करने लगे ॥३२॥
कर	कर (तथा)		

तदभिप्रेतमालक्ष्य भ्रातरोऽच्युतचोदिताः ।
धनं प्रहीणमाजह्रुरुदीच्यां दिशि भूरिशः ॥३३॥

तत् अभिप्रेतं आलक्ष्य भ्रातरः अच्युत चोदिताः धनं प्रहीणं आजह्रुः उदीच्यां दिशि भूरिशिः ॥ ३३ ॥

तत्	उनके	**उदीच्यां**	उत्तर
अभिप्रेतं	अभीष्टको	**दिशि**	दिशामें
आलक्ष्य	जानकर	**प्रहीणं**	छोड़ा हुआ
अच्युत	श्रीकृष्ण द्वारा	**भूरिशः**	बहुत अधिक
चोदिताः	प्रेरित	**धनं**	धनको
भ्रातरः	उनके भाई	**आजह्रुः**	ले आये ॥३३॥

तेन सम्भृतसम्भारो धर्मपुत्रो युधिष्ठिरः ।
वाजिमेधैस्त्रिभिर्भीतो यज्ञैः समयजद्धरिम् ॥३४॥

तेन सम्भृत सम्भारः धर्मपुत्रः युधिष्ठिरः वाजिमेधैः त्रिभिः भीतः यज्ञैः समयजत् हरिम् ॥ ३४ ॥

तेन	उस धनसे	**सम्भृत**	प्रस्तुत करके
सम्भारः	सब सामग्री	**धर्मपुत्रः**	धर्मके पुत्र

युधिष्ठिरः	युधिष्ठिरने	**वाजिमेधैः यज्ञैः**	अश्वमेध यज्ञोंसे
भीतः	(युद्धमें हुई हिंसासे) डरकर	**हरिं**	श्रीहरिकी
		समयजत्	भली प्रकार पूजाकी ॥३४॥
त्रिभिः	तीन		

आहूतो भगवान् राज्ञा याजयित्वा द्विजैर्नृपम् ।
उवास कतिचिन्मासान् सुहृदां प्रियकाम्यया ॥३५॥

आहूतः भगवान् राज्ञा याजयित्वा द्विजैः नृपं उवास कतिचित् मासान् सुहृदां प्रिय काम्यया ॥ ३५ ॥

राज्ञा	राजा युधिष्ठिर द्वारा	**सुहृदां**	सुहृदोंको
आहूतः	बुलाये जानेपर	**प्रियकाम्यया**	प्रसन्न करनेके लिए
भगवान्	श्रीकृष्ण	**कतिचित्**	कुछ
द्विजैः	ब्राह्मणों द्वारा	**मासान्**	महीने
नृपं	राजासे	**उवास**	वहाँ रहे ॥३५॥
याजयित्वा	यज्ञ कराके		

ततो राज्ञाभ्यनुज्ञातः कृष्णया सह बन्धुभिः ।
ययौ द्वारवतीं ब्रह्मन् सार्जुनो यदुभिर्वृतः ॥३६॥

ततः राज्ञा अभ्यनुज्ञातः कृष्णया सह बन्धुभिः ययौ द्वारवतीं ब्रह्मन् सार्जुनः यदुभिः वृतैः ॥ ३६ ॥

ब्रह्मन्	शौनकजी !	**सार्जुनः**	अर्जुनके साथ
ततः	तदनन्तर	**यदुभिः**	यदुवंशियोंसे
राज्ञा	राजा युधिष्ठिरसे,	**वृतैः**	घिरे हुए (भगवन् श्रीकृष्ण)
कृष्णया	द्रौपदीके		
सह	सहित	**द्वारवतीं**	द्वारिका
बन्धुभिः	बन्धु-बान्धवोंसे	**ययौ**	गये ॥३६॥
अभ्यनुज्ञातः	अनुमति लेकर		

इति श्रीमद्भागवते महापुराणे वैयासिक्यां अष्टादशसाहस्र्यां
पारमहंस्यां संहितायां प्रथमस्कन्धे द्वादशोऽध्यायः

अथ त्रयोदशोऽध्यायः

सूत उवाच–

विदुरस्तीर्थयात्रायां मैत्रेयादात्मनो गतिम् ।
ज्ञात्वागाद्धास्तिनपुरं तयावाप्तविवित्सितः ॥१॥

विदुरः तीर्थयात्रायां मैत्रेयात् आत्मनः गतिं ज्ञात्वा अगात् हास्तिनपुरं तया वाप्त विवित्सितः ॥ १ ॥

विदुरः	विदुरजी	तया	उससे
तीर्थयात्रायां	तीर्थयात्रामें	विवित्सितः	जिज्ञासाकी
मैत्रेयात्	मैत्रेयजीसे	वाप्त	शान्ति होजाने पर
आत्मनः	आत्माका	हास्तिनपुरं	हस्तिनापुर
गतिं	स्वरूप	अगात्	आये ॥१॥
ज्ञात्वा	जानकर,		

यावतः कृतवान् प्रश्नान् क्षत्ता कौषारवाग्रतः ।
जातैकभक्तिर्गोविन्दे तेभ्यश्चोपरराम ह ॥२॥

यावतः कृतवान् प्रश्नान् क्षत्ता कौषारव अग्रतः जातः एक भक्तिः गोविन्दे तेभ्यः च उपरराम ह ॥ २ ॥

क्षत्ता	विदुरने	भक्तिः	भक्ति
यावतः	जितने	जातः	उत्पन्न हो जानेपर
प्रश्नान्	प्रश्न	ह	निश्चित रूपसे
कौषारव	मैत्रेयके	तेभ्यः	उन (प्रश्नोंके उत्तर)
अग्रतः	सामने		के प्रति
कृतवान्	किये थे	च	भी
गोविन्दे	गोविन्दमें	उपरराम	उपराम होगये ॥२॥
एक	अनन्य		

तं बन्धुमागतं दृष्ट्वा धर्मपुत्रः सहानुजः ।
धृतराष्ट्रो युयुत्सुश्च सूतः शारद्वतः पृथा ॥३॥

तं बन्धुं आगतं दृष्ट्वा धर्मपुत्रः सह अनुजः धृतराष्ट्रः युयुत्सुः च सूतः शारद्वतः पृथा ॥ ३ ॥

तं	उन	**धर्मपुत्रः**	युधिष्ठिर,
बन्धुं	अपने बन्धु (चचा) को	**धृतराष्ट्रः**	धृतराष्ट्र
		च	और
आगतं	आया	**युयुत्सुः**	युयुत्सु,
दृष्ट्वा	देखकर	**सूतः**	संजय,
अनुजः	भाइयोंके	**शारद्वतः**	कृपाचार्य,
सह	सहित	**पृथा**	कुन्ती ॥३॥

गान्धारी द्रौपदी ब्रह्मन् सुभद्रा चोत्तरा कृपी ।
अन्याश्च जामयः पाण्डोर्ज्ञातयः ससुताः स्त्रियः ॥४॥

गान्धारी द्रौपदी ब्रह्मन् सुभद्रा च उत्तरा कृपी अन्याः च जामयः पाण्डोः ज्ञातयः ससुताः स्त्रियः ॥ ४ ॥

ब्रह्मन्	शौनकजी !	**च**	एवं
गान्धारी	गान्धारी,	**अन्याः**	दूसरे
द्रौपदी	द्रौपदी,	**पाण्डोः**	पाण्डुके
सुभद्रा	सुभद्रा,	**जामयः**	परिवारके
च	और	**ज्ञातयः**	जातिवाले
उत्तरा	उत्तरा,	**ससुताः**	पुत्रोंके साथ
कृपी	कृपी,	**स्त्रियः**	स्त्रियोंके साथ ॥४॥

प्रत्युज्जग्मुः प्रहर्षेण प्राणं तन्व इवागतम् ।
अभिसंगम्य विधिवत् परिष्वङ्गाभिवादनैः ॥५॥

प्रतिजग्मुः प्रहर्षेण प्राणं तन्व इव आगतं अभिसंगम्य विधिवत् परिष्वंग अभिवादनैः ॥ ५ ॥

प्रहर्षेण	अत्यन्त हर्षसे	विधिवत्	विधिके अनुसार
तन्वः	शरीरमें	परिष्वंग	आलिंगन
प्राणं	प्राण	अभिवादनैः	अभिवादन आदिसे
आगतं	आगये	अभिसंगम्य	भली प्रकार
इव	के समान		मिलकर ॥५॥
प्रतिजग्मुः	(अगवानी करने) उनकी ओर गये,		

मुमुचुः प्रेमबाष्पौघं विरहौत्कण्ठ्यकातराः ।
राजा तमर्हयाञ्चक्रे कृतासनपरिग्रहम् ॥६॥

मुमुचुः प्रेम बाष्प ओघं विरह उत्कण्ठ्य कातराः राजा तं अर्हयां चक्रे कृत आसन परिग्रहम् ॥ ६ ॥

विरह	वियोग जन्म	आसन	आसन
उत्कण्ठ्य	उत्कण्ठासे	परिग्रहं	स्वीकार
कातराः	आकुल	कृत	करके (बैठ जानेपर)
प्रेम	प्रेमके	राजा	युधिष्ठिरने
बाष्प	आंसुओंके	तं	उनकी
ओघं	प्रवाह	अर्हयां	पूजा
मुमुचुः	बहाने लगे ।	चक्रे	की ॥६॥

तं भुक्तवन्तं विश्रान्तमासीनं सुखमासने ।
प्रश्रयावनतो राजा प्राह तेषां च शृण्वताम् ॥७॥

तं भुक्तवन्तं विश्रान्तं आसीनं सुखं आसने प्रश्रय अवनतः राजा प्राह तेषां च शृण्वताम् ॥ ७ ॥

तं	उन विदुरजीके	तेषां	उन सबके
भुक्तवन्तं	भोजन करके,	च	भी
विश्रान्तं	विश्राम करके,	शृण्वतां	सुनते हुए
आसनं	आसनपर	प्रश्रय	विनयसे
सुखं	सुखपूर्वक	अवनतः	विनम्र होकर
आसने	बैठ जानेपर	प्राह	पूछा ॥७॥
राजा	युधिष्ठिरने		

युधिष्ठिर उवाच–

अपि स्मरथ नो युष्मत्पक्षच्छायासमेधितान् ।
विपद्गणाद्विषाग्न्यादेर्मोचिता यत्समातृकाः ॥८॥

अपि स्मरथ नः युष्मत् पक्षच्छाया समेधितान् विपद् गणात् विष अग्न्यादेः मोचिता यत् समातृकाः ॥ ८ ॥

नः	हम सब	**विपद् गणात्**	विपत्तियोंसे
युष्मत्	आपकी	**यत्**	क्योंकि
पक्षच्छाया	(पक्षी शावकोंकी भाँति) पंखोंकी छायासे	**मोचिता**	(आप द्वारा) छुड़ाये गये हैं
समेधितान्	पाले-पोषे गये हैं,	**अपि**	(अतः) क्या
समातृकाः	माताके साथ	**स्मरथ**	(कभी आप हमारा) स्मरण करते थे ? ॥१८॥
विष	विष		
अग्न्यादेः	अग्नि आदि		

कया वृत्त्या वर्तितं वश्चरद्भिः क्षितिमण्डलम् ।
तीर्थानि क्षेत्रमुख्यानि सेवितानीह भूतले ॥९॥

कया वृत्त्या वर्तितं वः चरद्भिः क्षितिमण्डलं तीर्थानि क्षेत्रमुख्यानि सेवितानि इह भूतले ॥ ९ ॥

वः	आपने	**इह**	इस
क्षितिमण्डलं	पृथ्वीपर	**भूतले**	पृथ्वीपर
चरद्भिः	विचरण करते हुए	**तीर्थानि**	तीर्थोंमें
कया	किस	**क्षेत्रमुख्यानि**	मुख्य मुख्य स्थानोंमें (किनका)
वृत्त्या	वृत्तिसे	**सेवितानि**	सेवन किया ॥८॥
वर्तितं	वर्ताव (जीवन निर्वाह) किया ?		

भवद्विधा भागवतास्तीर्थभूताः स्वयं विभो ।
तीर्थीकुर्वन्ति तीर्थानि स्वान्तःस्थेन गदाभृता ॥१०॥

भवत् विधा भागवताः तीर्थीभूता स्वयं विभो तीर्थीं कुर्वन्ति तीर्थानि स्व अन्तस्थेन गदाभृताः ॥ १० ॥

विभो	प्रभो !	**स्व**	अपने
भवत्	आपके	**अन्तस्थेन**	हृदयमें
विधा	समान	**गदाभृताः**	भगवान गदाधरके होनेसे
भागवताः	भगवद् भक्त		
स्वयं	स्वयं ही	**तीर्थानि**	तीर्थोंको
तीर्थीभूताः	तीर्थ स्वरूप होकर	**तीर्थीं कुर्वन्ति**	तीर्थ बनातेहैं ॥१०॥

अपि नः सुहृदस्तात बान्धवाः कृष्णदेवताः ।
दृष्टाः श्रुता वा यदवः स्वपुर्यां सुखमासते ॥११॥

अपि नः सुहृदः तात बान्धवाः कृष्णदेवताः दृष्टाः श्रुता वा यदवः स्व पुर्यां सुखं आसते ॥ ११ ॥

तात	चाचाजी !	**दृष्टाः**	(आपको) दीखे
नः	हमारे	**वा**	अथवा
सुहृदः	सुहृद	**श्रुता**	उनका समाचार (आपने) सुना ?
बान्धवाः	सन्बन्धी		
कृष्णदेवताः	श्रीकृष्ण ही जिनके देवता हैं वे	**स्व**	(वे) अपनी
		पुर्यां	पुरीमें
यदवः	यदुवंशी	**सुखं**	सुखपूर्वक
अपि	क्या	**आसते**	हैं ? ॥११॥

*सूत उवाच**–

इत्युक्तो धर्मराजेन सर्वं तत् समवर्णयत् ।
यथानुभूतं क्रमशो विना यदुकुलक्षयम् ॥१२॥

इति उक्तः धर्मराजेन सर्वं तत् समवर्णयत् यथा अनुभूतं क्रमशः विना यदुकुल क्षयम् ॥ १२ ॥

---

* यह उवाच अन्य प्रतियोंमें नहीं है ।

इति	इस प्रकार	सर्वं	सब
धर्मराजेन	युधिष्ठिर द्वारा	यदुकुल	यदुकुलके
उक्तः	कहे (पूछे) जानेपर	क्षयं	संहारको
यथा	जैसा	विना	छोड़कर
अनुभूतं	अनुभव किया था	समवर्णयत्	भली प्रकार वर्णन
क्रमशः	क्रमशः		किया ॥१२॥
तत्	वह		

नन्वप्रियं दुर्विषहं नृणां स्वयमुपस्थितम् ।
नावेदयत् सकरुणो दुःखितान् द्रष्टुमक्षमः ॥१३॥

ननु अप्रियं दुर्विषहं नृणां स्वयं उपस्थितं न आवेदयत् स करुणः दुःखितान् द्रष्टुं अक्षमः ॥ १३ ॥

ननु	सम्भवतः	दुःखितान्	दुःखियोंको
नृणां	मनुष्योंके लिए	द्रष्टुं	देखनेमें
अप्रियं	अप्रिय,	अक्षमः	असमर्थ
दुर्विषहं	असह्य,	स करुणः	उन करुण हृदय
स्वयं	स्वयं		(विदुरजी) ने
उपस्थितं	प्रकट होनेवाली	न	नहीं
	(घटनाको)	आवेदयेत्	बतलाया ॥१३॥

कश्चित्कालमथावात्सीत्सत्कृतो देववत्सुखम् ।
भ्रातुर्ज्येष्ठस्य श्रेयस्कृत्सर्वेषां प्रीतिमावहन् ॥१४॥

कंचित् कालं अथ अवात्सीत् सत्कृतः देववत् सुखं भ्रातुः ज्येष्ठस्य श्रेयः कृत् सर्वेषां प्रीतिं आवहन् ॥ १४ ॥

अथ	फिर (विदुरजी)	सर्वेषां	सबकी
देववत्	देवताओंके समान	प्रीतिं	प्रसन्नता
सत्कृतः	सत्कार पाते हुए	आवहन्	सम्पन्न करते हुए
ज्येष्ठस्य	बड़े	कञ्चित्	कुछ
भ्रातुः	भाई (धृतराष्ट्र) का	कालं	समयतक
श्रेयः	कल्याण	सुखं	सुखपूर्वक (वहाँ)
कृत	करनेके लिए,	अवात्सीत	बसे रहे ॥१४॥

अबिभ्रदर्यमा दण्डं यथावदघकारिषु ।
यावद्दधार शूद्रत्वं शापाद्वर्षशतं यमः ॥१५॥

अविभ्रत् अर्यमा दण्डं यथावत् अघकारिषु यावत् दधार शूद्रत्वं शापात् वर्षशतं यमः ॥ १५ ॥

वर्षशतं	सौ वर्ष	अघकारिषु	पापियोंके लिए
यावत्	पर्यन्त	यथावत्	ठीक ठीक
शापात्	शापके कारण	दण्डं	दण्ड-विधान
यमः	यमराज	अर्यमा	अर्यमा
शूद्रत्वं	शूद्रत्व (विदुर रूप)	अविभ्रत्	करते रहे ॥१५॥
दधार	धारण किये रहे, (तब तक)		

युधिष्ठिरो लब्धराज्यो दृष्ट्वा पौत्रं कुलंधरम् ।
भ्रातृभिर्लोकपालाभैर्मुमुदे परया श्रिया ॥१६॥

युधिष्ठिरः लब्ध राज्यः दृष्ट्वा पौत्रं कुलंधरं भ्रातृभिः लोकपालाभैः मुमुदे परया श्रिया ॥ १६ ॥

युधिष्ठिरः	युधिष्ठिर	लोकपालाभैः	लोकपालोंके समान तेजस्वी
राज्यः	राज्य	भ्रातृभिः	भाइयोंके साथ
लब्ध	पाकर,	परया	परम
कुलन्धरं	कुल चलानेवाला	श्रिया	सम्पत्तिसे
पौत्रं	पौत्र	मुमुदे	आनन्दित हुए ॥१६॥
दृष्ट्वा	देखकर,		

एवं गृहेषु सक्तानां प्रमत्तानां तदीहया ।
अत्यक्रामदविज्ञातः कालः परमदुस्तरः ॥१७॥

एवं गृहेषु सक्तानां प्रमत्तानां तत् ईहया अत्यक्रामत् अविज्ञातः कालः परम दुस्तरः ॥ १७ ॥

एवं	इस प्रकार	सक्तानां	आसक्त
गृहेषु	घरमें	तत्	उसी (गृह सुख) की

ईहया	इच्छासे	परमदुस्तरः	अत्यन्त दुस्तर
प्रमत्तानां	असावधान (पाण्डवों) का	कालः	समय (जीवन)
		अत्यक्रामत्	बीत गया ॥१७॥
अविज्ञातः	अनजानमें ही		

विदुरस्तदभिप्रेत्य धृतराष्ट्रमभाषत ।
राजन्निर्गम्यतां शीघ्रं पश्येदं भयमागतम् ॥१८॥

विदुरः तत् अभिप्रेत्य धृतराष्ट्रं अभाषत राजन् निर्गम्यता शीघ्रं पश्य इदं भयं आगतम् ॥ १८ ॥

तत्	उस (काल) को	शीघ्रं	शीघ्र
अभिप्रेत्य	पहचानकर	निर्गम्यतां	निकल चलिये,
विदुरः	विदुरजीने	इदं	इस
धृतराष्ट्रं	धृतराष्ट्रको	आगतं	आते हुए
अभाषत	कहा—	भयं	भयको
राजन्	राजन् !	पश्य	देखिये ॥१८॥

प्रतिक्रिया न यस्येह कुतश्चित्कर्हिचित्प्रभो ।
स एव भगवान् कालः सर्वेषां नः समागतः ॥१९॥

प्रतिक्रिया न यस्य इह कुतश्चित् कर्हिचित् प्रभो स एव भगवान् कालः सर्वेषां न समागतः ॥ १९ ॥

प्रभो	स्वामी !	स एव	वही
इह	इस संसारमें	भगवान्	भगवान
यस्य	जिसकी	कालः	काल
प्रतिक्रियाः	प्रतिकार	नः	हम
कुतश्चित्	कहीं भी	सर्वेषां	सबके लिए
कर्हिचित्	कभी भी	समागतः	आगये हैं ॥१९॥
न	नहीं है,		

येन चैवाभिपन्नोऽयं प्राणैः प्रियतमैरपि ।
जनः सद्यो वियुज्येत किमुतान्यैर्धनादिभिः ॥२०॥

येन च एव अभिपन्नः अयं प्राणैः प्रियतमैः अपि जनः सद्यः वियुज्येत किं उत अन्यैः धनादिभिः ॥ २० ॥

येन	जिन (काल) के	सद्यः	तत्काल
अभिपन्नः	वशीभूत होकर	च	ही
अयं	यह	वियुज्येत एव	वियुक्त हो जाता ही है,
जनः	मनुष्य		
प्रियतमैः	प्रियतम	अन्यैः	दूसरे
प्राणैः	प्राणोंसे	धनादिभिः	धन-पदार्थोंकी
अपि	भी	किंउत	चर्चा ही क्या ॥२०॥

पितृभ्रातृसुहृत्पुत्रा हतास्ते विगतं वयः ।
आत्मा च जरया ग्रस्तः परगेहमुपाससे ॥२१॥

पितृ भ्रातृ सुहृत् पुत्रा हताः ते विगतं वयः आत्मा च जरया ग्रस्तं परगेहं उपाससे ॥ २१ ॥

ते	आपके	च	और
पितृ	पिता (चाचा भीष्म)	आत्मा	शरीर
भ्रातृ	भाई	जरया	बुढ़ापेसे
सुहृत्	सम्बन्धी	ग्रस्तं	ग्रस्त है
पुत्रा	पुत्र	पर	शत्रुओंके
हताः	मारे गये	गेहं	घरमें
वयः	आयु	उपाससे	रह रहे हो ॥२१॥
विगतं	बीत चुकी		

अहो महीयसी जन्तोर्जीविताशा यया भवान् ।
भीमापवर्जितं पिण्डमादत्ते गृहपालवत् ॥२२॥

अहो महीयसी जन्तोः जीवित आशा यया भवाम् भीम अपवर्जितं पिण्डं आदत्ते गृहपाल वत् ॥ २२ ॥

अहो	अहो	जीवित	जीवित रहनेकी
जन्तोः	प्राणीकी	आशा	आशा

महीयसी	बलवान है	**पिण्डं**	टुकड़ा
यया	(क्योंकि) उसीके कारण	**गृहपाल**	कुत्ते
		वत्	के समान
भवान्	आप	**आदत्ते**	स्वीकार करते हैं ॥२२॥
भीम	भीमसेनके द्वारा		
अपवर्जितं	फेंका गया		

अग्निर्निसृष्टो दत्तश्च गरो दाराश्च दूषिताः ।
हृतं क्षेत्रं धनं येषां तद्दत्तैरसुभिः कियत् ॥२३॥

अग्निः निसृष्टः दत्तः च गरः दाराः च दूषिताः हृतं क्षेत्रं धनं येषां तत् दत्तैः असुभिः कियत् ॥ २३ ॥

येषां	जिनके लिए	**दूषिताः**	अपमानित किया
अग्नि	अग्निमें	**क्षेत्रं**	(जिनकी) भूमि
निसृष्टः	जलानेका प्रयत्न किया	**धनं**	धन
		हृतं	छीन लिया
च	और	**तत्**	उनके
गरः	विष	**दत्तैः**	दिये हुए
दत्तः	दिया	**असुभिः**	प्राण (जीवन) में
च	एवं	**कियत्**	कितना
दाराः	(जिनकी) पत्नीको		(गौरव है) ॥२३॥

तस्यापि तव देहोऽयं कृपणस्य जिजीविषोः ।
परैत्यनिच्छतो जीर्णो जरया वाससी इव ॥२४॥

*'द्वापरादौ' का अर्थ सभी टीकाकारोंने 'द्वापर है आदिमें जिसके उस कलियुगके प्रारम्भमें अर्थात् द्वापरके अन्तमें' यह किया है ।

तत् अहं ते अभिधास्यामि महापौरुषिकः भवान् यस्य श्रद्दधतां आशु स्यात् मुकुन्दे मतिः सती ॥१०॥

यस्य	जिसपर	तत्	वह
श्रद्दधतां	श्रद्धा करनेसे	अहं	मैं
आशु	शीघ्र	ते	तुमको
मुकुन्दे	भगवान् मुकुन्दमें	अभिधास्यामि	सुनाऊँगा (क्योंकि)
सती	पवित्र	भवान्	तुम
मतिः	बुद्धि	महापौरुषिकः	भगवान् पुरुषोत्तमके
स्यात्	हो (लग) जाती है		(प्रिय) हो ॥१०॥

एतन्निर्विद्यमानानामिच्छतामकुतोभयम् ।
योगिनां नृप निर्णीतं हरेर्नामानुकीर्तनम् ॥११॥

एतत् निर्विद्यमानानां इच्छतां अकुतः अभयं योगिनां नृप निर्णीतं हरेः नाम अनुकीर्तनम् ॥११॥

अकुतः	सर्वत्रसे	निर्णीतं	निर्णय किया गया है
अभयं	अभय (मोक्षपद)		(कि)
इच्छतां	चाहनेवाले	हरेः	श्रीहरिके
निर्विद्यमानानां	वैराग्यवान्	नाम	नामोंका
योगिनां	योगियोंके लिए भी	अनुकीर्तनं	बार-बार कीर्तन
नृप	राजन् !		(किया जाय) ॥११॥
एतत्	यही		

किं प्रमत्तस्य बहुभिः परोक्षैर्हायनैरिह ।
वरं मुहूर्तं विदितं घटेत श्रेयसे यतः ॥१२॥

किं प्रमत्तस्य बहुभिः परोक्षैः हायनैः इह वरं मुहूर्तं विदितं घटेत श्रेयसे यतः ॥१२॥

प्रमत्तस्य	प्रमादग्रस्त (असावधान व्यक्ति) की	परोक्षैः बहुभिः	अनजानमें (बीतनेवाले) बहुतसे
		हायनैः	(आयुके) अनेक वर्षोंसे

इह	इस संसारमें	वरं	श्रेष्ठ है
किं	क्या लाभ ?	यतः	जिससे
विदितं	ज्ञानपूर्वक	श्रेयसे	कल्याणके लिए
मुहूर्तं	एक मुहूर्त भी (जीवन)	घटेत	चेष्टाकी जाय ॥१२॥

खट्वाङ्गो नाम राजर्षिर्ज्ञात्वेयत्तामिहायुषः ।
मुहूर्तात्सर्वमुत्सृज्य गतवानभयं हरिम् ॥१३॥

खट्वाङ्गः नाम राजर्षिः ज्ञात्वा यत्तां इह आयुषः मुहूर्तात् सर्वं उत्सृज्य गतवान् अभयं हरिम् ॥१३॥

खट्वाङ्गः	खट्वाङ्ग	सर्वं	सब कुछ
नाम	नामक	उत्सृज्य	त्यागकर
राजर्षिः	राजर्षि	मुहूर्तात्	एक मुहूर्तमें (ही)
इह	इस लोकमें	अभयं	अभय स्वरूप
आयुषः	(अपनी) आयुकी	हरिं	श्रीहरिको
यत्तां	अवधि	गतवान्	प्राप्त होगये ॥१३॥
ज्ञात्वा	जानकर,		

तवाप्येतर्हि कौरव्य सप्ताहं जीवितावधिः ।
उपकल्पय तत्सर्वं तावद्यत्साम्परायिकम् ॥१४॥

तव अपि एतः हि कौरव्य सप्ताहं जीविताः अवधिः उपकल्पय तत् सर्वं तावत् यत् साम्परायिकम् ॥१४॥

कौरव्य	परीक्षित् !	तावत्	तब तक
हि	क्योंकि	यत्	जो
तव	तुम्हारी	साम्परायिकं	पारलौकिक (हित) के लिए हो
अपि	भी		
एतः	यहाँ	तत्	वह
जीविताः	जीवनकी	सर्वं	सब
अवधिः	अवधि	उपकल्पय	करलो ॥१३॥
सप्ताहं	सात दिनकी है;		

अन्तकाले तु पुरुष आगते गतसाध्वसः ।
छिन्द्यादसङ्गशस्त्रेण स्पृहां देहेऽनु ये च तम् ॥१५॥

अन्तकाले तु पुरुषः आगते गतः साध्वसः छिन्द्यात् असङ्ग शस्त्रेण स्पृहां देहे अनु ये च तम् ॥१५॥

पुरुषः	पुरुष	देहे	शरीरमें (और)
तु	तो	ये	जो
अन्तकाले	अन्त समय	च	भी
आगते	आ जानेपर,	तं	उस (शरीर) के
साध्वसः	घबड़ाहट	अनु	पीछे (परिवार,
गतः	छोड़कर,		नाम आदि हैं)
असङ्ग	अनासक्तिके	स्पृहां	(उनकी) स्पृहा
शस्त्रेण	शस्त्रसे	छिन्द्यात्	काट दे ॥१५॥

गृहात् प्रव्रजितो धीरः पुण्यतीर्थजलाप्लुतः ।
शुचौ विविक्त आसीनो विधिवत्कल्पितासने ॥१६॥

गृहात् प्रव्रजितः धीरः पुण्य तीर्थ जल आप्लुतः शुचौ विविक्त आसीनः विधिवत् कल्पित आसने ॥ १६ ॥

धीरः	धीर पुरुष	विविक्त	एकान्तमें
गृहात्	घरसे	विधिवत्	विधिपूर्वक (कुश,
प्रव्रजितः	निकलकर		मृगचर्म,वस्त्र क्रमशः
पुण्य	पवित्र		बिछाकर)
तीर्थ	तीर्थ (में जाकर वहाँ)	कल्पित	बनाये
जल	जलमें	आसने	आसनपर
आप्लुतः	स्नान करके	आसीनः	बैठकर ॥१६॥
शुचौ	पवित्र (तथा)		

अभ्यसेन्मनसा शुद्धं त्रिवृद्ब्रह्माक्षरं परम् ।
मनो यच्छेज्जितश्वासो ब्रह्मबीजमविस्मरन् ॥१७॥

अभ्यसेत् मनसा शुद्धं त्रिवृत् ब्रह्म अक्षरं परं मनः यच्छेत् जितश्वासः ब्रह्मबीजं अविस्मरन् ॥१७॥

शुद्धं	शुद्ध	ब्रह्मबीजं	(इस) वेदके बीज (प्रणव) को
मनसा	मनसे	अविस्मरन्	बराबर स्मरण करते हुए
त्रिवृत्	तीन अक्षरों (अ, उ, म) वाले	जितश्वासः	श्वासको जीतकर (प्राणायाम करके)
परं	परम	मनः	मनको
ब्रह्म	ब्रह्मस्वरूप	यच्छेत्	नियन्त्रित करे ॥१७॥
अक्षरं	अक्षर (प्रणव) का		
अभ्यसेत्	अभ्यास (जप) करे ।		

नियच्छेद्विषयेभ्योऽक्षान्मनसा बुद्धिसारथिः ।
मनः कर्मभिराक्षिप्तं शुभार्थे धारयेद्धिया ॥१८॥

नियच्छेत् विषयेभ्यः अक्षान् मनसा बुद्धिः सारथिः मनः कर्मभिः आक्षिप्तं शुभ अर्थे धारयेत् धिया ॥ १८ ॥

मनसा	मनके द्वारा	कर्मभिः	कर्म(की वासनाओं)से
बुद्धिः	बुद्धिको	आक्षिप्तं	चञ्चल
सारथिः	सारथि (प्रेरक) बनाकर	मनः	मनको
विषयेभ्यः	(शब्द, स्पर्श, रूप, रस, गन्ध) विषयोंसे	धिया	बुद्धिके द्वारा
अक्षान्	इन्द्रियोंको	शुभ	मंगलमय
नियच्छेत्	नियन्त्रित करे;	अर्थे	पदार्थ (भगवान्‌के सगुण-रूप) में
		धारयेत्	लगावे ॥१८॥

तत्रैकावयवं ध्यायेदव्युच्छिन्नेन चेतसा ।
मनो निर्विषयं युक्त्वा ततः किञ्चन न स्मरेत् ।
पदं तत्परमं विष्णोर्मनो यत्र प्रसीदति ॥१९॥

तत्र एक अवयवं ध्यायेत् अव्युच्छिन्नेन चेतसाः मनः निर्विषयं युक्त्वा ततः किञ्चन न स्मरेत् पदं तत् परमं विष्णोः मनः यत्र प्रसीदति ॥१९॥

अव्युच्छिन्नेन	स्थिर	तत्र	वहाँ (भगवानके श्रीअंगमें-से)
चेतसाः	चित्तसे	एक	एक-एक

अवयवं	अंगका (क्रमशः)	तत्	वह (ध्याता, ध्येय रहित मन ही)
ध्यायेत्	ध्यान करे।	विष्णोः	व्यापक भगवान्‌का
निर्विषयं	(इसके बाद) निर्विषय (ध्येय विषयको छोड़कर)	परमं	परम
		पदं	पद है
मनः	मनको	यत्र	जहाँ (जिस स्थितिमें)
युक्त्वा	स्थिर करके	मनः	मन
ततः	तब	प्रसीदति	पूर्ण निर्मल हो जाता है ॥१९॥
किञ्चन	कुछ भी		
न	न		
स्मरेत्	स्मरण करे।		

रजस्तमोभ्यामाक्षिप्तं विमूढं मन आत्मनः।
यच्छेद्धारणया धीरो हन्ति या तत्कृतं मलम् ॥२०॥

रजः तमोभ्यां आक्षिप्तं विमूढं मनः आत्मनः यच्छेत् धारणया धीरः हन्ति या तत् कृतं मलम् ॥ २० ॥

आत्मनः	अपना	यच्छेत्	(उस मनको) नियन्त्रित करे,
मनः	मन		
रजः	रजोगुणसे	या	जो (धारणा)
आक्षिप्तं	चञ्चल हो (या)	तत्	उन (रजोगुण, तमोगुण) से
तमोभ्यां	तमोगुणसे		
विमूढं	विमूढ (लय) हो	कृतं	उत्पन्न
धीरः	(तो) धैर्यपूर्वक	मलं	दोषको
धारणया	(भगवान्‌के रूपकी) धारणा करके	हन्ति	नष्ट कर देती है ॥२०॥

यस्यां संधार्यमाणायां योगिनो भक्तिलक्षणः।
आशु सम्पद्यते योग आश्रयं भद्रमीक्षतः ॥२१॥

यस्यां संधार्यमाणायां योगिनः भक्ति लक्षणः आशु सम्पद्यते योगः आश्रयं भद्रं ईक्षतः ॥ २१ ॥

यस्यां	जिस (धारणा) के	**योगिनः**	योगियोंमें
संधार्यमाणायां	भली प्रकार धारण करनेसे	**भक्तिलक्षण योगः**	भक्तिके लक्षणवाले भक्तियोगकी
भद्रं	कल्याणमय	**आशु**	शीघ्र
आश्रयं	आश्रय (श्रीभगवान्‌के स्वरूप) को	**सम्पद्यते**	पूर्ण प्राप्ति हो जाती है ।।२१।।
ईक्षतः	देखते हुए		

राजोवाच–

यथा संधार्यते ब्रह्मन् धारणा यत्र सम्मता ।
यादृशी वा हरेदाशु पुरुषस्य मनोमलम् ।।२२।।

यथा संधार्यते ब्रह्मन् धारणाः यत्र सम्मताः यादृशीः वा हरेत् आशु पुरुषस्य मनः मलम् ।। २२ ।।

ब्रह्मन्	ब्रह्मन् !	**संधार्यते**	धारण की जाती है
पुरुषस्य	पुरुषके	**यत्र**	जहाँ (भीतर-बाहर स्थानमें)
मनः	मनके	**सम्मताः**	विहित है
मलं	मलको	**वा**	अथवा
आशु	शीघ्र	**यादृशीः**	जैसी है (वह बतलाइये) ।।२२।।
हरेत्	हरण करनेवाली		
धारणाः	धारणा		
यथा	जैसे		

श्रीशुक उवाच–

जितासनो जितश्वासो जितसङ्गो जितेन्द्रियः ।
स्थूले भगवतो रूपे मनः संधारयेद्धिया ।।२३।।

जितासनः जितश्वासः जितसङ्गः जितेन्द्रियः स्थूले भगवतः रूपे मनः संधारयेत् धिया ।। २३ ।।

जितेन्द्रियः	इन्द्रियोंको जीतकर,	**जितश्वासः**	श्वासको नियन्त्रित करके
जितसङ्गः	आसक्तियोंको त्यागकर,	**जितासनः**	आसनको जीतकर

भगवतः	भगवान्के	धिया	बुद्धिके द्वारा
स्थूले	स्थूल	मनः	मनको
रूपे	रूपमें	सधारयेत्	लगावे ॥२३॥

विशेषस्तस्य देहोऽयं स्थविष्ठश्च स्थवीयसाम् ।
यत्रेदं दृश्यते विश्वं भूतं भव्यं भवच्च सत् ॥२४॥

विशेषः तस्य देहः अयं स्थविष्ठः च स्थवीयसां यत्र इदं दृश्यते विश्वं भूतं भव्यं भवत् च सत् ॥ २४ ॥

यत्र	जिसमें	अयं	यह
इदं	यह	तस्य	उनका (भगवान्का)
विश्वं दृश्यते	विश्व दीखता है,	स्थवीयसां	स्थूलोंमें
भूतं	कभी था,	स्थविष्ठः	सबसे स्थूल
भवत्	है	च	और
च	और	विशेषः	विशेष (विराट्)
भव्यं	होगा	देहः	शरीर (है)॥२४॥
सत्	सत्स्वरूपसे		

आण्डकोशे शरीरेऽस्मिन् सप्तावरणसंयुते ।
वैराजः पुरुषो योऽसौ भगवान् धारणाश्रयः ॥२५॥

आण्डकोशेः शरीरे अस्मिन् सप्त आवरण संयुते वैराजः पुरुषः यः असौ भगवान् धारणाः आश्रयः ॥ २५ ॥

सप्त	सात (जल, अग्नि, वायु, आकाश, अहंकार, महत्तत्त्व और प्रकृति)	शरीरे	शरीरमें
		यः	जो
		असौ	ये
		भगवान्	भगवान्
आवरण	आवरणोंसे	वैराजः	विराट्
संयुते	घिरे हुए	पुरुषः	पुरुष हैं (यही)
अस्मिन्	इस	धारणाः	धारणाके
आण्डकोशेः	ब्रह्माण्ड रूप	आश्रयः	आश्रय हैं ॥२५॥

पातालमेतस्य हि पादमूलं
पठन्ति पार्ष्णिप्रपदे रसातलम् ।

महातलं विश्वसृजोऽथ गुल्फौ
तलातलं वै पुरुषस्य जंघे ॥२६॥

पातालं एतस्य हि पादमूलं पठन्ति पार्ष्णिः प्रपदे रसातलं महातलं विश्वसृजः अथ गुल्फौ तलातलं वै पुरुषस्य जंघे ॥२६॥

एतस्य	इस (विराट् पुरुष) के	**अथ**	और
हि वै	क्योंकि निश्चित ही	**विश्वसृजः**	(इन) विश्वस्रष्टा (भगवान्) के
पादमूलं पातालं	पैरके तलवे पाताल हैं,	**गुल्फौ**	पैरकी दोनों गाँठें
पार्ष्णिः	एड़ियाँ (और)	**महातलं**	महातल हैं
प्रपदे	(पैरके) पञ्जे	**पुरुषस्य**	विराट् पुरुषके
रसातलं	रसातल	**जंघे**	पिण्डलियाँ
पठन्ति	कहे जाते हैं	**तलातलं**	तलातल हैं ॥२६॥

द्वे जानुनी सुतलं विश्वमूर्ते-
रूरुद्वयं वितलं चातलं च ।
महीतलं तज्जघन महीपते
नभस्तलं नाभिसरो गृणन्ति ॥२७॥

द्वे जानुनी सुतलं विश्वमूर्तेः उरुद्वयं वितलं च अतलं च महीतलं तत् जघनं महीपते नभः तलं नाभिसरः गृणन्ति ॥ २७ ॥

विश्वमूर्तेः	विश्वरूप (भगवान्)के	**जघनं**	पेडू
द्वे	दोनों	**महीतलं**	पृथ्वीतल हैं ।
जानुनी	घुटने	**महीपते**	राजन् !
सुतलं	सुतल है,	**नभःतलं**	आकाश
उरुद्वयं	दोनों जाँघें	**नाभिसरः**	(उनका) नाभि सरोवर
वितलं च	वितल और		
अतलं	अतल है,	**गृणन्ति**	कहा जाता है ॥२७॥
च तत्	और उनका		

उरःस्थलं ज्योतिरनीकमस्य
ग्रीवा महर्वदनं वै जनोऽस्य ।

तपो ररार्टीं विदुरादिपुंसः
सत्यं तु शीर्षाणि सहस्रशीर्ष्णः ॥२८॥

उरःस्थलं ज्योतिः अनीकं अस्य ग्रीवाः महः वदनं वै जनः अस्य तपः ररार्टीं विदुः आदिपुंसः सत्यं तु शीर्षाणि सहस्रशीर्ष्णः ॥ २८ ॥

अस्य	इन (भगवान्) के	ररार्टीं	ललाटको
उरःस्थलं	वक्षस्थलको	तपः	तपोलक
ज्योतिः	तारोंका	विदुः	(विद्वान्) कहते हैं
अनीकं	समुदाय (स्वर्गलोक),	अस्य	इन
ग्रीवाः	गर्दनको	आदिपुंसाः	आदि पुरुष
महः	महर्लोक,	सहस्रशीर्ष्णः	सहस्रशीर्षाका
वदनं	मुखको	शीर्षाणि	मस्तक समूह
जनः	जनलोक	तु	ही
वै	तथा	सत्यं	सत्यलोक है ॥२८॥

इन्द्रादयो बाहव आहुरुस्राः
कर्णौ दिशः श्रोत्रममुष्य शब्दः ।
नासत्यदस्रौ परमस्य नासे
घ्राणोऽस्य गन्धो मुखमग्निरिद्धः ॥२९॥

इन्द्रः आदयः बाहवः आहुः उस्राः कर्णौ दिशः श्रोत्रं अमुष्य शब्दः नासत्यदस्रौ परमस्य नासे घ्राणः अस्य गन्धः मुखं अग्निः इद्धः ॥ २९ ॥

उस्राः	(उन) उरुश्रवाकी	शब्दः	शब्द
इन्द्र आदयः	इन्द्र आदि (देवता)	श्रोत्रं	श्रवणेन्द्रिय है ।
बाहवः	भुजाएँ	परमस्य	परमपुरुष
आहुः	कही गयी हैं,	तौ	की
दिशः	दिशाएँ	नासे	नासिका छिद्र
कर्णौ	कान हैं ।	नासत्यदस्रौ	दोनों अश्विनीकुमार हैं ।
अमुष्य	उन (विराट् पुरुष) का		

अस्य	उनकी	इद्धः	प्रज्वलित
घ्राणः	घ्राण इन्द्रिय	अग्निः	अग्नि
गन्धः	गन्ध है,	मुखं	मुख है ॥२९॥

द्यौरक्षिणी चक्षुरभूत्पतङ्गः
पक्ष्माणि विष्णोरहनी उभे च ।
तद्भ्रूविजृम्भः परमेष्ठिधिष्ण्य-
मापोऽस्य तालू रस एव जिह्वा ॥३०॥

द्यौः अक्षिणीः चक्षुः अभूत् पतङ्गः पक्ष्माणि विष्णोः अहनीः उभे च तत् भ्रू विजृम्भः परमेष्ठि धिष्ण्यं आपः अस्य तालुः रस एव जिह्वाः ॥३०॥

विष्णोः	भगवान् विष्णुके	भ्रू	भौंहका
अक्षिणीः	नेत्र	विजृम्भः	विलास
द्यौः	अन्तरिक्ष है,	परमेष्ठि	ब्रह्माका
पतङ्गः	सूर्य	धिष्ण्यं	लोक है ।
चक्षुः	नेत्रेन्द्रिय	अस्य	उनका
अभूत्	है	तालुः	तालु
च	और	आपः	जल है,
उभे	दोनों	जिह्वाः	जीभ
पक्ष्माणि	पलकें	एव	ही
अहनीः	दिन-रात हैं ।	रस	रस (तत्त्व)
तत्	उनका		है ॥३०॥

छन्दांस्यनन्तस्य शिरो गृणन्ति
दंष्ट्रा यमः स्नेहकला द्विजानि ।
हासो जनोन्मादकरी च माया
दुरन्तसर्गो यदपाङ्गमोक्षः ॥३१॥

छन्दांसि अनन्तस्य शिरः गृणन्ति दंष्ट्राः यमः स्नेहकलाः द्विजानि हासः जनः उन्मादकरी च मायाः दुरन्त सर्गः यत् अपांगमोक्षः ॥ ३१ ॥

छन्दान्सि	वेदोंको	जनः	लोगोंको
अनन्तस्य	(इव) अनन्तका	उन्मादकरी	उन्मत्त कर देनेवाली
शिरः	मूर्धा (ब्रह्मरन्ध्र)	मायाः	माया
गृणन्ति	कहते हैं,	हासः	हँसी है ।
यमः	यमराज	दुरन्त	दुस्तर
दंष्ट्राः	दाढ़े हैं,	सर्गः	सृष्टि
स्नेहकलाः	सब प्रकारके स्नेह	यत्	उनका
द्विजानि	दाँत हैं	अपांगमोक्षः	कटाक्षपात
च	और		है ॥३१॥

व्रीडोत्तरोष्ठोऽधर एव लोभो
धर्मः स्तनोऽधर्मपथोऽस्य पृष्ठम् ।
कस्तस्य मेढ्रं वृषणौ च मित्रौ
कुक्षिः समुद्रा गिरयोऽस्थिसंघाः ॥३२॥

व्रीडा उत्तर अधरः एव लौभः धर्मः स्तनः अधर्म पथः अस्य पृष्ठं कः तस्य मेढ्रं वृष्णौः च मित्रौ कुक्षिः समुद्राः गिरयः अस्थि संधाः ॥३२॥

व्रीडा	लज्जा	कः	प्रजापति
उत्तरः	ऊपरका (ओष्ठ) है	तस्य	उनके
लोभः	लोभ	मेढ्रं	मूत्रेन्द्रिय हैं
एव	ही	च	तथा
अधरः	(नीचेका) ओष्ठ है ।	मित्रौ	मित्र और वरुण
धर्मः	धर्म	वृषणौ	अण्डकोष हैं ।
स्तनः	स्तन हैं,	समुद्राः	समुद्र
अधर्म	अधर्मका	कुक्षिः	कोख है, (और)
पथः	मार्ग	गिरयः	पर्वत
अस्य	इनकी	अस्थि	हड्डियोंके
पृष्ठं	पीठ है ।	संधाः	समूह हैं ॥३२॥

नद्योऽस्य नाड्योऽथ तनूरुहाणि
महीरुहा विश्वतनोर्नृपेन्द्र ।

अनन्तवीर्यः श्वसितं मातरिश्वा
गतिर्वयः कर्म गुणप्रवाहः ॥३३॥

नद्यः अस्य नाड्यः अथ तनूरुहाणि महीरुहाः विश्वतनोः नृपेन्द्र अनन्तवीर्यः श्वसितं मातरिश्वा गतिः वयः कर्मः गुणप्रवाह ॥ ३३ ॥

नृपेन्द्र	राजन् !	**वीर्यः**	पराक्रमी
अस्य	इन	**मातरिश्वा**	वायु
विश्वतनोः	विश्वरूपकी	**श्वसितं**	श्वास है,
नद्यः	नदियाँ	**वयः**	काल
नाड्यः	नाड़ियाँ हैं	**गतिः**	चाल है,
अथ	तथा	**गुण प्रवाहः**	त्रिगुणोंका प्रवाह
महीरुहाः	वृक्ष	**कर्मः**	(उनका) कर्म
तनूरुहाणि	रोम हैं,		है ॥३३॥
अनन्त	अनन्त		

ईशस्य केशान् विदुरम्बुवाहान्
वासस्तु संध्यां कुरुवर्य भूम्नः ।
अव्यक्तमाहुर्हृदयं मनश्च
स चन्द्रमाः सर्वविकारकोशः ॥३४॥

ईशस्य केशान् विदुः अम्बुवाहान् वासः तु सन्ध्यां कुरुवर्य भूम्नः अव्यक्तं आहुः हृदयं मनः च स चन्द्रमा सर्वविकार कोशः ॥ ३४ ॥

कुरुवर्य	कुरुश्रेष्ठ (परीक्षित) !	**हृदयं**	हृदय
ईशस्य	(इन) ईश्वरके	**अव्यक्तं**	प्रकृतिको
केशान्	बाल	**आहुः**	कहा गया है
अम्बुवाहान्	मेघ	**च**	तथा
विदुः	जाने जाते हैं,	**सर्वविकार**	सब विकारोंका
वासः	वस्त्र	**कोशः**	खजाना
तु	तो	**मनः**	(उनका) मन
सन्ध्यां	सन्ध्या है ।	**स**	वह
भूम्नः	(इन) सर्वव्यापकका	**चन्द्रमा**	चन्द्रमा है ॥३४॥

विज्ञानशक्तिं महिमामनन्ति
सर्वात्मनोऽन्तःकरणं गिरित्रम् ।
अश्वाश्वतर्युष्ट्रगजा नखानि
सर्वे मृगाः पशवः श्रोणिदेशे ॥३५॥

विज्ञान शक्तिं महिमां आमनन्ति सर्वात्मनः अन्तःकरणं गिरित्रं अश्वः अश्वतरिः उष्ट्रः गजाः नखानि सर्वे मृगाः पशवः श्रोणिदेशे ॥३५॥

महिमां	महत्तत्त्वको	गजाः	हाथी
विज्ञानशक्तिं	(उनका) चित्त	नखानि	(उनके) नख हैं ।
आमनन्ति	कहते हैं ।	सर्वे	(दूसरे) सब
सर्वात्मनः	(इन) सर्वात्माका	मृगाः	मृगादि
अन्तःकरणं	अन्तःकरण	पशवः	पशु
गिरित्रं	अहंकार शिव हैं ।	श्रोणिदेशे	(उनके) नितम्ब
अश्वः	घोड़े,		भागमें स्थित
अश्वतरिः	खच्चर,		हैं ॥३५॥
उष्ट्रः	ऊँट,		

वयांसि तद्व्याकरणं विचित्रं
मनुर्मनीषा मनुजो निवासः ।
गन्धर्वविद्याधरचारणाप्सरः
स्वरस्मृतीरसुरानीकवीर्यः ॥३६॥

वयांसि तत् व्याकरणं विचित्रं मनुः मनीषाः मनुजः निवासः गन्धर्व विद्याधर चारण अप्सरः स्वरस्मृतीः असुर अनीकः वीर्यः ॥३६॥

वयांसि	पक्षीगण	मनुजः	मनुष्य
तत्	उनका	निवासः	(उनके) निवास
विचित्रं	विचित्र		(भवन) हैं
व्याकरणं	कौशल हैं ।	गन्धर्व	गन्धर्व,
मनुः	(स्वायम्भुव) मनु	विद्याधर	विद्याधर,
मनीषाः	(उनकी) बुद्धि हैं,	चारण	चारण (किन्नर)

अप्सरः	अप्सराएँ (उनके)	अनीकः	सेना
स्वरस्मृतिः	(षडजादि) स्वरोंकी स्मृतियाँ हैं	वीर्यः	(उनका) पराक्रम है ॥३६॥
असुर	असुरोंकी		

ब्रह्माननं क्षत्रभुजो महात्मा
विड्ूरुरङ्घ्रिश्रितकृष्णवर्णः ।
नानाभिधाभीज्यगणोपपन्नो
द्रव्यात्मकः कर्म वितानयोगः ॥३७॥

ब्रह्म आननं क्षत्र भुजौ महात्मा विड् उरुः अङ्घ्रिश्रित कृष्णवर्णः नाना अभिधाभि इज्य गणोपन्नः द्रव्यात्मकः कर्म वितान योगः ॥३७॥

महात्मा	विराट् पुरुषके	नाना	अनेक
ब्रह्म	ब्राह्मण	अभिधाभिः	नामोंसे (देवताओंकी) जो
आननं	मुख,		
क्षत्र	क्षत्रिय	द्रव्यात्मकः	अनेक द्रव्योंसे
भुजौ	भुजाएँ,	गणोपन्नः	अनेक लोगों द्वारा
विड्	वैश्य	इज्य	पूजा होती है
उरुः	उरु (जंघाएँ),		(यह उनका)
कृष्णवर्णः	शूद्र	कर्म वितान	कर्म-विस्तार रूप
अंघ्रिश्रित	चरण स्वरूप हैं ।	योगः	योग है ॥३७॥

इयानसावीश्वरविग्रहस्य
यः संनिवेशः कथितो मया ते ।
संधार्यतेऽस्मिन् वपुषि स्थविष्ठे
मनः स्वबुद्ध्या न यतोऽस्ति किञ्चित् ॥३८॥

इयान् असौ एव ईश्वर विग्रहस्य यः सन्निवेशः कथितः मया ते संधार्यते अस्मिन् वपुषि स्थविष्ठे मनः स्व बुद्ध्या न यतः अस्ति किञ्चित् ॥ ३८ ॥

ईश्वर	ईश्वरके	असौ	यह
विग्रहस्य	विराट् रूपका	एव	ही

इयान्	इतना	यतः	जिससे (पृथक)
सन्निवेशः	विस्तार है	किञ्चित्	कुछ भी
यः	जो	न	नहीं
मया	मैंने	अस्ति	है (उनमें)
ते	तुमसे	स्व	अपनी
कथितः	बतलाया है ।	बुद्ध्या	बुद्धिसे
अस्मिन्	इस	मनः	मनको
स्थविष्ठे	स्थूल	सन्धार्यते	लगाया जाता
वपुषि	रूपमें		है ॥३८॥

स सर्वधीवृत्त्यनुभूतसर्व
आत्मा यथा स्वप्नजनेक्षितैकः ।
तं सत्यमानन्दनिधिं भजेत
नान्यत्र सज्जेद् यत आत्मपातः ॥३९॥

स सर्व धी वृत्ति अनुभूत सर्व आत्मा यथा स्वप्न जन ईक्षित एकः तं सत्यं आनन्दनिधिं भजेत न अन्यत्र सज्जेत् यत आत्मपातः ॥ ३९ ॥

यथा	जैसे	आत्मा	आत्मा (एक ही) है ।
स्वप्न	स्वप्नमें	तं	उस
ईक्षित	दीखे	सत्यं	सत्य स्वरूप
जन	लोगोंमें	आनन्दनिधिं	आनन्दनिधिको
एकः	एक ही (अपना आत्मा) है	भजेत्	भजे (स्मरण करे)
		अन्यत्र	और कहीं
सर्व	(वैसे ही) सबकी	न	न
धी	बुद्धियोंकी	सज्जेत	आसक्त हो
वृत्ति	वृत्तियों द्वारा	यत	जिस (अन्य आसक्ति) से
अनुभूत	अनुभवमें आया		
सर्व	सबका	आत्मपातः	अपना पतन होता
स	वह		है ॥३९॥

इति श्रीमद्भागवते महापुराणे वैयासिक्यां पारमहंस्यां संहितायां द्वितीयस्कन्धे प्रथमोऽध्यायः

अथ द्वितीयोऽध्यायः

श्रीशुक उवाच-

एवं पुरा धारणयाऽऽत्मयोनि-
र्नष्टां स्मृतिं प्रत्यवरुध्य तुष्टात् ।
तथा ससर्जेदममोघदृष्टि-
र्यथाप्ययात् प्राग् व्यवसायबुद्धिः ॥१॥

एवं पुरा धारणया आत्मयोनिः नष्टां स्मृतिं प्रत्यवरुध्य तुष्टात् तथा ससर्ज इदं अमोघ दृष्टिः यथा अप्ययात् प्राग् व्यवसाय बुद्धिः ॥ १ ॥

पुरा	पहिले	अमोघ दृष्टिः	अमोघ दृष्टि
आत्मयोनिः	ब्रह्माजीने	व्यवसाय	निश्चयात्मिका
एवं	इसी प्रकारकी	बुद्धिः	बुद्धिसे
धारणया	धारण द्वारा	इदं	इस (जगत्) की
तुष्टात्	सन्तुष्ट हुए (भगवान्) से	तथा	वैसी ही
		ससर्ज	सृष्टिकी
नष्टां	(प्रलयमें) नष्ट हुई	यथा	जैसी
स्मृतिं	स्मरण शक्तिको	अप्ययात्	प्रलयसे
प्रत्यवरुध्य	पुनः प्राप्त करके	प्राग्	पहिले थी ॥१॥

शाब्दस्य हि ब्रह्मण एष पन्था
यन्नामभिर्ध्यायति धीरपार्थैः ।
परिभ्रमंस्तत्र न विन्दतेऽर्थान्
मायामये वासनया शयानः ॥२॥

शाब्दस्य हि ब्रह्मण एष पन्था यत् नामभिः ध्यायति धीः अपार्थैः परिभ्रमन् तत्र न विन्दते अर्थान् मायामये वासनया शयानः ॥ २ ॥

हि	क्योंकि
ब्रह्मण	वेदोंकी
शाब्दस्य	शब्दावलीकी
एष	यह
पन्थाः	शैली ही ऐसी है,
यत्	जिससे
नामभिः	अनेक नामोंसे
धीः	(लोगोंकी) बुद्धि
अपार्थैः	अवास्तविक (वस्तुओंका)
ध्यायति	ध्यान (चिन्तन) करने लगती है,
मायामये	मायामय (पदार्थोंमें)
वासनया	(उनको पानेकी) वासनासे
शयानः	सोया (अविद्याग्रस्त) हुआ
परिभ्रमन	भटकता हुआ (जीव)
तत्र	उनमें
अर्थान्	पुरुषार्थ (सुख) को
न	नहीं
विन्दते	पाता ॥२॥

अतः कविर्नामसु यावदर्थः
स्यादप्रमत्तो व्यवसायबुद्धिः ।
सिद्धेऽन्यथार्थे न यतेत तत्र
परिश्रमं तत्र समीक्षमाणः ॥३॥

अतः कविः नामसु यावत् अर्थः स्यात् अप्रमत्तः व्यवसाय बुद्धिः सिद्धे अन्यथा अर्थे न यतेत तत्र परिश्रमं तत्र समीक्षमाणः ॥ ३ ॥

अतः	अतः
कविः	विद्वान् पुरुषको
अप्रमत्तः	सावधान होकर
नामसु	अनेक नामवाले (पदार्थों) में
यावत्	जितना
अर्थः	प्रयोजन
स्यात्	हो (उतना ही व्यवहार करना चाहिये) ।
अन्यथा	किसी और ढङ्गसे (बिना प्रयत्नके)
अर्थे	प्रयोजन
सिद्धे	पूरा हो जानेपर
व्यवसाय	निश्चयात्मिका (दृढ़ निश्चयवाली)
बुद्धिः	बुद्धिसे
तत्र	वहाँ
परिश्रमं	(केवल) परिश्रम

समीक्षमाणः	भली प्रकार देखता हुआ	**यतेत् न**	प्रयत्न नहीं करे ॥३॥
तत्र	उन (पदार्थों) के लिए		

सत्यां क्षितौ किं कशिपोः प्रयासै-
र्बाहौ स्वसिद्धे ह्युपबर्हणैः किम् ।
सत्यञ्जलौ किं पुरुधान्यपात्र्या
दिग्वल्कलाद्यौ सति किं दुकूलैः ॥४॥

सत्यां क्षितौ किं कशिपोः प्रयासैः बाहौ स्व सिद्धे हि उपबर्हणैः किं सति अञ्जलौ किं पुरु धान्यपात्र्या दिग् वल्कलादौ सति किं दुकूलैः ॥४॥

क्षितौ	पृथ्वीके	**किं**	क्या लाभ है ।
सत्यां	रहते	**अञ्जलौ**	अञ्जलि
कशिपोः	(सोनेके लिए) पलंगका	**सति**	रहते हुए
प्रयासैः	प्रयास	**पुरु**	बहुत-से
किं	क्यों किया जाय ।	**धान्यपात्र्या**	भोजनके बर्तनोंसे
हि	क्योंकि	**किं**	क्या प्रयोजन है ।
स्व	अपनी	**दिक्**	दिशाएँ (या)
बाहौ	भुजाएँ	**वल्कलादौ**	वल्कल (चिथड़े) आदि (पहननेको)
सिद्धे	(सिरके नीचे लगानेको) हैं ही	**सति**	रहते हुए
उपबर्हणैः	(तब) तकियोंसे	**दुकूलैः**	उत्तम वस्त्रोंका
		किं	करना क्या है ॥४॥

चीराणि किं पथि न सन्ति दिशन्ति भिक्षां
नैवाङ्घ्रिपाः परभृतः सरितोऽप्यशुष्यन् ।
रुद्धा गुहाः किमजितोऽवति नोपसन्नान्
कस्माद् भजन्ति कवयो धनदुर्मदान्धान् ॥५॥

चीराणि किं पथि न सन्ति दिशन्ति भिक्षां न एव अंघ्रिपाः परभृतः सरितः अपि शुष्यन् रुद्धा गुहाः किं अजितः अवति न उपसन्नान् कस्मात् भजन्ति कवयः धन दुर्मदाअन्धान् ॥ ५ ॥

पथि	मार्गोंमें
किं	क्या
चीराणि	चीर* (पहिननेके लिए)
न	नहीं
सन्ति	रहे ?
परभृतः	दूसरोंका भरण-पोषण करनेवाले
अंघ्रिपाः	वृक्ष (आहारके लिए)
भिक्षां	भिक्षा
न	नहीं
एव	ही
दिशन्ति	देते ?
सरितः	नदियाँ (जल पीनेके लिए)
अपि	भी
शुष्यन्	सूख गयीं ?
गुहाः	गुफाएँ (रहनेके लिए)
रुद्धाः	रुक गयीं ? (यह सब हो भी गया हो तो)
किं	क्या
अजितः	भगवान् (भी)
उपसन्नान्	शरणागतोंकी
अवति	रक्षा
न	नहीं करते ? (ऐसा नहीं है तो)
कवयः	बुद्धिमान-विद्वान्
धन	धनके
दुर्मदान्धान्	गर्वसे मतवाले होकर अन्धे (विवेक शून्य) लोगोंकी
कस्मात्	किसलिए
भजन्ति	सेवा करते हैं ?■ ॥५॥

---

* पहिले प्रथा थी कि नया वस्त्र पहिनते समय एक लंगोटी बनने जितना चौड़ा भाग चीरकर, (फाड़कर) मार्गके किसी वृक्षपर गृहस्थ लटका देते थे। यही टुकड़े चीर कहे जाते थे।

■ **विशेष—**

आज सचमुच मार्गोंमें कहीं शुद्ध चीर नहीं हैं। वृक्ष फलवाले वनमें भी हों तो वे किसी व्यक्ति या वन-विभागके स्वत्व हैं। उनसे भिक्षा मानकर फल लेना चोरी है। सरिताएँ बहुत भागोंमें सूख गयीं, नहर निकालनेसे अथवा उनका जल गन्दगी मिलनेसे अनुपयोगी हो गया। गुफाएँ प्रायः जहाँ समीप जल हो रुक गयीं, वहाँ लोग बस गये। केवल भगवानका भरोसा रहा और शरणागतकी रक्षा वे करते ही हैं।

एवं स्वचित्ते स्वत एव सिद्ध
आत्मा प्रियोऽर्थो भगवाननन्तः ।
तं निर्वृतो नियतार्थो भजेत
संसारहेतूपरमश्च यत्र ॥६॥

एवं स्व चित्ते स्वत एव सिद्धः आत्मा प्रियः अर्थः भगवान् अनन्तः तं निर्वृतः नियत अर्थः भजेत संसार हेतु उपरमः च यत्र ॥ ६ ॥

एवं	इस प्रकार	भगवान्	भगवान्
निर्वृतः	विरक्त होकर	अनन्तः	अनन्तका
स्व	अपने	नियत	दृढ़
चित्ते	हृदयमें	अर्थः	निश्चयपूर्वक
स्वत	स्वतः	भजेत्	भजन करे
एव	ही	यत्र	जिससे
सिद्धः	सिद्ध	च	कि
आत्मा	आत्मा रूप	संसार	संसारका
प्रियः	प्रिय	हेतु	कारण (अज्ञान)
अर्थः	परम प्रयोजनीय	उपरमः	नष्ट हो जाता है ॥६॥

कस्तां त्वनादृत्य परानुचिन्ता-
मृते पशूनसतीं नाम युञ्ज्यात् ।
पश्यञ्जनं पतितं वैतरण्यां
स्वकर्मजान् परितापाञ्जुषाणम् ॥७॥

कः तां तु अनादृत्य पर अनुचिन्तां ऋते पशून् असतीं नाम युञ्ज्यात् पश्यन् जनं पतितं वैतरण्यां स्व कर्मजान् परितापान् जुषाणम् ॥ ७ ॥

जनं	लोगोंको	कर्मजान्	कर्मोंसे उत्पन्न
वैतरण्यां	(संसार रूप) वैतरणी (यमनदी)में	परितापान्	संतापोंको
		जुषाणं	भोगते
पतितं	गिरकर	पश्यन्	देखते हुए
स्व	अपने	पशून्	पशुओंको

ऋतेः	छोड़कर (और)	तां	उसी
कः	कौन है	असतीं	असत्
तु	जो	नाम	कहे जानेवाले
पर	परमात्माके		(मार्गमें)
अनुचिन्तां	बराबर चिन्तनका	युञ्ज्यात्	(अपने चित्तको)
अनादृत्य	अनादर करके		लगावेगा ॥७॥

केचित् स्वदेहान्तर्हृदयावकाशे
प्रादेशमात्रं पुरुषं वसन्तम् ।
चतुर्भुजं कञ्जरथाङ्गशङ्ख-
गदाधरं धारणया स्मरन्ति ॥८॥

केचित् स्व देहान्तः हृदयवकाशे प्रादेशमात्रं पुरुषं बसन्तं चतुर्भुजं कञ्ज रथाङ्ग शङ्ख गदाधरं धारणया स्मरन्ति ॥ ८ ॥

केचित्	कोई (आचार्य-ऋषि विराट् पुरुषकी धारणा न करके)	कञ्ज	कमल
		रथाङ्ग	चक्र
		शङ्ख	शंख
स्व	अपने	गदाधरं	गदाधारी
देहान्तः	शरीरमें ही	चतुर्भुजं	चतुर्भुज
हृदयावकाशे	हृदयाकाशमें	पुरुषं	पुरुषका
वसन्तं	निवास करनेवाले	धारणया	धारणा द्वारा
प्रादेशमात्रं	अंगूठेके बराबर	स्मरन्ति	चिन्तन करते हैं ॥८॥

प्रसन्नवक्त्रं नलिनायतेक्षणं
कदम्बकिञ्जल्कपिशङ्गवाससम् ।
लसन्महारत्नहिरण्मयाङ्गदं
स्फुरन्महारत्नकिरीटकुण्डलम् ॥९॥

प्रसन्न वक्त्रं नलिन आयत ईक्षणं कदम्ब किञ्जल्क पिशंग वाससं लसन् महारत्न हिरण्मय अङ्गदं स्फुरन् महारत्न किरीट कुण्डलम् ॥ ९ ॥

प्रसन्न	(वे) प्रसन्न	नलिन	(उनके) कमलके
वक्त्रं	मुख है,		समान

आयत	बड़े	हिरण्मय	सोनेके
ईक्षणं	नेत्र,	अङ्गदं	बाजूबंदसे
कदम्ब	कदम्ब पुष्पके	लसन्	सुशोभित,
किञ्जल्क	परागके समान	महारत्न	बहुमूल्य रत्नोंके
पिशङ्ग	पीले	किरीट	मुकुट
वाससं	वस्त्र, हैं,	कुण्डलं	कुण्डलोंसे
महारत्न	(वे) महान् रत्न जटित	स्फुरन्	जगमगा रहे हैं ॥९॥

उन्निद्रहृत्पङ्कजकर्णिकालये
योगेश्वरास्थापितपादपल्लवम् ।
श्रीलक्ष्मणं कौस्तुभरत्नकन्धर-
मम्लानलक्ष्म्या वनमालयाऽऽचितम् ॥१०॥

उन्निद्र हृत् पङ्कज कर्णिका आलये योगेश्वराः आस्थापित पाद पल्लवं श्री लक्ष्मणं कौस्तुभरत्न कन्धरं अम्लान लक्ष्म्या वनमालया आचितम् ॥ १० ॥

उन्निद्र	खिले हुए	श्री लक्ष्मणं	(वक्षस्थलपर) श्रीवत्स चिह्न
हृत्	हृदय	कौस्तुभरत्न	(गलेमें) कौस्तुभ मणि
पङ्कज	कमलकी	कन्धरं	कन्धे
कर्णिका	कर्णिका रूप	अम्लान	नित्य प्रफुल्ल
आलये	निवासमें	लक्ष्म्या	शोभा युक्त
योगश्वराः	योगेश्वरोंके द्वारा	वनमालया	वनमालासे
आस्थापित	भली प्रकार स्थापित	आचितं	(वे) भूषित हैं ॥१०॥
पाद	चरण		
पल्लवं	पल्लववाले		

विभूषितं मेखलयाङ्गुलीयकै-
र्महाधनैर्नूपुरकङ्कणादिभिः ।
स्निग्धामलाकुञ्चितनीलकुन्तलै-
र्विरोचमाननहासपेशलम् ॥११॥

विभूषितं मेखलया अङ्गुलीयकैः महाधनैः नूपुर कङ्कणादिभिः स्निग्ध अमल कुञ्चित नील कुन्तलैः विरोचमान आननं हास पेशलम् ॥११॥

मेखलया	मेखला (करधनी) से कमर	**कुञ्चित**	घुंघराले
		नील	काले
महाधनैः	बहुमूल्य	**कुन्तलैः**	केशोंसे
अङ्गुलीयकैः	अंगूठियोंसे (अंगुलियाँ)	**विरोचमान**	अत्यन्त शोभायमान हैं,
नूपुर	नूपुरसे (चरण)	**हास**	मुस्कराहट युक्त
कङ्कणादिभिः	ककण आदिसे (हाथ)	**पेशलं**	(सुकुमार) खिला हुआ
विभूषितं	विभूषित हैं।		
स्निग्ध	चिकने	**आननं**	मुख है ॥११॥
अमल	स्वच्छ		

अदीनलीलाहसिसेक्षणोल्लसद्-
भ्रूभङ्गसंसूचितभूर्यनुग्रहम् ।
ईक्षेत चिन्तामयमेनमीश्वरं
यावन्मनो धारणयावतिष्ठते ॥१२॥

अदीन लीला हसित ईक्षण उल्लसत् भ्रूभङ्ग संसूचितं भूरि अनुग्रहं ईक्षेत चिन्तामयं एनं ईश्वरं यावत् मनः धारणया अवतिष्ठते ॥ १२ ॥

लीला	लीलायुक्त	**एनं**	इन
अदीन	उन्मुक्त	**चिन्तामयं**	भावनामय
हास्य	हँसी (और)	**ईश्वरं**	सर्व समर्थको
ईक्षण	चितवन सहित	**यावत्**	जबतक
उल्लसत्	उल्लासपूर्वक	**मनः**	मन
भ्रूभङ्ग	भौंहके संकेतसे	**धारणया**	इस धारणामें
भूरि	अत्यधिक	**अवतिष्ठते**	स्थिर न हो जाय
अनुग्रहं	अनुग्रहको	**ईक्षेत**	(बार-बार) देखता रहे ॥१२॥
संसूचितं	सूचित करते हुए		

एकैकशोऽङ्गानि धियानुभावयेत्
पादादि यावद्धसितं गदाभृतः ।

जितं जितं स्थानमपोह्य धारयेत्
परं परं शुद्ध्यति धीर्यथा यथा ॥१३॥

एक एकशः अङ्गानि धिया अनुभावयेत् पादादि यावत् हसितं गदाभृतः जितं जितं स्थानं अपोह्य धारयेत् परं परं शुद्ध्यति धीः यथा यथा ॥ १३ ॥

गदाभृतः	भगवान् गदाधरके	**धीः**	बुद्धि
पादादि	चरणोंसे प्रारम्भ करके	**शुद्ध्यति**	शुद्ध होती जाय,
हसितं	हास्ययुक्त मुखारविन्द	**जितं जितं**	जीते हुए (जिन अंगोंमें मन स्थिर हो गया है)
यावत्	पर्यन्त		
एक एकशः	क्रमशः एक एक	**स्थानं**	उन अंगोंको
अङ्गानि	अंगोंकी	**अपोह्य**	छोड़कर
धिया	बुद्धिसे	**परं परं**	उनसे अन्य अन्य अंगोंकी क्रमशः
अनुभावयेत्	बार-बार भावना करे ।	**धारयेत्**	धारणा करे ॥१३॥
यथा यथा	जैसे जैसे		

यावन्न जायेत परावरेऽस्मिन्
विश्वेश्वरे द्रष्टरि भक्तियोगः ।
तावत् स्थवीयः पुरुषस्य रूपं
क्रियावसाने प्रयतः स्मरेत ॥१४॥

यावत् न जायेत पर अवरे अस्मिन् विश्वेश्वरे द्रष्टरि भक्तियोगः तावत् स्थवीयः पुरुषस्य रूपं क्रिया अवसाने प्रयतः स्मरेत ॥ १४ ॥

यावत्	जबतक	**विश्वेश्वरे**	विश्वेश्वरमें
पर	परलोक	**भक्तियोगः**	भक्तियोग
अवरे	इस लोकके	**न**	नहीं
द्रष्टरि	द्रष्टा	**जायेत**	उत्पन्न हो जाय
अस्मिन्	इन	**तावत्**	तबतक

स्थवीयः	स्थूल	क्रिया	(नित्य नैमित्तिक)
पुरुषस्य	विराट् पुरुषका (पूर्व वर्णित)		कर्मके
		अवसाने	अन्तमें
रूपं	रूप	प्रयतः	एकाग्रतासे
		स्मरेत्	चिन्तन करे ॥१४॥

स्थिरं सुखं चासनमाश्रितो यति-
र्यदा जिहासुरिममङ्ग लोकम् ।
काले च देशे च मनो न सज्जयेत्
प्राणान् नियच्छेन्मनसा जितासुः ॥१५॥

स्थिरं सुखं च आसनं आश्रितः यतिः यदा जिहासुः इमं अङ्ग लोकं काले च देशे च मनः न सज्जयेत् प्राणान् नियच्छेत् मनसा जितासुः ॥१५॥

अङ्गः	प्रिय (परीक्षित्) !	च	और
यदा	जब	काले	कालमें
यतिः	योगी पुरुष	च	तथा
इमं	इस	देशे	देशमें
लोकं	लोकको	मनः	मनको
जिहासुः	छोड़ देना चाहे,	न सज्जयेत्	आसक्त न करे,
च	तब	प्राणान्	प्राणोंको
सुखं	सुखपूर्वक	जितासुः	जीतकर
स्थिरं	स्थिर	मनसा	मनसे
आसनं	आसनसे	नियच्छेत्	(इन्द्रियोंको)
आश्रितः	बैठजाय		नियन्त्रण करे ॥१५॥

मनः स्वबुद्ध्यामलया नियम्य
क्षेत्रज्ञ एतां निनयेत् तमात्मनि ।
आत्मानमात्मन्यवरुध्य धीरो
लब्धोपशान्तिर्विरमेत कृत्यात् ॥१६॥

मनः स्व बुद्ध्या अमलया नियम्य क्षेत्रज्ञ एतां निनयेत् तं आत्मनि आत्मानं आत्मनि अवरुध्य धीरः लब्धः उपशान्तिः विरमेत् कृत्यात् ॥१६॥

मनः	मनको	आत्मानं	आत्माको
स्व	अपनी	आत्मनि	परमात्मामें
अमलया	निर्मल	अवरुध्य	लीन करके
बुध्या	बुद्धिसे	धीरः	धीर पुरुष
नियम्य	नियन्त्रित करके	उपशान्ति	परम शान्तिको
एतां	इन (मन-बुद्धि) को	लब्धः	प्राप्त करके
क्षेत्रज्ञ	क्षेत्रज्ञ (जीव) में	कृत्यात्	कर्तव्यतासे
निनयेत्	ले जाय,	विरमेत्	विराम कर ले।
तं	उस (क्षेत्रज्ञ) को		(तब उसका कोई
आत्मनि	आत्मतत्त्वमें		कर्तव्य नहीं रह
	(मिलादे)		जाता।) ॥१६॥

न यत्र कालोऽनिमिषां परः प्रभुः
कुतो नु देवा जगतां य ईशिरे।
न यत्र सत्त्वं न रजस्तमश्च
न वै विकारो न महान् प्रधानम् ॥१७॥

न यत्र कालः अनिमिषां परं प्रभुः कुतः नुः देवा जगतां य ईशिरे न यत्र सत्त्वं न रजः तमः च न वै विकारः न महान् प्रधानम् ॥ १७ ॥

अनिमिषां	देवताओंका	सत्त्वं	सत्वगुण
परः	परम	न	नहीं है,
प्रभुः	स्वामी	रजः	रजोगुण
कालः	काल भी	तमः	तमोगुण
यत्र	जहाँ	न	नहीं हैं,
न	नहीं है (तब)	च	तथा
जगतां	संसारका	विकारः	अहंकार
य	जो	न	नहीं है,
ईशिरे	सञ्चालन करते हैं	महान्	महत्तत्व
देवा	वे देवता,	प्रधानं	प्रकृति
कुतः नु	हो ही कैसे सकते हैं ?	वै	भी
यत्र	जहाँ	न	नहीं है ॥१७॥

परं पदं वैष्णवमामनन्ति तद्
यन्नेति नेतीत्यतदुत्सिसृक्षवः ।
विसृज्य दौरात्म्यमनन्यसौहृदा
हृदोपगुह्यार्हपदं पदे पदे ॥१८॥

परं पदं वैष्णवं आमनन्ति तत् यत् नेति नेति इति अतत् उत्सिसृक्षवः विसृज्य दौरात्म्यं अनन्य सौहृदा हृत् उपगुह्य अर्ह पदं पदे पदे ॥ १८ ॥

तत्	उसे	**दौरात्म्यं**	आत्मासे भिन्नकी आसक्ति
वैष्णवं	भगवान् विष्णुका	**विसृज्य**	त्यागकर
परं	परम	**अनन्य**	अनन्य
पदं	पद	**सौहृदा**	तौहार्द्रसे
आमनन्ति	(शास्त्रमें) कहा जाता है	**अर्ह पदं**	(उस) पूजनीय पद (स्वरूप) का
यत्	जिसे	**पदे पदे**	पद पद पर (निरन्तर)
अतत्	असत् (पदार्थोंको)	**हृदा**	हृदयसे
उत्सिसृक्षवः	त्याग देनेकी इच्छा वाले (मुनि)	**उपगुह्य**	आलिंगन (एकात्म्य) करते हैं ॥१८॥
नेति नेति	'यह नहीं, यह नहीं'		
इति	इस प्रकार		

इत्थं मुनिस्तूपरमेद् व्यवस्थितो
विज्ञानदृग्वीर्यसुरन्धिताशयः ।
स्वपार्ष्णिनाऽऽपीड्य गुदं ततोऽनिलं
स्थानेषु षट्सून्नमयेज्जितक्लमः ॥१९॥

इत्थं मुनिः तु उपरमेत् व्यवस्थितः विज्ञान दृक् वीर्य सुरन्धित आशयः स्व पार्ष्णिना आपीड्य गुदं ततः अनिलं स्थानेषु षट्सु उन्नमयेत् जित क्लमः ॥ १९ ॥

विज्ञान	ज्ञान	**आशयः**	(कर्म संस्कारात्मक) (जिसका) चित्त
दृक्	दृष्टिके		
वीर्य	पराक्रमसे		

सुरन्धित	भली प्रकार भस्म हो चुका है
मुनिः	(वह) मुनि
तु	तो
इत्थं	इस प्रकार
व्यवस्थितः	व्यवस्थित होकर
उपरमेत्	उपराम हो (देह त्याग करे)।
स्व	अपनी
पार्ष्णिना	एड़ीसे
गुदं	गुदाको
आपीड्य	दबाकर
ततः	वहाँसे
अनिलं	प्राण वायुको
षट्सु	छहो
स्थानेषु	स्थानों (चक्रों) में (क्रमशः)
क्लमः	घबड़ाहट
जितः	त्यागकर
उन्नमयेत्	ले जाय ॥१९॥

नाभ्यां स्थितं हृद्यधिरोप्य तस्मा-
दुदानगत्योरसि तं नयेन्मुनिः ।
ततोऽनुसन्धाय धिया मनस्वी
स्वतालुमूलं शनकैर्नयेत् ॥२०॥

नाभ्यां स्थितं हृदि अधिरोप्य तस्मात् उदानगत्या उरसि तं नयेत् मुनिः ततः अनुसन्धाय धिया मनस्वी स्व तालुमूलं शनकैः नयेत् ॥२०॥

मनस्वी मुनिः	धैर्यशील योगी
नाभ्यां	नाभि (के मणिपूर चक्र) में
स्थितं	स्थित (प्राण वायुको)
हृदि	हृदय (अनाहत चक्र) में
अधिरोप्य तस्मात्	लाकर वहाँसे
उदानगत्या	उदानकी गतिसे (उदानसे मिलाकर)
उरसि	वक्षके ऊपर कण्ठ (विशुद्ध चक्र) में
तं	उस (वायु) को
नयेत्	लावे,
ततः	वहाँसे
धिया	बुद्धि द्वारा
अनुसन्धाय	(मार्गका) अनुसन्धान करके
शनकैः	धीरे-धीरे
स्व	अपने
तालुमूल	तालुमूल (विशुद्ध चक्रके ऊपर)
नयेत्	ले आवे ॥२०॥

तस्माद् भ्रुवोरन्तरमुन्नयेत
निरुद्धसप्तायतनोऽनपेक्षः ।
स्थित्वा मुहूर्तार्धमकुण्ठदृष्टि-
र्निर्भिद्य मूर्धन् विसृजेत्परं गतः ॥२१॥

तस्मात् भ्रुवोः अन्तरं उन्नयेत निरुद्धः सप्त आयतन अनपेक्षः स्थित्वा मुहूर्तार्धं अकुण्ठ दृष्टिः निर्भिद्य मूर्धन् विसृजेत् परं गतः ।२१॥

अनपेक्षः	सब अपेक्षाएँ त्यागकर	अकुण्ठ दृष्टिः	स्थिर लक्ष्य रखते हुए
सप्त	सात	मुहूर्तार्धं	आधे मुहूर्त (आधी घड़ी)
आयतनः	छिद्रों (दो नेत्र, दो कान, दो नाक, एक मुख) को	स्थित्वा	ठहर कर (वायुको वहीं रोककर)
निरुद्धः	बन्द करके	मूर्धन्	मूर्धा (ब्रह्मरन्ध्र) को
तस्मात्	वहाँ (तालुमूल) से (वायुको)	निर्भिद्य	फोड़कर (भेदन कर)
भ्रुवोः अनन्तरं	दोनों भौंहोंके बीच (आज्ञा चक्र) में	विसृजेत्	(वाय इन्द्रियादिको) त्याग दे
उन्नयेत	ले आवे ।	परं	(और) परमात्मामें
		गतः	मिल जाय ॥२१॥

यदि प्रयास्यन् नृप पारमेष्ठ्यं
वैहायसानामुत यद् विहारम् ।
अष्टाधिपत्यं गुणसन्निवाये
सहैव गच्छेन्मनसेन्द्रियैश्च ॥२२॥

यदि प्रयास्यन् नृप पारमेष्ठ्यं वैहयसानां उत यत् विहारं अष्ट आधिपत्यं गुण सन्निवाये सह एव गच्छेत् मनसा इन्द्रियैः च ॥२२॥

नृप	परीक्षित् !	उत	अथवा
यदि	यदि (योगीकी इच्छा)	अष्ट	आठ (सिद्धियों) का
पारमेष्ठ्यं	ब्रह्मलोक	आधिपत्यं	स्वामित्व प्राप्तकर
प्रयास्यन	जानेकी हो,		

वैहायसानां	आकाशचारी सिद्धोंके साथ	मनसा	मन
		च	और
यत्	अथवा	इन्द्रियैः	इन्द्रियों
गुण	त्रिगुणमयी	सह	साथ
सन्निवाये	सृष्टिमें	एव	ही
विहारं	विहार करनेकी हो (तो)	गच्छेत्	(शरीरसे बाहर) जाय ॥२२॥

योगेश्वराणां गतिमाहुरन्त-
र्बहिस्त्रिलोक्याः पवनान्तरात्मनाम् ।
न कर्मभिस्तां गतिमाप्नुवन्ति
विद्यातपोयोगसमाधिभाजाम् ॥२३॥

योगेश्वराणां गतिं आहुः अन्तर्बहिः त्रिलोक्याः पवन अन्तरात्मनां न कर्मभिः तां गतिं आप्नुवन्ति विद्या, तपः योग समाधि भाजां ॥२३॥

विद्या	उपासना,	अन्तर्बहिः	भीतर-बाहर (सर्वत्र)
तपः	तप,		
योग	योग,	आहुः	(शास्त्रोंमें) कही गयी है ।
समाधि	अत्यन्त एकाग्रता		
भाजां	सम्पन्न,	कर्मभिः	(केवल) कर्मके द्वारा
पवन	वायुके (समान)	तां	उस
अन्तरात्मनां	सूक्ष्म शरीरवाले	गतिं	गतिको
योगेश्वराणां	योगेश्वरोंकी	न	नहीं
गति	(स्वच्छन्द) गति	आप्नुवन्ति	पाया जाता ॥२३॥
त्रिलोक्याः	तीनों लोकोंके		

वैश्वानरं याति विहायसा गतः
सुषुम्णया ब्रह्मपथेन शोचिषा ।
विधूतकल्कोऽथ हरेरुदस्तात्
प्रयाति चक्रं नृप शैशुमारम् ॥२४॥

वैश्वानरं याति विहायसा गतः सुषुम्णया ब्रह्मपथेन शोचिषा विधूत कल्कः अथ हरेः उदस्तात् प्रयाति चक्रं नृप शैशुमारम् ॥२४॥

नृप	परीक्षित् !	**अथ**	तदनन्तर
शोचिषा	(योगी) ज्योतिर्मय		(वहाँ उसकी)
सुषुम्णया	सुषुम्णा नाड़ीके द्वारा	**कल्कः**	(रही सही) मलिनता
ब्रह्मपथेन	ब्रह्मलोकके मार्गसे (जाने समय)	**विधूत**	भस्म हो जानेपर
विहायसा	(पहिले) आकाशमें	**उदस्तात्**	वहाँसे ऊपर
गतः	जाकर	**हरेः**	श्रीहरिके
वैश्वानरं	अग्निलोक	**शैशुमारं**	शिशुमार
याति	पहुँचता है ।	**चक्रं**	चक्रपर
		प्रयाति	पहुँचता है ॥२४॥

तद् विश्वनाभिं त्वतिवर्त्य विष्णो-
रणीयसा विरजेनात्मनैकः ।
नमस्कृतं ब्रह्मविदामुपैति
कल्पायुषो यद् विबुधा रमन्ते ॥२५॥

तत् विश्वनाभिं तु अतिवर्त्य विष्णोः अणीयसा विरजेन आत्मना एकः नमस्कृतं ब्रह्मविदां उपैति कल्प आयुषः यत् बिबुधा रमन्ते ॥२५॥

तत्	उस	**ब्रह्मविदां**	वेदज्ञों द्वारा
विष्णोः	भगवान् विष्णुके	**नमस्कृतं**	नमस्कृत (उस महर्लोक) को
विश्वनाभिं	विश्वके केन्द्रको	**उपैति**	पहुँचता है
तु	भी	**यत्**	जिसमें
अतिवर्त्य	पार करके	**कल्प**	एक कल्प
अणीयसा	अत्यन्त सूक्ष्म	**आयुषः**	आयु वाले
विरजेन	निर्मल	**बिबुधा**	देवता
आत्मना	रूपसे	**रमन्ते**	क्रीड़ा करते हैं ॥२५॥
एकः	अकेला		

अथो अनन्तस्य मुखानलेन
दन्दह्यमानं स निरीक्ष्य विश्वम् ।
निर्याति सिद्धेश्वरजुष्टधिष्ण्यं
यद् द्वैपराध्यं तदु पारमेष्ठ्यम् ॥२६॥

अथ अनन्तस्य मुखानलेन दन्दह्यमानं स निरीक्ष्य विश्वं निर्याति सिद्धेश्वर जुष्ट धिष्ण्यं यत् द्वैपरार्ध्यं तत् पारमेष्ठ्यम् ॥२६॥

अथ	इसके अनन्तर (प्रलयकाल आनेपर)	जुष्ट	निवासवाले
		धिष्ण्यं	(ब्रह्म) लोकको
अनन्तस्य	भगवान् शेषके	निर्याति	चला जाता है,
मुखानलेन	मुखसे निकले अग्निसे	यत्	जो
विश्वं	विश्व (नीचेके लोकों) को	द्वैपरार्धं	दो परार्धकी आयु वाला है
दन्दह्यमानः	जलता हुआ	तत्	(और) वह
निरीक्ष्य	देखकर	पारमेष्ठ्यं	ब्रह्मलोकके समान ही है ॥२६॥
स	वह (योगी)		
सिद्धेश्वर	सिद्धेश्वरोंके		

न यत्र शोको न जरा न मृत्यु-
र्नार्तिर्न चोद्वेग ऋते कुतश्चित् ।
यच्चित्ततोऽदः कृपयानिदंविदां
दुरन्तदुःखप्रभवानुदर्शनात् ॥२७॥

न यत्र शोकः न जराः न मृत्युः न आर्तिः न च उद्वेगः ऋते कुतश्चित् यत् चित्ततोऽदः कृपया अनिदं विदां दुरन्त दुःख प्रभव अनुदर्शनात् ॥२७॥

यत्र	जिस ब्रह्मलोकमें	आर्तिः	क्लेश है,
न शोकः	न शोक है,	च	और
न जरा	न बुढ़ापा है,	न उद्वेग	न उद्वेग होता है,
न मृत्युः	न मृत्यु है,	ऋते	सिवाय इसके कि
न कुतश्चित्	न कोई	अनिदं	तथ्यको न

विदां	जाननेवाले (अज्ञानियों) के	कृपया	कृपाके कारण
दुरन्त	असह्य	यत्	जो
दुःख	दुःखोंके	चित्ततः	(वे) चित्तसे
प्रभवः	कारणोंको	अदः	खिन्न हो जाते हैं ॥२७॥
अनुदर्शनात्	बार-बार देखनेसे		

ततो विशेषं प्रतिपद्य निर्भय-
स्तेनात्मनापोऽनलमूर्तिरत्वरन् ।
ज्योतिर्मयो वायुमुपेत्य काले
वाय्वात्मना खं बृहदात्मलिङ्गम् ॥२८॥

ततः विशेषं प्रतिपद्य निर्भयः तेन आत्मना आपः अनल मूर्तिः अत्वरन् ज्योतिर्मयः वायुं उपेत्य काले वायु आत्मना खं वृहत् आत्मलिङ्गम् ॥ २८ ॥

ततः	तब (वह योगी)	काले	समयपर
निर्भयः	बिना भयके	वायुं	वायु रूप
विशेषं	पृथ्वीसे	उपेत्य	प्राप्त कर (फिर)
प्रतिपद्य	मिलकर (एक होकर)	आत्मना	अपने
तेन आत्मना	उस रूपसे	वायु	वायु रूपसे
अत्वरन्	बिना शीघ्रता किये	आत्मलिङ्गम्	आत्माके चिह्न (विभुत्व) वाले
आपः	जलसे (एक होता है)	वृहत्	अनन्त
अनलमूर्तिः	(फिर जलसे) अग्नि रूप बनता है ।	खं	आकाशसे (एक होता है) ॥२८॥
ज्योतिर्मयः	अग्नि रूपसे		

घ्राणेन गन्धं रसनेन वै रसं
रूपं तु दृष्ट्वा श्वसनं त्वचैव ।
श्रोत्रेण चोपेत्य नभोगुणत्वं
प्राणेन चाकूतिमुपैति योगी ॥२९॥

घ्राणेन गन्धं रसनेन वै रसं रूपं तु दृष्ट्वा श्वसनं त्वचैव श्रोत्रेण च उपेत्य नभः गुणत्वं प्राणेन च आकूतिं उपैति योगी ॥२९॥

योगी	वह योगी (स्थूल आवरणोंको पार करते समय इन्द्रियों को भी सूक्ष्ममें मिलाता चलता है)	**त्वचैव**	त्वगेन्द्रियसे(त्वचासे)
		श्वसनं	स्पर्श तन्मात्राको
		च	और
		श्रोत्रेण	श्रवणेन्द्रियसे
		नभः	आकाशके
घ्राणेन	नासिकेन्द्रियके द्वारा	**गुणत्वं**	शब्द तन्मात्राको
गन्धं	गन्ध तन्मात्राको	**उपेत्य च**	प्राप्त करके फिर
रसनेन	रसनेन्द्रियसे	**प्राणेन**	प्राण (कर्मेन्द्रियों) से
रसं	रस तन्मात्राको	**आकूतिं**	क्रिया शक्ति
दृष्ट्वा तु	नेत्रेन्द्रियसे तो		(के स्वरूप) को
रूपं	रूप तन्मात्राको	**उपैति**	प्राप्त करता है ।२९।

स भूतसूक्ष्मेन्द्रियसंनिकर्षं
मनोमयं देवमयं विकार्यम् ।
संसाद्य गत्या सह तेन याति
विज्ञानतत्त्वं गुणसंनिरोधम् ॥३०॥

सः भूतसूक्ष्मः इन्द्रिय संनिकर्षं मनोमयं देवमयं विकार्यं संसाद्य गत्या सह तेन याति विज्ञान तत्त्वं गुण संनिरोधम् ॥ ३० ॥

स	वह योगी	**विकार्यं**	इस विकारवान् (सम्पूर्ण अहंकारके)
भूतसूक्ष्म	तन्मात्राओं तथा		
इन्द्रिय	इन्द्रियोंके	**संसाद्य**	स्वरूपको भली प्रकार अपनाकर
संनिकर्षं	मूलकारण (तामस अहंकार)	**तेन**	उसके
		सह	साथ
मनोमयं	मनोमय (राजस अहंकार)	**गत्या**	गतिशील होकर
		विज्ञानतत्त्वं	महत्तत्त्वमें (उससे)
देवमयं	देवमय (इन्द्रियोंके देवताओंके कारण सात्त्विक अहंकार)	**गुण सन्निरोधं**	गुणोंके लयस्थान (प्रकृति) में
		याति	पहुँचता है ।।३०।।

तेनात्मनाऽऽत्मानमुपैति शान्त-
मानन्दमानन्दमयोऽवसाने ।
एतां गतिं भागवतीं गतो यः
स वै पुनर्नेह विषज्जतेऽङ्ग ॥३१॥

तेन आत्मना आत्मानं उपैति शान्तं आनन्दं आनन्दमयः अवसाने एतां गतिं भागवतीं गतः यः स वै पुनः न इह विषज्जते अङ्ग ॥३१॥

अङ्ग	प्रिय परीक्षित् !	भागवतीं	भागवती
अवसाने	महाप्रलयमें	गतिं	गतिको
तेन	उस (प्रकृति) का	यः	जो
	भी (त्याग करके)	गतः	प्राप्त हुआ
आत्मना	अपने आपमें	स	वह
आत्मानं	आत्मतत्त्वको	पुनः	फिर
उपैति	प्राप्त कर लेता है ।	वै	निश्चित रूपसे
शान्तं	(वह) शान्त	इह	इस संसारमें
आनन्दं	आनन्द रूप	न	नहीं
आनन्दमयः	आनन्द है ।	विषज्जते	लौटता ॥३१॥
एतां	इस		

एते सृती ते नृप वेदगीते
त्वयाभिपृष्टे ह सनातने च ।
ये वै पुरा ब्रह्मण आह पृष्ट
आराधितो भगवान् वासुदेवः ॥३२॥

एते सृती ते नृप वेदगीते त्वया अभिपृष्टे ह सनातने च ये वै पुरा ब्रह्मण आह पृष्ट आराधितः भगवान् वासुदेवः ॥ ३२ ॥

नृप	परीक्षित् !	एते	ये दोनों
त्वया	तुम्हारे द्वारा	सृती	मार्ग,
अभिपृष्टे	पूछे गये	ह	जो
वेदगीते	वेदोंमें वर्णित	सनातने	सनातन

च	भी हैं, (और)	भगवान्	भगवान्
पुरा	पहिले	वासुदेवः	वासुदेव
ये	जिन्हें	वै	ने
ब्रह्मण	ब्रह्माके	आह	बतलाया था,
पृष्ट	पूछनेपर	ते	तुमसे (मैंने
आराधितः	(उनके द्वारा) आराधित		बतलाया) ॥३२॥

न ह्यतोऽन्यः शिवः पन्था विशतः संसृताविह ।
वासुदेवे भगवति भक्तियोगो यतो भवेत् ॥३३॥

न हि अतः अन्यः शिवः पन्थाः विशतः संसृताः इह वासुदेवे भगवति भक्तियोगः यतः भवेत् ॥ ३३ ।

इह	इस	पन्थाः	मार्ग
संसृता	संसार चक्रमें	न	नहीं है
विशतः	पड़े हुए लोगोंके लिए	यतः	जिससे
हि	निश्चय ही	भगवति	भगवान्
अतः	इससे	वासुदेवे	वासुदेवमें
अन्यः	भिन्न	भक्तियोगः	भक्तियोग
शिवः	कल्याणकारी	भवेत्	(उत्पन्न) हो ॥३३॥

भगवान् ब्रह्म कात्स्न्येन त्रिरन्वीक्ष्य मनीषया ।
तदध्यवस्यत् कूटस्थो रतिरात्मन् यतो भवेत् ॥३४॥

भगवान् ब्रह्म कात्स्नेन त्रिः अन्वीक्ष्य मनीषया तत् अध्यवस्यत् कूटस्थः रतिः आत्मन् यतः भवेत् ॥ ३४ ॥

भगवान्	भगवान् (ब्रह्माने)	अध्यवस्यत्	निश्चय किया
कात्स्नेन	सम्पूर्ण रूपसे	यतः	जिससे
मनीषया	बुद्धिसे	कूटस्थः	जीवकी (कूट-मिथ्या शरीरमें स्थित)
ब्रह्म	वेदोंका		
त्रिः	तीन बार	आत्मन्	आत्मामें
अन्वीक्ष्य	अनुशीलन करके	रतिः भवेत्	प्रीति हो (वही श्रेष्ठ मार्ग है ।) ॥३४॥
तत्	तब		

भगवान् सर्वभूतेषु लक्षितः स्वात्मना हरिः ।
दृश्यैर्बुद्ध्यादिभिर्द्रष्टा लक्षणैरनुमापकैः ॥३५॥

भगवान् सर्व भूतेषु लक्षितः स्व आत्मना हरिः दृश्यैः बुद्ध्यादिभिः द्रष्टा लक्षणैः अनुमापकैः ॥ ३५ ॥

सर्व	सब	**दृश्यैः**	दृश्योंके द्वारा
भूतेषु	प्राणियोंमें	**द्रष्टा**	द्रष्टा रूपमें
स्व	(उनके) अपने	**अनुमापकैः**	(उनका) अनुमान
आत्मना	आत्माके रूपमें		करानेवाले
भगवान्	भगवान्	**लक्षणैः**	लक्षणोंसे (यह
हरिः	श्रीहरि (ही)		लक्षित होता
लक्षितः	लक्षित हैं;		है ।) ॥३५॥
बुद्ध्यादिभिः	बुद्धि आदि		

तस्मात् सर्वात्मना राजन् हरिः सर्वत्र सर्वदा ।
श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यो भगवान्नृणाम् ॥३६॥

तस्मात् सर्वात्मना राजन् हरिः सर्वत्रः सर्वदा श्रोतव्यः कीर्तिव्यः च स्मर्तव्यः भगवान् नृणाम् ॥ ३६ ॥

राजन्	राजन् !	**हरिः**	श्रीहरि (ही)
तस्मात्	इसलिए	**श्रोतव्यः**	सुनने योग्य,
नृणां	मनुष्यों द्वारा	**कीर्तिव्यः**	कीर्तन करने योग्य
सर्वात्मना	सम्पूर्ण हृदयसे	**च**	और
सर्वत्रः	सब कहीं,	**स्मर्तव्यः**	स्मरण करने योग्य
सर्वदा	सब समय,		हैं ॥३६॥
भगवान्	भगवान्		

पिबन्ति ये भगवत आत्मनः सतां
कथामृतं श्रवणपुटेषु सम्भृतम् ।
पुनन्ति ते विषयविदूषिताशयं
व्रजन्ति तच्चरणसरोरुहान्तिकम् ॥३७॥

पिबन्ति ये भगवतः आत्मनः सतां कथामृतं श्रवणपुटेषु सम्भृतं पुनन्ति ते विषय विदूषित आशयं व्रजन्ति तत् चरणसरोरुह अन्तिकम् ॥३७॥

ये	जो	**विषय विदूषित**	विषयों (की वासना) से अत्यन्त मलिन
सतां	सत्पुरुषोंके		
आत्मनः	आत्मस्वरूप	**आशयं**	अन्तःकरणको
भगवतः	भगवान्‌की	**पुनन्ति**	पवित्र कर लेते हैं,
कथामृतं	कथारूप अमृतको	**तत्**	(एवं) उन (भगवान्) के
श्रवणपुटेषु	कानोंके दोनेमें		
संभृतं	भरकर	**चरण सरोरुह**	चरण-कमलोंके
पिबन्ति	पीते हैं	**अन्तिकं**	समीप
ते	वे	**व्रजन्ति**	पहुँच जाते हैं ॥३७॥

इति श्रीमद्भागवते महापुराणे वैयासिक्यां पारमहंस्यां
संहितायां द्वितीयस्कन्धे द्वितीयोऽध्यायः

अथ तृतीयोऽध्यायः

श्रीशुक उवाच-

एवमेतन्निगदितं पृष्टवान् यद्भवान् मम ।
नृणां यन्म्रियमाणानां मनुष्येषु मनीषिणाम् ॥१॥

एवं एतत् निगदितं पृष्टवान् यत् भवान् मम नृणां यत् म्रियमाणानां मनुष्येषु मनीषिणां ॥ १ ॥

भवान्	(परीक्षित् !) तुमने	यत्	जो (कर्तव्य) है,
मम	मुझसे	एवं	इस प्रकार
मनुष्येषु	मनुष्योंमें	एतत्	यह
म्रियमाणानां	मरणासन्न	यत्	जो
मनीषिणां	बुद्धिमान	पृष्टवान्	पूछा (वह)
नृणां	लोगोंके लिए	निगदितं	(मैंने तुमको) बतलाया

ब्रह्मवर्चसकामस्तु यजेत ब्रह्मणस्पतिम् ।
इन्द्रमिन्द्रियकामस्तु प्रजाकामः प्रजापतीन् ॥२॥

ब्रह्मवर्चस कामः तु यजेत् ब्रह्मणस्पतिं इन्द्रं इन्द्रिय कामः तु प्रजाकामः प्रजापतीन् ॥ २ ॥

ब्रह्मवर्चस	ब्रह तेजका	इन्द्रं	इन्द्रका
कामः तु	इच्छावाला तो	प्रजाकामः	सनातनकी कामना वाला
ब्रह्मणस्पतिं	वृहस्पतिका		
इन्द्रिय	इन्द्रियोंकी (विशेष शक्तिकी)	प्रजापतीन्	प्रजापतियोंके लिए
		यजेत्	आराधना करे ॥२॥
कामः तु	कामनावाला तो		

देवीं मायां तु श्रीकामस्तेजस्कामो विभावसुम् ।
वसुकामो वसून् रुद्रान् वीर्यकामोऽथ वीर्यवान् ॥३॥

देवीं मायां तु श्रीकामः तेजः कामः विभावसुं वसुकामः वसून् रुद्रान् वीर्यकामः अथ वीर्यवान ॥ ३ ॥

श्रीकामः	लक्ष्मी चाहनेवाला	**वसून्**	वसुओंकी
तु	तो	**अथ**	और
मायां	माया	**वीर्यवान**	पराक्रमी
देवीं	देवीकी,	**वीर्यकामः**	शक्ति चाहनेवाला
तेजः कामः	तेज चाहनेवाला	**रुद्रान्**	रुद्रोंकी (आराधना करे) ॥३॥
विभावसुं	अग्निकी,		
वसुकामः	धन चाहनेवाला		

अन्नाद्यकामस्त्वदिति स्वर्गकामोऽदितेः सुतान् ।
विश्वान्देवान् राज्यकामः साध्यान्संसाधको विशाम् ॥४॥

अन्नआदि कामः तु अदितिं स्वर्गगामो अदितेः सुतान् विश्वान् देवान् राज्यकामः साध्यान् संसाधकः विशाम् ॥ ४ ॥

अन्न आदि	अन्न आदि (भोज्य पदार्थोंकी)	**राज्यकामः**	राज्य चाहनेवालेको
कामः तु	कामनावाला	**विश्वान् देवान्**	विश्वेदेवोंकी
अदितिं	(देवमाता) अदितिकी	**विशां**	प्रजाको
स्वर्गकामः	स्वर्गकी इच्छा करनेवाला	**संसाधकः**	अनुकूल रखनेकी इच्छावालेको
अदितेः सुतान	अदितके पुत्र देवताओंकी	**साध्यान्**	साध्य देवोंकी (पूजा करनी चाहिये)॥४॥

आयुष्कामोऽश्विनौ देवौ पुष्टिकाम इलां यजेत् ।
प्रतिष्ठाकामः पुरुषो रोदसी लोकमातरौ ॥५॥

आयुष्कामः अश्विनौ देवौ पुष्टिकामः इलां यजेत् प्रतिष्ठाकामः पुरुषः रोदसीं लोकमातरौ ॥ ५ ॥

आयुष्कामः	दीर्घायु चाहनेवालेको	**आश्विनौ देवौ**	दोनों अश्विनी कुमारोंकी,

पुष्टिकामः	पुष्टि चाहनेवालेको	रोदसी	द्यौ (आकाश) और
इलां	पृथ्वीकी,		पृथ्वीकी
प्रतिष्ठाकामः	प्रतिष्ठा चाहनेवाले	यजेत्	आराधना करनी
पुरुषः	पुरुषको		चाहिये ॥५॥
लोकमातरौ	लोकोंकी दोनों		
	माताओं		

रूपाभिकामो गन्धर्वान् स्त्रीकामोऽप्सरउर्वशीम् ।
आधिपत्यकामः सर्वेषां यजेत परमेष्ठिनम् ॥६॥

रूपाभिकामः गन्धर्वान् स्त्रीकामः अप्सर उर्वशीं आधिपत्य कामः सर्वेषां यजेत् परमेष्ठिनम् ॥ ६ ॥

रूपाभिकामः	सौन्दर्य चाहनेवालेको	आधिपत्य कामः	अधिपति होनेकी
गन्धर्वान	गन्धर्वोंकी,		कामना हो तो
स्त्रीकामः	पत्नीकी चाह हो तो	परमेष्ठिनं	ब्रह्माजीकी
अप्सर उर्वशीं	उर्वशी अप्सराकी	यजेत्	आराधना करे ॥६॥
सर्वेषां	सबका		

यज्ञं यजेद् यशस्कामः कोशकामः प्रचेतसम् ।
विद्याकामस्तु गिरिशं दाम्पत्यार्थ उमां सतीम् ॥७॥

यज्ञं यजेत् यशः कामः कोश कामः प्रचेतसं विद्याकामः तु गिरिशं दाम्पत्यार्थं उमां सतीम् ॥ ७ ॥

यशः कामः	यशेच्छु	दाम्पत्यार्थं	पति-पत्नीमें प्रीति
यज्ञं	यज्ञ पुरुषकी,		चाहनेवालेको
कोश कामः	धनेच्छु	सतीं	सती
प्रचेतसं	वरुणकी,	उमां	उमाकी
विद्याकामः तु	विद्याका इच्छुक	यजेद्	आराधना करनी
गिरिशं	भगवान् शंकरकी,		चाहिये ॥७॥

धर्मार्थं उत्तमश्लोकं तन्तुं तन्वन् पितॄन् यजेत् ।
रक्षाकामः पुण्यजनानोजस्कामो मरुद्गणान् ॥८॥

धर्मार्थं उत्तमश्लोकं तन्तुं तन्वन् पितॄन् यजेत् रक्षाकामः पुण्यजनान् ओजस्कामः मरुद्गणान् ।। ८ ।।

धर्मार्थं	धर्मोपार्जनके लिए	**पुण्यजनान्**	यक्षोंकी,
उत्तमश्लोकं	विष्णु भगवान्‌की,	**ओजस्कामः**	ओजस्विता चाहनेवालेको
तन्तु तन्वन्	सन्तति परम्पराकी रक्षाके लिए	**मरुद्गणान्**	वायुदेवताओंकी
पितॄन्	पितरोंकी,	**यजेत्**	उपासना करनी चाहिये ।।८।।
रक्षाकामः	सुरक्षाकी चाहसे		

राज्यकामो मनून् देवान् निर्ऋतिं त्वभिचरन् यजेत् ।
कामकामो यजेत् सोममकामः पुरुषं परम् ।।९।।

राज्यकामः मनून् देवान् निर्ऋतिं तु अभिचरन् यजेत् कामकामः यजेत् सोमं अकामः पुरुषं परम् ।। ९ ।।

राज्यकामः	राज्य चाहनेवालेको	**कामकामः**	भोगोंकी प्राप्तिके लिए
मनून् देवान्	मन्वन्तरोंके अधिदेवताओंका	**सोमं**	चन्द्रमाकी,
तु	तथा	**अकामः**	निष्कामता प्राप्तिके लिए
अभिचरन्	अभिचार (वशीकरण उच्चाटनादि) के लिए	**परं**	परम
निर्ऋतिं	निर्ऋति देवताका	**पुरुषं**	पुरुषकी
यजेत्	यजन् करे।	**यजेत्**	आराधना करे ।।९।।

अकामः सर्वकामो वा मोक्षकाम उदारधीः ।
तीव्रेण भक्तियोगेन यजेत पुरुषं परम् ।।१०।।

अकामः सर्वकामः वा मोक्षकाम उदार धीः तीव्रेण भक्तियोगेन यजेत् पुरुषं परम् ।। १० ।।

अकामः	निष्काम हो,	**वा**	अथवा
सर्वकामः	समस्त कामनाओं वाला हो	**मोक्षकाम**	मोक्ष चाहनेवाला हो
		उदार	(ऐसे) शुद्ध

धीर	बुद्धिमान पुरुषको	पुरुषं	पुरुषकी
तीव्रेण	तीव्र	यजेत्	उपासना करनी
भक्तियोगेन	भक्तियोगपूर्वक		चाहिये ॥१०॥
परं	परम		

एतावानेव यजतामिह निःश्रेयसोदयः ।
भगवत्यचलो भावो यद् भागवतसङ्गतः ॥११॥

एतावान् एव यजतां इह निःश्रेयस उदयः भगवति अचलः भावः यत् भागवत सङ्गतः ॥ ११ ॥

यजतां	(उपरोक्त विविध) आराधना करने वालोंका	यत्	(कि) जिससे
		भागवत	भगवद् भक्तोंके
		सङ्गतः	संगसे
इह	इस संसारमें	भगवति	भगवान्‌में
निःश्रेयस	परम कल्याण	अचलः	अविचल
एतावन्	इतना	भावः	भक्ति
एव	ही (है)	उदयः	उदय हो जाय ॥११

ज्ञानं यदाप्रतिनिवृत्तगुणोर्मिचक्र-
मात्मप्रसाद उत यत्र गुणेष्वसङ्गः ।
कैवल्यसम्मतपथस्त्वथ भक्तियोगः
को निर्वृतो हरिकथासु रतिं न कुर्यात् ॥१२॥

ज्ञानं यदा प्रतिनिवृत्त गुण उर्मि चक्रं आत्म प्रसाद उत यत्र गुणेषु असंगः कैवल्य सम्मत पथः तु अथ भक्तियोगः कः निर्वृतः हरिकथासु रतिं न कुर्यात् ॥ १२ ॥

यदा	(उस सत्संगसे) जब	आत्म	चित्तकी
ज्ञानं	ज्ञान होता है (तब)	प्रसाद	निर्मलता होती है,
गुण	त्रिगुणोंकी	उत	एवं
उर्मि	लहरोंका	यत्र	जब
चक्रं	चक्र	गुणेषु	(इन्द्रियोंके) गुणोंसे
प्रति निवृत्तः	शान्त हो जाता है,	असंगः	असंगता आती है

तु अथ	तब	निर्वृतः	(भक्तिके) रसका
कैवल्य	मोक्षका		जानकर
सम्मत	सर्व सम्मत	हरि	श्रीहरिकी
पथः	मार्ग	कथासु	(ऐसी) कथामें
भक्तियोगः	भक्तियोग प्राप्त हो	रतिं	प्रीति
	जाता है।	न	नहीं
कः	(भला) कौन	कुर्यात्	करेगा ॥१२॥

शौनक उवाच–

इत्यभिव्याहृतं राजा निशम्य भरतर्षभः।
किमन्यत्पृष्टवान् भूयो वैयासकिमृषिं कविम् ॥१३॥

इति अभिहितं राजा निशम्य भरतर्षभः किं अन्यत् पृष्टवान् भूयः वैयासकिं ऋषिं कविं ॥ १३ ॥

इति	इस प्रकारकी	कविं	सर्वज्ञ
अभिहितं	बात	ऋषिं	वेदज्ञ
निशम्य	सुनकर	वैयासकिं	शुकदेवजीसे
भूयः	फिर	अन्यत्	और
भरतर्षभः	भरतकुलमें श्रेष्ठ	किं	क्या
राजा	परीक्षितने	पृष्टवान्	पूछा ? ॥१३॥

एतच्छुश्रूषतां विद्वन् सूत नोऽर्हसि भाषितुम्।
कथा हरिकथोदर्काः सतां स्युः सदसि ध्रुवम् ॥१४॥

एतत् शुश्रूतां विद्वन् सूत नः अर्हसि भाषितुं कथाः हरिकथाः उदर्काः सतां स्युः सदसि ध्रुवम् ॥ १४ ॥

विद्वन्	विद्वान्	भाषितुं	(अवश्य) कहना
सूत	सूतजी !	अर्हसि	चाहिये (क्योंकि)
नः	हम	ध्रुवं	निश्चय ही
शुश्रूतां	सुननेकी इच्छावालोंसे	सतां	सन्तोंकी
एतत्	यह (आपको)	सदसि	सभामें

कथाः	चर्चा	उदर्काः	पर्यवसित होनेवाली
हरिकथा	भगवत्कथामें	स्युः	होती हैं ।।१४।।

स वै भागवतो राजा पाण्डवेयो महारथः ।
बालक्रीडनकैः क्रीडन् कृष्णक्रीडां य आददे ।।१५।।

स वै भागवतः राजा पाण्डवेयः महारथः बालक्रीडनकैः क्रीडन् कृष्णक्रीडां य आददे ।। १५ ।।

स	वह	क्रीडनकैः	खिलौनोंसे
पाण्डवेयः	पाण्डव वंशी	क्रीडन	खेलते हुए भी
महारथः	महारथी	य	जो
राजा	राजा (परीक्षित)	कृष्णक्रीडां	श्रीकृष्णकी लीलाका
वै	निश्चय	आददे	आयोजन करते
भागवतः	भगवद्भक्त थे,		थे ।।१५।।
बाल	बालकपनमें		

वैयासकिश्च भगवान् वासुदेवपरायणः ।
उरुगायगुणोदाराः सतां स्युर्हि समागमे ।।१६।।

वैयासकिः च भगवान् वासुदेव परायणः उरुगाय गुण उदाराः सतां स्युः हि समागमे ।। १६ ।।

भगवान्	भगवान्	समागमे	मिलनमें
वैयासकिः	शुकदेवजी	उरुगाय	उत्तमश्लोक
च	भी		भगवान्के
वासुदेव	श्रीकृष्णके	उदाराः	उदार
परायणः	परायण हैं ।	गुण	गुणोंकी (चर्चा)
हि	निश्चय ही	स्युः	होगी ही ।।१६।।
सतां	(ऐसे) संतोंके		

आयुर्हरति वै पुंसामुद्यन्नस्तं च यन्नसौ ।
तस्यर्ते यत्क्षणो नीत उत्तमश्लोकवार्तया ।।१७।।

आयुः हरति वै पुसां उद्यन् अस्तं च यत् असौ तस्य ऋते यत् क्षणं नीतः उत्तमश्लोक वार्तया ।। १७ ।।

उत्तमश्लोक	पुण्यकीर्ति भगवान्‌की
वार्तया	कथामें
यत्	जिस
पुंसां	पुरुषके
यत्	जो
क्षणं	क्षण
नीतः	व्यतीत होते हैं
ऋते	(उनके) अतिरिक्त
तस्य	(उसकी)
आयु	आयु (के दिन और क्षण)
उद्यन्	उदय
च	और
अस्तं	अस्त (होते हुए)
असौ	ये (सूर्य भगवान्)
वै	निश्चय ही
हरति	हरण करते हैं (अर्थात् उसकी आयुके वे दिन और क्षण व्यर्थ जा रहे हैं) ॥१७॥

तरवः किं न जीवन्ति भस्त्राः किं न श्वसन्त्युत ।
न खादन्ति न मेहन्ति किं ग्रामपशवोऽपरे ॥१८॥

तरवः किं न जीवन्ति भस्त्राः किं न श्वसन्ति उत न खादन्ति न मेहन्ति किं ग्राम पशवः अपरे ॥ १८ ॥

किं	क्या
तरवः	वृक्ष
जीवन्ति	जीवित
न	नहीं रहते ?
किं	क्या
भस्त्राः	(लुहारकी) धौंकनी
न श्वसन्ति	श्वास नहीं लेती ?
उत	अथवा
किं	क्या
अपरे	दूसरे
ग्राम पशवः	ग्रामीण पशु
खादन्ति	खाते
न	नहीं,
मेहन्ति	मूत्र त्याग
न	नहीं करते ? (इसी प्रकार हरिकथा रहित जीवन लुहार की धौकनी जैसा श्वास लेना एवं ग्रामीण पशुओं जैसा भोजन तथा मल-मूत्र त्याग करना है ।) ॥१८॥

श्वविड्वराहोष्ट्रखरैः संस्तुतः पुरुषः पशुः ।
न यत्कर्णपथोपेतो जातु नाम गदाग्रजः ॥१९॥

श्व विड्वराह उष्ट्र खरैः संस्तुतः पुरुषः पशुः न यत् कर्णपथ उपेतः जातु नाम गदाग्रजः ॥ १९ ॥

गदाग्रजः	गदके बड़े भाई श्रीकृष्णका	पुरुषः	पुरुष
नाम	नाम	श्व	कुत्ते
यत्	जिसके	विड्वराह	ग्राम सूकर
कर्णपथ	कानके मार्गमें	उष्ट्र	ऊँट
जातु	कभी	खरैः	गधों (के समान)
न उपेतः	नहीं पहुँचा (वह)	पशुः	पशु
		संस्तुतः	कहा गया है ॥१९॥

बिले बतोरुक्रमविक्रमान् ये
न शृण्वतः कर्णपुटे नरस्य ।
जिह्वासती दार्दुरिकेव सूत
न चोपगायत्युरुगायगाथाः ॥२०॥

बिले बत उरुक्रम विक्रमान् ये नशृण्वतः कर्णपुटे नरस्य जिह्वा असती दार्दुरिकइव सूत न चउपगायति उरुगाय गाथाः ॥ २० ॥

सूत	सूतजी !	च	और
नरस्य	(उस) मनुष्यके	जिह्वा	(उसकी) जीभ
कर्णपुटे	कान	दार्दुरिक	मेढककी जीभके
बिले	बिलके	इव	समान
बत	समान हैं	असती	बुरी है
ये	जो	उरुगाय	(जो) उत्तमश्लोक (भगवान्) का
उरुक्रम	अनन्त पराक्रम (भगवान्) के	गाथाः	चरित (यदि)
विक्रमान्	विक्रमों (चरितों)को	न	नहीं
न	नहीं	उपगायति	गाती ॥२०॥
शृण्वतः	सुनता		

भारः परं पट्टकिरीटजुष्ट-
मप्युत्तमाङ्गं न नमेन्मुकुन्दम् ।

शावौ करौ नो कुरुतः सपर्यां
हरेर्लसत्काञ्चनकङ्कणौ वा ॥२१॥

भारः परं पट्ट किरीट जुष्टं अपि उत्तमाङ्गं न नमेत् मुकुन्दं शावौ करौ नो कुरुतः सपर्यां हरेः लसत् काञ्चन कङ्कणौ वा ॥ २१ ॥

पट्ट	रेशमी वस्त्र (की पगड़ी और)	**काञ्चन**	सोनेके
किरीट	मुकुटसे	**कङ्कणौ**	कंकणोंसे
जुष्टं	युक्त	**लसत्**	आभूषित
अपि	होनेपर भी	**वा**	होनेपर भी
उत्तमाङ्गं	(जो) मस्तक	**हरेः**	श्रीहरिकी
मुकुन्दं	भगवान् मुकुन्दको	**सपर्यां**	सेवा पूजा
न नमेत्	नहीं झुकता (प्रणाम नहीं करता)	**नो**	नहीं
परं	(वह) केवल	**कुरुतः**	करनेवाले
भारः	भार है ।	**करौ**	हाथ
		शावौ	मुर्देके (हाथ) जैसे हैं ।।२१॥

बर्हायिते ते नयने नराणां
लिङ्गानि विष्णोर्न निरीक्षतो ये ।
पादौ नृणां तौ द्रुमजन्मभाजौ
क्षेत्राणि नानुव्रजतो हरेर्यौ ॥२२॥

बर्हायिते ते नयने नराणां लिङ्गानि विष्णोः न निरीक्षतः ये पादौ नृणां तौ द्रुमजन्म भाजौ क्षेत्राणि न अनुव्रजतो हरेः यौ ॥ २२ ॥

नराणां	मनुष्योंके	**लिङ्गानि**	चिह्नों (श्रीविग्रहों) का
ते	वे	**न निरीक्षतः**	दर्शन नहीं करते ।
नयने	नेत्र	**नृणां**	मनुष्योंके
बर्हायिते	मयूर पंखके चिह्नोंके समान हैं	**तौ**	वे
ये	जो	**पादौ**	पैर
विष्णोः	भगवान् विष्णुके		

द्रुमजन्मभाजो	वृक्षका जन्म पाने योग्य हैं	क्षेत्राणि	क्षेत्रों (तीर्थों) की
		अनुव्रजतो	यात्रा
यो	जो	न	नहीं करते ॥२२॥
हरेः	श्रीहरिके		

जीवञ्छवो भागवताङ्घ्रिरेणुं
न जातु मर्त्योऽभिलभेत यस्तु ।
श्रीविष्णुपद्या मनुजस्तुलस्याः
श्वसञ्छवो यस्तु न वेद गन्धम् ॥२३॥

जीवन् शवः भागवत अङ्घ्रि रेणुं न जातु मर्त्यः अभिलभेत यस्तु श्रीविष्णुपद्या मनुजः तुलस्याः श्वसन् शवः यस्तु न वेद गन्धम् ॥२३॥

यस्तु	जो	मनुजः	मनुष्य
मर्त्यो	मनुष्य	श्रीविष्णुपद्या	भगवान् नारायणके चरणोंपर चढ़ी
भागवत	भगवद्भक्तोंकी		
अंघ्रि	चरण	तुलस्याः	तुलसीकी
रेणुं	रज	गन्धं	सुगन्ध
न जातु	कभी नहीं	न	नहीं
अभिलभेत	प्राप्त करता (वह)	वेद	जानता (वह)
जीवन्	जीते हुए	श्वसन्	श्वास लेता हुआ भी
शवः	मुर्दा है ।	शवः	शव है ॥२३॥
यस्तु	जो		

तदश्मसारं हृदयं बतेदं
यद् गृह्यमाणैर्हरिनामधेयैः ।
न विक्रियेताथ यदा विकारो
नेत्रे जलं गात्ररुहेषु हर्षः ॥२४॥

तत् अश्मसारं हृदयं बत इदं यत् गृह्यमाणैः हरिनामधेयैः न विक्रियेत् अथ यदा विकारः नेत्रे जलं गात्ररुहेषु हर्षः ॥ २४ ॥

तत्	वह	बत	निश्चय
हृदयं	हृदय	इदं	ऐसा

अश्मसारं	लोहा है
यत्	जो
हरिनामधेयैः	श्रीहरिके नामोंको
गृह्यमाणैः	लेनेपर
विक्रियेत्	विकारवान् (द्रविन्)
न	नहीं होता
अथ विकारः	जिस विकारके होनेसे
यदा	जब
नेत्रे	आँखोंमें
जलं	आँसू आते हैं,
गात्ररुहेषु	रोमोंमें
हर्षः	उत्थान (रोमांच) होता है ॥२४॥

अथाभिधेह्यङ्ग मनोऽनुकूलं
प्रभाषसे भागवतप्रधानः ।
यदाह वैयासकिरात्मविद्या-
विशारदो नृपतिं साधु पृष्टः ॥२५॥

अथ अभिधेहि अङ्ग मनः अनुकूलं प्रभाषसे भागवत प्रधानः यत् आह वैयासकिः आत्मविद्या विशारदः नृपतिं साधुपृष्टः ॥२५॥

अङ्ग	प्रिय सूतजी ! (आप हमारे)
मनः	मनके
अनुकूलं	अनुकूल
प्रभाषसे	बोलते हैं,
अथ	अतः
भागवत	भगवद्भक्तोंमें
प्रधान	प्रमुख
नृपतिं	राजा परीक्षितके
साधुपृष्टः	अच्छे ढङ्गसे पूछनेपर
आत्मविद्या	अध्यात्म विद्या
विशारदः	विशारद
वैयासकिः	शुकदेवजीने
यत्	जो
आह	कहा (वह)
अभिधेहि	सुनाइये ॥२५॥

इति श्रीमद्भागवते महापुराणे वैयासिक्यां पारमहंस्यां
संहितायां द्वितीयस्कन्धे तृतीयोऽध्यायः

अथ चतुर्थोऽध्यायः

सूत उवाच-

वैयासकेरिति वचस्तत्त्वनिश्चयमात्मनः ।
उपधार्य मतिं कृष्णे औत्तरेयः सतीं व्यधात् ॥१॥

वैयासकेः इति वचः तत्त्व निश्चयं आत्मनः उपधार्य मतिं कृष्णे औत्तरेयः सतीं व्यधात् ॥ १ ॥

इति	इस प्रकारके	औत्तरेयः	उत्तरानन्दन परीक्षितने
आत्मनः	आत्म	सतीं	(अपनी) शुद्ध
तत्त्व	तत्त्वके	मतिं	बुद्धि
निश्चयं	निश्चयका	कृष्णे	श्रीकृष्णमें
वैयासकेः	शुकदेवजीका	व्यधात्	लगा दी ॥१॥
वचः	वचन		
उपधार्य	सुनकर		

आत्मजायासुतागारपशुद्रविणबन्धुषु ।
राज्ये चाविकले नित्यं विरूढां ममतां जहौ ॥२॥

आत्म जाया सुत आगार पशु द्रविण बन्धुषु राज्ये च अविकले नित्यं विरूढां ममतां जहौ ॥ २ ॥

आत्म	शरीर,	च	और
जाया	पत्नी,	अविकले	निष्कण्टक
सुत	पुत्र,	राज्ये	राज्यमें
आगार	भवन,	नित्यं	सदा लगी
पशु	पशु (हाथी, घोड़े आदि),	विरूढां	बद्धमूल
		ममतां	ममताको
द्रविण	धन	जहौ	त्याग दिया ॥२॥
बन्धुषु	सम्बन्धियोंमें		

पप्रच्छ चेममेवार्थं यन्मां पृच्छथ सत्तमाः ।
कृष्णानुभावश्रवणे श्रद्दधानो महामनाः ॥३॥

पप्रच्छ च इमं एव अर्थं यत् मां पृच्छथ सत्तमाः कृष्ण अनुभाव श्रवणे श्रद्दधानः महामनाः ॥ ३ ॥

सत्तमा	(शौनकजी !) (आप) महात्मागण	**अनुभाव**	प्रभाव (महिमा) को
		श्रवणे	सुननेमें
मां	मुझसे	**श्रद्धधानः**	श्रद्धा करते हुए
यत्	जो	**महामनाः**	महामनस्वी (परीक्षितने)
पृच्छथ	पूछते हैं,		
इमं एव अर्थं च	इसी प्रयोजनसे ही	**प्रपच्छ**	पूछा था ॥३॥
कृष्ण	श्रीकृष्णके		

संस्थां विज्ञाय संन्यस्य कर्म त्रैवर्गिकं च यत् ।
वासुदेवे भगवति आत्मभावं दृढं गतः ॥४॥

संस्थां विज्ञाय संन्यस्य कर्म त्रैवर्गिकं च यत् वासुदेवे भगवति आत्मभावं दृढं गतः ॥ ४ ॥

संस्थां	मृत्युका समय	**सन्यस्य**	त्यागकर (परीक्षितने)
विज्ञाय	जानकर		
यत्	जो	**भगवति**	भगवान्
च	भी	**वासुदेवे**	श्रीकृष्णमें
त्रैवर्गिकं	अर्थ, धर्म, कामके लिए	**दृढं**	दृढ
		आत्मभावं	आत्मभाव
कर्म	कर्म किये जाते हैं (उन्हें)	**गतः**	कर लिया ॥४॥

राजोवाच–

समीचीनं वचो ब्रह्मन् सर्वज्ञस्य तवानघ ।
तमो विशीर्यते मह्यं हरेः कथयतः कथाम् ॥५॥

समीचीनं वचः ब्रह्मन् सर्वज्ञस्य तव अनघ तमः विशीर्यते मह्यं हरेः कथयतः कथाम् ॥ ५ ॥

ब्रह्मन्	ब्रह्मन् !	तमः	अज्ञान
तव	आप	विशीर्यते	नष्ट हो रहा है
अनघ	निष्पापके		(अतः)
वचः	वचन	हरेः	श्रीहरिकी
समीचीन	अवसरके उपयुक्त हैं	कथां	कथा
	(इनसे)	कथयतः	कहिये ॥५॥
मह्यं	मेरा		

भूय एव विवित्सामि भगवानात्ममायया ।
यथेदं सृजते विश्वं दुर्विभाव्यमधीश्वरैः ॥६॥

भूय एव विवित्सामि भगवान् आत्ममायया यथा इदं सृजते विश्वं दुर्विभाव्यं अधीश्वरैः ॥ ६ ॥

भूय	फिर	विश्वं	विश्वकी
एव	से	सृजते	सृष्टि करते हैं,
विवित्सामि	जानना चाहता हूँ	अधीश्वरैः	लोकपालोंके लिए
यथा	जैसे		भी
भगवान्	भगवान्	दुर्विभाव्यं	(यह विषय) समझना
आत्ममायया	अपनी मायासे		कठिन है ॥६॥
इदं	इस		

यथा गोपायति विभुर्यथा संयच्छसे पुनः ।
यां यां शक्तिमुपाश्रित्य पुरुशक्तिः परः पुमान् ।
आत्मानं क्रीडयन् क्रीडन् करोति विकरोति च ॥७॥

यथा गोपायति विभुः यथा संयच्छते पुनः यां यां शक्तिं उपाश्रित्य पुरुशक्तिः परः पुमान् आत्मानं क्रीडयन् क्रीडन् करोति विकरोति च ॥ ७ ॥

विभुः	(वे) सर्वव्यापक	पुरुशक्तिः	अनन्त शक्ति
यां यां	जिन जिन	परः	परम
शक्ति	शक्तियोंका	पुमान्	पुरुष
उपाश्रित्य	सहारा लेकर (वे)	यथा	जैसे

आत्मानं	अपने आपले	यथा	जैसे
क्रीडयन्	खेलते हुए	गोपायति	पालन करते हैं
क्रीडन्	खेलमें ही	पुनः	फिर
करोति	सृष्टि करते हैं,	संयच्छते	समेट लेते (प्रलय कर देते) हैं (वह सुनाइये ।) ॥७॥
च	पुनः		
विकरोति	मिटा देते हैं (अतः)		

नूनं भगवतो ब्रह्मन् हरेरद्भुतकर्मणः ।
दुर्विभाव्यमिवाभाति कविभिश्चापि चेष्टितम् ॥८॥

नूनं भगवतः ब्रह्मन् हरेः अद्भुत कर्मणः दुर्विभाव्यं इव आभाति कविभिः च अपि चेष्टितम् ॥ ८ ॥

ब्रह्मन्	ब्रह्मन् !	कविभिः	बड़े-बड़े विद्वानों
नूनं	निश्चय ही	च	के लिए
अद्भुत	अद्भुत	अपि	भी
कर्मणः	कर्मा	दुर्विभाव्यं	समझनेमें अत्यन्त कठिन
भगवतः	भगवान्		
हरेः	श्रीहरिकी	इव	जैसी
चेष्टितं	चेष्टा	आभाति	लगती हैं ॥८॥

यथा गुणांस्तु प्रकृतेर्युगपत् क्रमशोऽपि वा ।
विभर्ति भूरिशस्त्वेकः कुर्वन् कर्माणि जन्मभिः ॥९॥

यथा गुणान् तु प्रकृतेः युगपत् क्रमशः अपि वा विभर्ति भूरिशः तु एकः कुर्वन् कर्माणि जन्मभिः ॥ ९ ॥

एकः तु	एक ही (भगवान्)	क्रमशः	क्रमशः
प्रकृतेः	प्रकृतिके	अपि	भी
यथा गुणान्	जैसे गुणोंके अनुसार	कर्माणि	कर्म
युगपत्	एक साथ	कुर्वन्	करते हुए
भूरिशः	बहुत-से	जन्मभिः	अवतार
वा	अथवा	विभर्ति	धारणा करते हैं ॥९॥

विचिकित्सितमेतन्मे ब्रवीतु भगवान् यथा ।
शाब्दे ब्रह्मणि निष्णातः परस्मिंश्च भवान्खलु ॥१०॥

विचिकित्सितं एतत् मे ब्रवीतु भगवान् यथा शाब्दे ब्रह्मणि निष्णातः परस्मिन् च भवान् खलु ॥ १० ॥

एतत्	यह	**ब्रह्मणि**	ब्रह्म (वेद) में
मे	मेरा	**निष्णातः**	प्रवीण हैं
विचिकित्सितं	सन्देह है,	**खलु**	निश्चय
ब्रवीतु	(आप) बतलावें	**भवान्**	आप
भगवान्	भगवन् (आप)	**परस्मिन्**	परब्रह्ममें
यथा	जैसे	**च**	भी (वैसे ही हैं) ॥१०॥
शाब्दे	शब्द		

सूत उवाच–

इत्युपामन्त्रितो राज्ञा गुणानुकथने हरेः ।
हृषीकेशमनुस्मृत्य प्रतिवक्तुं प्रचक्रमे ॥११॥

इति उपामन्त्रितः राज्ञा गुण अनुकथने हरेः हृषीकेशं अनुस्मृत्य प्रतिवक्तुं प्रचक्रमे ॥ ११ ॥

इति	इस प्रकार	**अनुकथने**	वर्णन करनेके लिए
राज्ञा	परीक्षित द्वारा	**हृषीकेशं**	हृषीकेशका
उपामन्त्रितः	साग्रह पूछ जानेपर	**अनुस्मृत्य**	स्मरण करके
हरेः	श्रीहरिके	**प्रतिवक्तुं**	उत्तर देनेका
गुण	गुणोंका	**प्रचक्रमे**	उपक्रम किया ॥११॥

श्रीशुक उवाच–

नमः परस्मै पुरुषाय भूयसे
सदुद्भवस्थाननिरोधलीलया ।
गृहीतशक्तित्रितयाय देहिना-
मन्तर्भवायानुपलक्ष्यवर्त्मने ॥१२॥

नमः परस्मै पुरुषाय भूयसे सत् उद्भव स्थान निरोध लीलया गृहीत शक्ति चित्तयाय देहिनां अन्तः भवाय अनुपलक्ष्य वर्त्मने ॥ १२ ॥

सत्	संसारके	**अन्तः**	अन्तःकरणमें
उद्भव	उत्पत्ति	**भवाय**	उनके कल्याणके लिए स्थित
स्थान	स्थिति		
निरोध	प्रलय (के लिए)	**अनुपलक्ष्य**	अचिन्त्य
लीलया	लीलासे	**वर्त्मने**	मार्ग (स्वरूप) वाले
त्रितयाय	त्रिगुण होने (तीन)	**परस्मै**	परम
शक्तिः	रूप (ब्रह्मा, विष्णु, शिव)	**पुरुषाय**	पुरुषको
		भूयसे	बार बार
गृहीत	धारण किये	**नमः**	नमस्कार है ॥१२॥
देहिनां	प्राणियोंके		

भूयो नमः सद्वृजिनच्छिदेऽसता-
मसम्भवायाखिलसत्त्वमूर्तये ।
पुंसां पुनः पारमहंस्य आश्रमे
व्यवस्थितानामनुमृग्यदाशुषे ॥१३॥

भूयः नमः सत् वृजिनच्छिदे असतां असम्भवाय अखिल सत्त्व मूर्तये पुंसां पुनः पारमहंसस्य आश्रमे व्यवस्थितानां अनुमृग्यत आशुषे ॥१३॥

सत्	सत्पुरुषोंकी	**व्यवस्थितानां**	स्थित
वृजिनच्छिदे	विपत्ति काटनेवाले,	**पुंसां**	पुरुषोंके लिए
असतां	दुष्टोंकी	**पुनः**	भी
असम्भवाय	अभिवृद्धि रोकनेवाले,	**अनुमृग्यत्**	अन्वेष्य वस्तु
अखिल	समस्त	**आशुषे**	प्रदान करनेवाले (प्रभुको)
सत्त्व	प्राणियोंके		
मूर्तये	स्वरूप,	**भूयः**	फिरसे
पारमहंसस्य	परमहंसोंके	**नमः**	नमस्कार ॥१३॥
आश्रमे	आश्रममें		

नमो नमस्तेऽस्त्वृषभाय सात्वतां
विदूरकाष्ठाय मुहुः कुयोगिनाम् ।

निरस्तसाम्यातिशयेन राधसा
स्वधामनि ब्रह्मणि रंस्यते नमः ॥१४॥

नमो नमस्ते अस्तु ऋषभाय सात्वतां विदूर काष्ठाय मुहुः कुयोगिनां निरस्त साम्य अतिशयेन राधसा स्वधामनि ब्रह्मणि रंस्यते नमः ॥१४॥

सात्वतां	भक्तोंके	**राधसा**	(उनके) ऐश्वर्यमें
ऋषभाय	अभीष्टपूर्ण करनेवाले	**साम्य**	समतावाला
मुहुः	बार बार	**निरस्त**	कोई है हो नहीं,
कुयोगिनां	(राजस-तामस साधक) कुयोगियोंसे	**अतिशयेन**	अधिकवाला कहाँसे होगा ?
विदूर	अत्यन्त दूर	**स्वधामनि**	अपने स्वरूप
काष्ठाय	स्वरूपवाले (भगवान्‌को)	**ब्रह्मणि**	ब्रह्ममें
नमो नमस्ते	बार बार नमस्कार	**रंस्यते**	विहार करनेवाले प्रभुको
अस्तु	है ।	**नमः**	नमस्कार है ॥१४॥

यत्कीर्तनं यत्स्मरणं यदीक्षणं
यद्वन्दनं यच्छ्रवणं यदर्हणम् ।
लोकस्य सद्यो विधुनोति कल्मषं
तस्मै सुभद्रश्रवसे नमो नमः ॥१५॥

यत् कीर्तनं यत् स्मरणं यत् ईक्षणं यत् वन्दनं यत् श्रवणं यत् अर्हणं लोकस्य सद्यः विधुनोति कल्मषं तस्मै सुभद्र श्रवसे नमो नमः ॥ १५ ॥

यत् कीर्तनं	जिनका प्रकीर्तन,	**लोकस्य**	लोगोंके
यत् स्मरणं	जिनका स्मरण,	**कल्मषं सद्यः**	पापोंको तत्काल
यत् ईक्षणं	जिनका दर्शन,	**विधुनोति**	नष्ट कर देती है
यत् वन्दनं	जिनको प्रणाम करना,	**तस्मै**	उन
यत् श्रवणं	जिनका (नाम गुण लीला) सुनना,	**सुभद्र श्रवसे**	पुण्य कीर्तिको
यत् अर्हणं	जिनकी पूजा	**नमो नमः**	बार बार नमस्कार है ॥१५॥

विचक्षणा यच्चरणोपसादनात्
सङ्गंव्युदस्योभयतोऽन्तरात्मनः ।
विन्दन्ति हि ब्रह्मगतिं गतक्लमा-
स्तस्मै सुभद्रश्रवसे नमो नमः ॥१६॥

विचक्षणा यत् चरण उपसादनात् सङ्गं व्युदस्य उभयतः अन्तरात्मनः विन्दन्ति हि ब्रह्मगतिं गतक्लमाः तस्मै सुभद्रश्रवसे नमो नमः ॥ १६ ॥

विचक्षणा	विवेकीजन	व्युदस्य	त्यागकर
यत्	जिनके	गतक्लमाः हि	बिना परिश्रमके ही
चरण	चरणोंकी	ब्रह्मगतिं	ब्रह्मगति
उपसादनात्	शरण लेकर	विन्दन्ति	प्राप्त कर लेते हैं,
अन्तरात्मनः	चित्तसे	तस्मै	उन
उभयतः	(इस लोक परलोक) दोनोंकी	सुभद्रश्रवसे	पुण्य कीर्तिको
		नमो नमः	बार बार नमस्कार है ॥१६॥
सङ्गं	आसक्ति		

तपस्विनो दानपरा यशस्विनो
मनस्विनो मन्त्रविदः सुमङ्गलाः ।
क्षेमं न विन्दन्ति विना यदर्पणं
तस्मै सुभद्रश्रवसे नमो नमः ॥१७॥

तपस्विनः दानपरा यशस्विनः मनस्विनः मन्त्रविदः सुमङ्गलाः क्षेमं न विन्दन्ति विना यत् अर्पणं तस्मै सुभद्रश्रवसे नमो नमः ॥१७॥

तपस्विनः	तपस्वी,	मन्त्रविदः	मन्त्रोंके जानकार
दानपरा	दानी,	यत्	जिनको (अपने कर्म एवं कर्मफल)
यशस्विनः	यशस्वी,		
मनस्विनः	मनस्वी,	अर्पणं	अर्पण किये
सुमङ्गलाः	उत्तम मङ्गल देनेवाले	विना	विना (अपना)

क्षेमं	कल्याण	सुभद्रश्रवसे	पुण्य कीर्तिको
न	नहीं	नमो नमः	बार बार नमस्कार
विन्दन्ति	कर पाते		है ॥१७॥
तस्मै	उन		

किरातहूणान्ध्रपुलिन्दपुल्कसा
आभीरकङ्का यवनाः खसादयः ।
येऽन्ये च पापा यदुपाश्रयाश्रयाः
शुध्यन्ति तस्मै प्रभविष्णवे नमः ॥१८॥

किरात हूण आन्ध्र पुलिन्द पुल्कसा आभीर कङ्का यवनाः खसादयः ये अन्ये च पापा यदु अपाश्रया श्रयाः शुद्ध्यन्ति तस्मै प्रभविष्णवे नमः ॥ १८ ॥

किरात	किरात,	च	भी
हूण	हूण,	पापा	पापी
आन्ध्र	आन्ध्र,	यत्	जिन
पुलिन्द	चाण्डाल,	अपाश्रया	अशरण शरणकी
पुल्कसा	कसाई,	श्रयाः	शरणसे
आभीर	आभीर,	शुध्यन्ति	शुद्ध हो जाते हैं
कङ्का	कङ्क,	तस्मै	उन
यवनाः	यवन,	प्रभविष्णवे	सर्वशक्तिमानको
खसादयः	शक आदि	नमः	नमस्कार है ॥१८॥
ये अन्ये	जो दूसरे		

स एष आत्माऽऽत्मवतामधीश्वर-
स्त्रयीमयो धर्ममयस्तपोमयः ।
गतव्यलीकैरजशङ्करादिभि-
र्वितर्क्यलिङ्गो भगवान् प्रसीदताम् ॥१९॥

स एषः आत्मा आत्मवतां अधीश्वरः त्रयीमयः धर्ममयः तपोमयः गत व्यलीकैः अज शङ्कर आदिभिः वितर्क्य लिङ्गः भगवान् प्रसीदतां ॥१९॥

आत्मवतां	आत्मज्ञानियोंके
आत्मा	आत्मा हैं,
अधीश्वरः	वे सर्वेश्वर
त्रयीमयः	वेद स्वरूप
धर्ममयः	धर्म स्वरूप
तपोमयः	तपः रूप हैं
गतव्यलीकैः	निश्छल हृदयसे
अज	ब्रह्मा
शङ्करआदिभिः	शंकर आदि द्वारा
लिङ्गैः	जिनका स्वरूप
वितर्क्य	चिन्तन (ध्यान किया जाता है)
स एष	वही ये
भगवान्	भगवान्
प्रसीदतां	(हम पर) प्रसन्न हों ॥१९॥

श्रियः पतिर्यज्ञपतिः प्रजापति-
र्धियां पतिर्लोकपतिर्धरापतिः ।
पतिर्गतिश्चान्धकवृष्णिसात्वतां
प्रसीदतां मे भगवान् सतां पतिः ॥२०॥

श्रियः पतिः यज्ञपतिः प्रजापतिः धियां पतिः लोकपतिः धरापतिः पतिः गतिः च अन्धक वृष्णि सात्वतां प्रसीदतां मे भगवान् सतां पतिः ॥२०॥

श्रियः पतिः	लक्ष्मीके स्वामी,
यज्ञपतिः	यज्ञेश्वर,
प्रजापतिः	प्रजाके स्वामी,
धियां पतिः	बुद्धियोंके स्वामी,
लोकपतिः	लोकोंके स्वामी,
धरापतिः	पृथ्वीके स्वामी,
अन्धक	अन्धक-
वृष्णि	वृष्णि-
सात्वतां पतिः	सात्वत वंशके लोगोंके स्वामी
सतां पतिः	भक्तोंके स्वामी
च गतिः	और गति (आश्रय)
भगवान्	भगवान् श्रीकृष्ण
मे	मुझपर
प्रसीदतां	प्रसन्न हों ॥२०॥

यदङ्घ्यभिध्यानसमाधिधौतया
धियानुपश्यन्ति हि तत्त्वमात्मनः ।
वदन्ति चैतत् कवयो यथारुचं
स मे मुकुन्दो भगवान् प्रसीदताम् ॥२१॥

यत् अङ्घ्रि अनुध्यान समाधि धौतया धिया अनुपश्यन्ति हि तत्त्वं आत्मनः वदन्ति च एतत् कवयः यथा रुचं स मे मुकुन्दः भगवान् प्रसीदताम् ॥ २१ ॥

हि	क्योंकि	अनुपश्यन्ति	देखते (अनुभव
यत्	जिनके		करते) हैं
अघ्रि	चरणोंके	च एतत्	तथा इनका
अनुध्यान	बार बार ध्यानकी	यथारुचं	अपनी रुचिके
समाधि	एकाग्रतासे		अनुसार
धौतया	शुद्ध हुई	वदन्ति	वर्णन करते हैं
धिया	बुद्धिसे	स भगवान्	वे भगवान्
कवयः	बुद्धिमान	मुकुन्दः	मुकुन्द
आत्मनः	आत्म-	मे	मुझपर
तत्त्वं हि	तत्त्वको	प्रसीदतां	प्रसन्न हों ॥२१॥

प्रचोदिता येन पुरा सरस्वती
वितन्वताजस्य सतीं स्मृतिं हृदि ।
स्वलक्षणा प्रादुरभूत् किलास्यतः
स मे ऋषीणामृषभः प्रसीदताम् ॥२२॥

प्रचोदिता येन पुरा सरस्वती वितन्विता अजस्य सतीं स्मृतीं हृदि स्वलक्षणा प्रादुः अभूत् किल आस्यतः स मे ऋषीणां ऋषभः प्रसीदतां ॥२२॥

येन	जिनके द्वारा	स्वलक्षणा	अपने नित्यरूपसे
पुरा	(सृष्टिके) प्रारम्भमें		(वह वेदवाणी)
प्रचोदिता	प्रेरितकी गयी	आस्यतः	(ब्रह्माके) मुखसे
सरस्वती	वाणीने	प्रादुः	प्रकट
अजस्य	ब्रह्माके	अभूत्	हुई
हृदि	हृदयमें	स	वे
सतीं	(पूर्वकल्पकी) सत्य	ऋषीणां	ऋषियोंके
स्मृतीं	स्मृति	ऋषभः	ज्ञानदाता
वितन्विता	जागृतकी,	मे	मुझपर
किल	पुनः	प्रसीदतां	प्रसन्न हों ॥२२॥

भूतैर्महद्भिर्य इमाः पुरो विभु-
र्निर्माय शेते यदमूषु पूरुषः ।

भुङ्क्ते गुणान् षोडश षोडशात्मकः
सोऽलङ्कृषीष्ट भगवान् वचांसि मे ॥२३॥

भूतैः महद्भिः य इमाः पुरः विभुः निर्माय शेते यत् अमूषु पुरुषः भुङ्क्ते गुणान् षोडश षोडशात्मकः सः अलंकृषीष्ट भगवान् वचांसि मे ॥२३॥

महद्भिः	महा	**षोडशात्मकः**	सोलह कलाओं (पाँच ज्ञानेन्द्रिय, पाँच कर्मेन्द्रिय, पाँच प्राण, एक मन) से युक्त होकर
भूतैः	भूतों (पृथ्वी, जल, अग्नि, वायु, आकाश) द्वारा	**षोडश गुणान्**	(इनके) सोलह विषयोंका
य	जो	**भुंक्ते**	उपभोग करते हैं
विभुः	सर्वव्यापक	**सः**	वे
इमाः	इन	**भगवान्**	भगवान्
पुरः	पुरों (शरीरों) को	**मे**	मेरी
निर्माय	निर्माण करके	**वचांसि**	वाणीको
यत्	क्योंकि	**अलंकृषीष्ट**	अलंकृत करें ॥२३॥
अमूषु	इनमें		
शेते	सोते (जीव रूपसे निवास करते) हैं		
पुरुषः	इसलिए पुरुष कहे जाते हैं		

नमस्तस्मै भगवते वासुदेवाय वेधसे ।
पपुर्ज्ञानमयं सौम्या यन्मुखाम्बुरुहासवम् ॥२४॥

नमः तस्मै भगवते वासुदेवाय वेधसे पपुः ज्ञानमयं सौम्या यत् मुखाम्बुरुह आसवम् ॥२४॥

तस्मै	उन	**नमः**	नमस्कार है
भगवते	भगवान्	**यत्**	जिनके
वासुदेवाय	वासुदेव स्वरूप	**मुखाम्बुरुह**	मुख कमलकी
वेधसे	शास्त्र निर्माता (व्यासजी) को	**ज्ञानमयं**	ज्ञानमयी

आसवं	सुधाको	पपुः	पीते हैं ॥२४॥
सौम्या	शांत सत्पुरुष		

एतदेवात्मभू राजन् नारदाय विपृच्छते ।
वेदगर्भोऽभ्यधात् साक्षाद् यदाह हरिरात्मनः ॥२५॥

एतत् एव आत्मभू राजन् नारदाय विपृच्छते वेदगर्भः अभ्यधात् साक्षात् यत् आह हरिः आत्मनः ॥ २५ ॥

राजन्	परीक्षित् !	वेदगर्भ	वेदगर्भ
यत्	जो	आत्मभूः	ब्रह्माजीने
साक्षात्	साक्षात्	आत्मनः	अपना स्वरूप
हरिः	श्रीहरिने	नारदाय	नारदजी द्वारा
आह	कहा था	विपृच्छते	पूछे जानेपर
एतत् एव	यह ही	अभ्यधात्	बतलाया था ॥२५॥

इति श्रीमद्भागवते महापुराणे वैयासिक्यां पारमहंस्यां
संहितायां द्वितीयस्कन्धे चतुर्थोऽध्यायः

अथ पञ्चमोऽध्यायः

नारद उवाच–

देवदेव नमस्तेऽस्तु भूतभावन पूर्वज ।
तद् विजानीहि यज्ज्ञानमात्मतत्त्वनिदर्शनम् ॥१॥

देवदेव नमः ते अस्तु भूतभावन पूर्वज तत् विजानीहि यत् ज्ञानं आत्मतत्त्व निदर्शनम् ॥ १ ॥

भूत भावन	सब प्राणियोंको सङ्कल्पसे ही उत्पन्न करनेवाले	अस्तु	है ।
		यत्	जो
		ज्ञानं	ज्ञान
पूर्वज	सबके पूर्वज	आत्मतत्त्व	आत्मतत्त्वको
देवदेव	देवताओंके भी देवता !	निदर्शनं	विचार देनेवाला है
		तत्	वह
ते	आपको	विजानीहि	बतलाइये ॥१॥
नमः	नमस्कार		

यद्रूपं यदधिष्ठानं यतः सृष्टमिदं प्रभो ।
यत्संस्थं यत्परं यच्च तत् तत्त्वं वद तत्त्वतः ॥२॥

यत् रूपं यत् अधिष्ठानं यतः सृष्टं इदं प्रभो यत् संस्थ यत् परं यत् च तत् तत्त्वं वद तत्त्वतः ॥ २ ॥

प्रभो	प्रभो !	यतः	जिससे
इदं	इस संसारका	सृष्टं	(इसकी) उत्पत्ति हुई है,
यत्	जो		
रूपं	लक्षण है,	यत्	जिसमें
यत्	जो	संस्थं	(इसका) लय होता है,
अधिष्ठानं	आधार है,		

यत्	जिसके	तत्	वह
परं	आधीन है,	तत्त्वं	तत्त्व
यत्	जो (यह)	तत्त्वतः	ठीक ठीक
च	है	वद	बतलाइये ॥२॥

सर्वं ह्येतद् भवान् वेद भूतभव्यभवत्प्रभुः ।
करामलकवद् विश्वं विज्ञानावसितं तव ॥३॥

सर्वं हि एतत् भवान् वेद भूत भव्य भवत् प्रभुः कर आमलकवत् विश्वं विज्ञान अवसितं तव ॥ ३ ॥

हि	क्योंकि		स्वामी हो,
भवान्	आप	तव	आपकी
एतत्	यह	विज्ञान	ज्ञानकी
सर्वं	सब	अवसितं	दृष्टिमें
वेद	जानते हैं—	विश्वं	संसार
भूत	जो बीत गया,	कर	हाथपर रखे
भव्य	जो हो रहा है,	आमलकवत्	आँवलेके समान
भवत्	जो आगे होगा,		है ॥३॥
प्रभुः	आप उसके		

यद्विज्ञानो यदाधारो यत्परस्त्वं यदात्मकः ।
एकः सृजसि भूतानि भूतैरेवात्ममायया ॥४॥

यत् विज्ञानं यत् आधारः यत् परः त्वं यत् आत्मकः एकः सृजसि भूतानि भूतैः एव आत्ममायया ॥ ४ ॥

त्वं	आपको	आत्मकः	(आपका) स्वरूप है
यत्	जहाँसे		(वह बतावें) ।
विज्ञानं	यह ज्ञान मिला,	एकः	(आप) अकेले ही
यत्	जो (आपका)	भूतानि	प्राणियोंको
आधारः	आधार है,	भूतैः	(पञ्चमहा) भूतोंसे
यत्	जिसके	एव	ही
परः	(आप) परायण हो,	आत्ममायया	अपनी मायासे
यत्	जो	सृजसि	बनाते हैं ॥४॥

आत्मन् भावयसे तानि न पराभावयन् स्वयम् ।
आत्मशक्तिमवष्टभ्य ऊर्णनाभिरिवावलमः ॥५॥

आत्मन् भावयसे तानि न पर अभावयन् स्वयं आत्मशक्ति अवष्टभ्य ऊर्णनाभिः इव अवलमः ॥ ५ ॥

ऊर्णनाभिः	मकड़ीके (जालेके)	**भावयसे**	सृष्टि (भावना)
इव	समान	**स्वयं**	स्वयं
अवलमः	अनायास	**पर**	अपने भिन्न (कुछ)
आत्मशक्ति	अपनी शक्तिका	**न**	नहीं
अवष्टभ्य	आश्रय लेकर	**अभावयन्**	प्रकट करते (निर्विकार रहते हैं) ॥५॥
आत्मन्	अपने भीतर ही		
तानि	उन (प्राणियों) की		

नाहं वेद परं ह्यस्मिन्नापरं न समं विभो ।
नामरूपगुणैर्भाव्यं सदसत् किञ्चिदन्यतः ॥६॥

न अहं वेद परं हि अस्मिन् न अपरं न समं विभो नाम रूप गुणैः भाव्यं सत् असत् किञ्चित् अन्यतः ॥ ६ ॥

विभो	प्रभो !	**अन्यतः**	(जो आपसे) भिन्न हों;
हि	निश्चय ही	**सत्**	(वह) सत् हो
अस्मिन्	इस संसारमें	**असत्**	(या) असत् हो
नाम रूप गुणैः	नाम, रूप, गुणोंसे	**न परं अपरं**	(आपसे) श्रेष्ठ (या) कनिष्ठ नहीं है,
भाव्यं	जो जाना जाता है	**न समं**	न समान ही है ॥६॥
अहं	(उनमें) मैं		
किंचित्	कुछ (भी)		
न वेद	नहीं जानता		

स भवानचरद् घोरं यत् तपः सुसमाहितः ।
तेन खेदयसे नस्त्वं पराशङ्कां प्रयच्छसि ॥७॥

स भवान् अचरत् घोरं यत् तपः सुसमाहितः तेन खेदयसे नः त्वं परा शङ्कां प्रयच्छसि ॥ ७ ॥

स	ऐसे	नः	हमको
भवान्	आपने	खेदयसे	खिन्न बनाते हैं (और)
यत्	जो	परा	(आपसे भी) कोई श्रेष्ठ है
सुसमाहितः	अत्यन्त एकाग्र होकर	शङ्कां	(यह) शङ्का
घोरं	कठोर	प्रयच्छसि	देते (उत्पन्न करते) हैं ॥७॥
तपः	तपस्या		
अचरत्	की		
तेन	उससे		
त्वं	आप		

एतन्मे पृच्छतः सर्वं सर्वज्ञ सकलेश्वर ।
विजानीहि यथैवेदमहं बुद्ध्येऽनुशासितः ॥८॥

एतत् मे पृच्छतः सर्वं सर्वज्ञ सकलेश्वर विजानीहि यथा एव इदं अहं बुद्धेः अनुशासितः ॥ ८ ॥

एतत्	यह	सर्वज्ञ	(आप) सर्वज्ञ (तथा)
यथा एव	जैसा भी (है)	सकलेश्वर	सबके स्वामी हैं
इदं सर्वं	यह सब	अहं	मैं
मे	मेरे	बुद्धेः	बुद्धिके द्वारा
पृच्छतः	पूछे हुएको	अनुशासितः	प्रेरित (जिज्ञासु) हूँ ॥८॥
विजानीहि	बतलाइये		

ब्रह्मोवाच–

सम्यक् कारुणिकस्येदं वत्स ते विचिकित्सितम् ।
यदहं चोदितः सौम्य भगवद्वीर्यदर्शने ॥९॥

सम्यक् कारुणिकस्य इदं वत्सते विचिकित्सितं यत् अहं चोदितः सौम्य भगवत् वीर्य दर्शने ॥ ९ ॥

सौम्य	शान्त प्रकृतिवाले	कारुणिकस्य	दयालुका
वत्स	वत्स (नारद) !	इदं	यह
ते	तुम	विचिकित्सितं	पूछना

सम्यक्	उचित ही है	वीर्य	पराक्रमको
यत्	जिससे	दर्शने	दिखलाने (वर्णन करने) में
अहं	मैं		
भगवत्	भगवान्‌के	चोदितः	प्रेरित हुआ ॥९॥

नानृतं तव तच्चापि यथा मां प्रब्रवीषि भोः ।
अविज्ञाय परं मत्त एतावत्त्वं यतो हि मे ॥१०॥

न अनृतं तव तत् च अपि यथा मां प्रब्रवीषि भोः अविज्ञाय परं मत्त एतावत्त्वं यतः हि मे ॥ १० ॥

भोः	हे पुत्र !	हि	क्योंकि
तव	तुम्हारी	मत्त	मुझसे
तत्	वह	परं	परे (श्रेष्ठ) को
च अपि	बात भी	अविज्ञाय	न जाननेके
अनृतं	झूठी	यतः	कारण
न	नहीं है	मे	मुझे
यथा	जैसा	एतावत्त्वं	ऐसा ही जाना जाता है ॥१०॥
मां	मुझे		
प्रब्रवीषि	बतलाते हो		

येन स्वरोचिषा विश्वं रोचितं रोचयाम्यहम् ।
यथार्कोऽग्निर्यथा सोमो यथर्क्षग्रहतारकाः ॥११॥

येन स्वरोचिषा विश्वं रोचितं रोचयामि अहं यथा आकः अग्निः यथा सोमः यथा अर्क्ष ग्रह तारकाः ॥११॥

येन	जिन	अग्निः	अग्नि
स्वरोचिषा	स्वयं प्रकाश द्वारा	यथा	जैसे
रोचितं	प्रकाशित	सोमः	चन्द्रमा
विश्वं	विश्वको	यथा	जैसे
अहं	मैं (वैसे ही)	अर्क्ष	नक्षत्र
रोचयामि	प्रकाशित करता हूँ	ग्रह	ग्रह
यथा	जैसे	तारकाः	तारे ॥११॥
अर्कः	सूर्य (या)		

तस्मै नमो भगवते वासुदेवाय धीमहि ।
यन्मायया दुर्जयया मां ब्रुवन्ति जगद्गुरुम् ॥१२॥

तस्मै नमः भगवते वासुदेवाय धीमहि यत् मायया दुर्जयया मां ब्रुवन्ति जगद्गुरुम् ॥ १२ ॥

तस्मै	उन	**दुर्जयया**	दुर्जय
भगवते	भगवान्	**मायया**	मायासे मोहित (लोग)
वासुदेवाय	वासुदेवको		
नमः	नमस्कार	**मां**	मुझे
धीमहि	हम उनका ध्यान करते हैं	**जगद्गुरुं**	जगद्गुरु
		ब्रुवन्ति	कहते हैं ॥१२॥
यत्	जिनकी		

विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया ।
विमोहिता विकत्थन्ते ममाहमिति दुर्धियः ॥१३॥

विलज्जमानया यस्य स्थातुं ईक्षापथे अमुया विमोहिताः विकत्थन्ते मम अहं इति दुर्धियः ॥ १३ ॥

यस्य	जिनसे	**विमोहिताः**	(उसी मायासे) मोहित
विलज्जमानया	अत्यन्त लज्जित होकर (माया)	**दुर्धियः**	दुर्बुद्धि लोग
अमुया	उनके	**मम**	यह मेरा है
ईक्षापथे	दृष्टि पथके (सामने)	**इति**	यह
स्थातुं	ठहर (नहीं पाती, किन्तु)	**आह**	कहकर
		विकत्थन्ते	बकवाद करते हैं ॥१३॥

द्रव्यं कर्म च कालश्च स्वभावो जीव एव च ।
वासुदेवात्परो ब्रह्मन्न चान्योऽर्थोऽस्ति तत्त्वतः ॥१४॥

द्रव्यं कर्म च कालः च स्वभावः जीव एव च वासुदेवात् परः ब्रह्मन् न च अन्यः अर्थः अस्ति तत्त्वतः ॥ १४ ॥

ब्रह्मन्	ब्रह्मन् (नारद) !	जीव	जीव
द्रव्यं	पदार्थ,	एव	भी
कर्म	कर्म,	वासुदेवात्	वासुदेवसे
च	और	परः	पृथक
कालः	काल	तत्त्वतः	तत्त्वतः
च	तथा	अन्यः	दूसरा
स्वभावः	प्रकृति	अर्थः	तत्त्व (पदार्थ)
च	एवं	अस्ति च न	है ही नहीं ॥१४॥

नारायणपरा वेदा देवा नारायणाङ्गजाः ।
नारायणपरा लोका नारायणपरा मखाः ॥१५॥

नारायण परा वेदा देवानारायण अङ्गजाः नारायणपरा लोका नारायणपरा मखाः ॥ १५ ॥

वेदा	वेद	लोका	सब लोक
नारायणपरा	नारायण-परायण हैं,	नारायणपरा	नारायण-परायण हैं
देवा	देवता	मखाः	यज्ञ
नारायण	नारायणके	नारायणपरा	नारायणके लिए होते
अङ्गजाः	अंगोंसे उत्पन्न हैं,		हैं ॥१५॥

नारायणपरो योगो नारायणपरं तपः ।
नारायणपरं ज्ञानं नारायणपरा गतिः ॥१६॥

नारायणपरः योगः नारायण परं तपः नारायण परं ज्ञानं नारायण परा गतिः ॥ १६ ॥

योगः	साधन (योग)	नारायण	नारायण ही
नारायणपरः	नारायणकी प्राप्तिके लिए होते हैं,	परं ज्ञानं	परम ज्ञान हैं
		नारायण	नारायण ही
तपः	तपस्या	परा गतिः	परमगति हैं ॥१६॥
नारायण परं	नारायणकी प्रसन्नताके लिए है,		

तस्यापि द्रष्टुरीशस्य कूटस्थस्याखिलात्मनः ।
सृज्यं सृजामि सृष्टोऽहमीक्षयैवाभिचोदितः ॥१७॥

तस्य अपि द्रष्टुः ईशस्य कूटस्थस्य अखिलात्मनः सृज्यं सृजामि सृष्टः अहं ईक्षया एव अभिचोदितः ॥१७॥

तस्य	उन	स्रष्टः अहं	उत्पन्न किया गया मैं
कूटस्थस्य	निर्विकार	ईक्षया	(उनकी) दृष्टिसे
ईशस्य	सबके स्वामीके	अभिचोदितः	प्रेरित होकर
द्रष्टुः अपि	द्रष्टा मात्र होनेपर भी	एव	ही
अखिलात्मनः	(उन) सर्वात्माके द्वारा	सृज्यंसृजामि	उनकी सृष्टिकी रचना करताहूँ ॥१७॥

सत्त्वं रजस्तम इति निर्गुणस्य गुणास्त्रयः ।
स्थितिसर्गनिरोधेषु गृहीता मायया विभोः ॥१८॥

सत्त्वं रजः तम इति निर्गुणस्य गुणाः त्रयः स्थिति सर्ग निरोधेषु गृहीता मायया विभोः ॥ १८ ॥

सत्त्वं	सत्त्व	विभोः	(उन) सर्वव्यापकने
रजः	रज	स्थिति	स्थिति
तम	तम	सर्ग	सृष्टि
निर्गुणस्य	निर्गुण परमात्माके	निरोधेषु	प्रलयके लिए
इति	ये	मायया	मायासे
त्रयः	तीन	गृहीता	(इन्हें) ग्रहण किया है ॥१८॥
गुणाः	गुण हैं ।		

कार्यकारणकर्तृत्वे द्रव्यज्ञानक्रियाश्रयाः ।
बध्नन्ति नित्यदा मुक्तं मायिनं पुरुषं गुणाः ॥१९॥

कार्य करण कर्तृत्वे द्रव्य ज्ञान क्रिया आश्रयाः बध्नन्ति नित्यदा मुक्तं मायिनं पुरुषं गुणाः ॥ १९ ॥

द्रव्य	द्रव्य (पदार्थ),	गुणाः	(ये तीनों) गुण
ज्ञान	ज्ञान (और)	कार्य	कार्य,
क्रिया	क्रियाका	करण	इन्द्रिय (तथा)
आश्रयाः	आश्रय लेकर	कर्तृत्वे	कर्तापन द्वारा

नित्यदा	नित्य ही	**पुरुषं**	पुरुषको
मुक्तं	मुक्त	**बध्नन्ति**	बाँधते हैं ॥१९॥
मायिनं	मायाके स्वामी		

स एष भगवाँल्लिङ्गैस्त्रिभिरेभिरधोक्षजः ।
स्वलक्षितगतिर्ब्रह्मन् सर्वेषां मम चेश्वरः ॥२०॥

स एष भगवान् लिङ्गैः त्रिभिः एभिः अधोक्षजः स्वलक्षित गतिः ब्रह्मन् सर्वेषां मम च ईश्वरः ॥ २० ॥

ब्रह्मन्	ब्रह्मन् (नारद) !	**गतिः**	(अपनी) गति (चेष्टा) को
एष	यही	**स्वलक्षित**	अपने स्वयं ही समझनेवाले हैं
अधोक्षजः	इन्द्रियातीत	**सर्वेषां**	(वे) सबके
स	वे	**मम च**	(और) मेरे भी
भगवान्	भगवान् हैं	**ईश्वरः**	स्वामी हैं ॥२०॥
एभिः	(जो) इन		
त्रिभिः	तीनों		
लिंगैः	चिह्नोंसे		

कालं कर्म स्वभावं च मायेशो मायया स्वया ।
आत्मन् यदृच्छया प्राप्तं विबुभूषुरुपाददे ॥२१॥

कालं कर्म स्वभावं च मायेशः मायया स्वया आत्मन् यदृच्छया प्राप्तं विबुभूषुः उपाददे ॥ २१ ॥

मायेशः	मायापति (भगवान्) ने	**यदृच्छया**	अकस्मात् आये हुए
विबुभूषुः	अनके होने (विभाजित होने) की इच्छासे	**कालं**	काल
		कर्म	कर्म
		च	तथा
स्वया	अपनी	**स्वभावं**	प्रकृतिको
मायया	मायासे	**उपाददे**	स्वीकार कर लिया ॥२१॥
आत्मन्	अपनेमें		

कालाद् गुणव्यतिकरः परिणामः स्वभावतः ।
कर्मणो जन्म महतः पुरुषाधिष्ठितादभूत् ॥२२॥

कालात् गुण व्यतिकरः परिणामः स्वभावतः कर्मणः जन्म महतः पुरुषाधिष्ठितात् अभूत् ॥ २२ ॥

पुरुषादधिष्ठितात्	पुरुषके अधिष्ठान (आधार) बननेसे	परिणामः	उनमें परिवर्तन होनेसे
कालात्	कालके द्वारा	कर्मणः	कर्मने
गुण	(तीनों) गुणोंमें	महतः	महत्तत्त्वको
व्यतिकरः	क्षोभ उत्पन्न होनेसे	जन्म	जन्म दिया ॥२२॥
स्वभावतः	प्रकृतिके द्वारा		

महतस्तु विकुर्वाणाद्रजःसत्त्वोपबृंहितात् ।
तमःप्रधानस्त्वभवद् द्रव्यज्ञानक्रियात्मकः ॥२३॥

महतः तु विकुर्वाणात् रजः सत्त्व उपबृंहितात् तमः प्रधानः तु अभवत् द्रव्य ज्ञान क्रियात्मकः ॥२३॥

रजः	रजोगुण (और)	द्रव्य	द्रव्य,
सत्त्व	सत्त्वगुणसे	ज्ञान	ज्ञान (और)
उपबृंहितात्	युक्त	क्रियात्मकः	क्रियावाला
महतः	महत्तत्त्व	तमः प्रधानः	तमः प्रधान
तु	के	तु	विकार
विकुर्वाणात्	विकारी होनेपर	अभूत्	हुआ ॥२३॥

सोऽहङ्कार इति प्रोक्तो विकुर्वन् समभूत्त्रिधा ।
वैकारिकस्तैजसश्च तामसश्चेति यद्भिदा ।
द्रव्यशक्तिः क्रियाशक्तिर्ज्ञानशक्ति रिति प्रभो ॥२४॥

सः अहङ्कार इति प्रोक्तः विकुर्वन् समभूत् त्रिधा वैकारिकः तैजसः च तामसः च इति यत् भिदा द्रव्यशक्तिः क्रियाशक्तिः ज्ञानशक्तिः इति प्रभो ॥ २४ ॥

सः	वह	इति प्रोक्तः	इस नामसे कहा गया ।
अहङ्कार	अहंकार		

विकुर्वन्	(वह) विकारी होनेपर	समभूत	हो गया।
		प्रभो	नारदजी !
वैकारिकः	वैकारिक	द्रव्यशक्ति	(तामस) द्रव्यशक्ति,
च	एवं	क्रियाशक्तिः	(राजस) क्रियाशक्ति (और)
तैजसः	तैजस		
च	तथा	ज्ञानशक्तिः	(वैकारिक) ज्ञानशक्ति
तामसः	तामस	यत्	इसके
इति	इस प्रकार	भिदा	भेद
त्रिधा	तीन प्रकार	इति	हैं ॥२४॥

तामसादपि भूतादेर्विकुर्वाणादभून्नभः ।
तस्या मात्रा गुणः शब्दो लिङ्गं यद् द्रष्टृदृश्ययोः ॥२५॥

तामसात् अपि भूतादेः विकुर्वाणात् अभूत् नभः तस्य मात्रा गुणः शब्दः लिङ्गं यत् द्रष्ट दृश्ययोः ॥ २५ ॥

भूतादेः	पंचमहाभूतोंके मूल कारण	मात्रा	तन्मात्रा (और)
		गुणः	गुण
तामसात्	तामस अहंकारके	शब्दः	शब्द है,
अपि	भी	यत्	जिससे
विकुर्वाणात्	विकृत होनेपर	द्रष्टृ	द्रष्टा एवं
नभः	आकाश	दृश्ययोः	दृश्यकी
अभूत्	उत्पन्न हुआ।	लिङ्गं	पहचान होती है ॥२५॥
तस्य	उस (आकाश) की		

नभसोऽथ विकुर्वाणादभूत् स्पर्शगुणोऽनिलः ।
परान्वयाच्छब्दवांश्च प्राण ओजः सहो बलम् ॥२६॥

नभसः अथ विकुर्वाणात् अभूत् स्पर्शगुणः अनिलः पर अन्वयात् शब्दवान् च प्राणः ओजः सहः बलम् ॥ २६ ॥

अथ	तदनन्तर	स्पर्श गुणः	स्पर्श गुणवाला
नभसः	आकाशके	अनिलः	वायु
विकुर्वाणात्	विकारी होनेपर	अभूत्	उत्पन्न हुआ।

पर	पहिलेवाले (अपने कारण आकाशके)	**च**	तथा
अन्वयात्	गुण व्याप्त रहनेके कारण	**प्राणः**	(इन्द्रियोंमें) स्फूर्ति
शब्दवान्	(वह वायु) शब्द (गुण) वाला है	**ओजः**	तेज
		सहः	जीवनी शक्ति और
		बलं	बल देनेवाला है ॥२६॥

वायोरपि विकुर्वाणात् कालकर्मस्वभावतः ।
उदपद्यत तेजो वै रूपवत् स्पर्शशब्दवत् ॥२७॥

वायोः अपि विकुर्वाणात् काल कर्म स्वभावतः उदपद्यत तेजः वै रूपवत् स्पर्श शब्दवत् ॥ २७ ॥

काल	काल	**स्पर्श**	(वायुके गुण) स्पर्श (तथा)
कर्म	कर्म (और)	**शब्दवत्**	(आकाशके गुण) शब्द सहित
स्वभावतः	स्वभावसे	**रूपवत्**	रूप गुणवाला
वायोः	वायुके	**तेजः वै**	तेज (अग्नि)
अपि	भी	**उपपद्यत**	उत्पन्न हुआ ॥२७॥
विकुर्वाणात्	विकारवान् होनेसे		

तेजसस्तु विकुर्वाणादासीदम्भो रसात्मकम् ।
रूपवत् स्पर्शवच्चाम्भो घोषवच्च परान्वयात् ॥२८॥

तेजसः तु विकुर्वाणात् अम्भः रसात्मकं रूपवत् स्पर्शवत् च अम्भः घोषवत् च परान्वयात् ॥ २८ ॥

तेजसः	अग्नि तत्त्वके	**परान्वयात्**	पहिलेके (तेज, वायु और आकाशके) व्याप्त होनेके कारण
विकुर्वाणात्	विकृत होनेपर	**रूपवत्**	रूपवाला,
रसात्मकं	रस गुणवाला	**स्पर्शवत्**	स्पर्शवाला
अम्भः	जल	**च घोषवत्**	तथा शब्दवाला (भी) है ॥२८॥
तु आसीत	हुआ ।		
अम्भः	जल		

विशेषस्तु विकुर्वाणादम्भसो गन्धवानभूत् ।
परान्वयाद् रसस्पर्शशब्दरूपगुणान्वितः ॥२९॥

विशेषः तु विकुर्वाणात् अम्भसः गन्धवान् अभूत् परान्वयात् रस स्पर्श शब्द रूप गुण अन्वितः ॥ २९ ॥

अम्भसः	जलके	रस	रस
विकुर्वाणात् तु	विकृत होनेसे	रूप	रूप
गन्धवान्	गन्ध गुणवाली	स्पर्श	स्पर्श
विशेषः	पृथ्वी	शब्द	शब्द
परान्वयात्	पहिले (जल, तेज, वायु और आकाश) कारणोंके व्याप्त होनेसे	गुण	गुणोंसे
		अन्वितः	युक्त
		अभूत्	उत्पन्न हुई ॥२९॥

वैकारिकान्मनो जज्ञे देवा वैकारिका दश ।
दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रकाः ॥३०॥

वैकारिकात् मनः जज्ञे देवा वैकारिका दश दिक् वात अर्क प्रचेतः अश्वि वह्नि इन्द्र उपेन्द्र मित्रकाः ॥ ३० ॥

वैकारिकात्	वैकारिक (अहंकार) से	अश्वि	अश्विनीकुमार
मनः	मन (और)	वह्नि	अग्नि,
वैकारिकाः	इन्द्रियोंके अधिष्ठाता	इन्द्र	इन्द्र
दिक्	दिक् (दिशा)	उपेन्द्र	उपेन्द्र (विष्णु)
वात्	वायु,	मित्रकाः	मित्र (और प्रजापति)
अर्क	सूर्य,	दश देवा	दश देवता
प्रचेतः	वरुण,	जज्ञे	उत्पन्न हुए ॥३०॥

तैजसात् तु विकुर्वाणादिन्द्रियाणि दशाभवन् ।
ज्ञानशक्तिः क्रियाशक्तिर्बुद्धिः प्राणश्च तैजसौ ।
श्रोत्रं त्वग्घ्राणदृग्जिह्वा वाग्दोर्मेढ्राङ्घ्रिपायवः ॥३१॥

तैजसात् तु विकुर्वाणात् इन्द्रियाणि दश अभवन् ज्ञानशक्तिः क्रियाशक्तिः बुद्धिः प्राणः च तैजसः श्रोत्रं त्वक् घ्राण दृक् जिह्वा वाक् दोः मेढ्रः अंघ्रि पायवः ॥ ३१ ॥

तैजसात् तु	तैजस (अहंकार) के	अंघ्रि	पैर
विकुर्वाणात्	विकारी होनेपर	पायवः	गुदा
इन्द्रियाणि	इन्द्रियाँ	दश	ये दस
श्रोत्रं	कान	अभवन्	उत्पन्न हुईं
त्वक्	त्वचा	ज्ञानशक्तिः	ज्ञानशक्ति
दृक्	नेत्र	क्रियाशक्तिः	क्रियाशक्ति
जिह्वा	रसना	बुद्धिः	बुद्धि
घ्राण	नासिका	च	और
वाक्	वाणी	प्राणः	प्राण
दोः	भुजाएँ	तैजसः	तेजस अहंकारसे ही
मेढ्रः	उपस्थ		उत्पन्न हैं ॥३१॥

यदैतेऽसङ्गता भावा भूतेन्द्रियमनोगुणाः ।
यदायतननिर्माणे न शेकुर्ब्रह्मवित्तम ॥३२॥

यदा ऐते असङ्गता भावा भूत इन्द्रिय मनः गुणाः यदा आयतन निमाणे न शेकुः ब्रह्मवित्तम ॥ ३२ ॥

ब्रह्मवित्तम	ब्रह्मज्ञानियोंमें श्रेष्ठ नारद !	असङ्गता	परस्पर पृथक
		भावाः	तत्त्व
यदा	जिस समय	यदा	जब
एते	ये	आयतन	शरीर
भूत	पञ्च महाभूत,	निर्माणे	निर्माणमें
इन्द्रिय	इन्द्रियाँ,	शेकुः	समर्थ
मनः	मन (और)	न	नहीं हुए ॥३२॥
गुणाः	तीनों गुण,		

तदा संहत्य चान्योन्यं भगवच्छक्तिचोदिताः ।
सदसत्त्वमुपादाय चोभयं ससृजुर्ह्यदः ॥३३॥

तदा संहृत्य च अन्योन्यं भगवत् शक्ति चोदितः सत् असत्त्वं उपादाय च उभयं असृजुः ह्यदः ॥ ३३ ॥

तदा	उस समय	**असत्वं**	कार्य भाव
भगवत् शक्ति	भगवान्‌की शक्तिसे	**उपादाय**	स्वीकार करके
चोदितः	प्रेरित होकर	**उभयं**	दोनों (पिण्ड-ब्रह्माण्ड)
च	और	**च**	ही रूपमें
अन्योन्यं	एक दूसरेसे	**ह्यदः**	इस विश्वकी
संहृत्य	मिलकर,	**ससृजुः**	सृष्टिकी ॥३३॥
सत्	कारण-		

वर्षपूगसहस्रान्ते तदण्डमुदकेशयम् ।
कालकर्मस्वभावस्थो जीवोऽजीवमजीवयत् ॥३४॥

वर्ष पूग सहस्र अन्ते तत् अण्डं उदके शयं काल कर्म स्वभावस्थः अजीवः जीवं अजीवयत् ॥ ३४ ॥

पूग	पूर्ण	**कर्म**	कर्म (अपने कर्मसे)
सहस्र	सहस	**स्वभास्थः**	प्रकृतिमें स्थित
वर्ष	वर्ष	**अजीवं**	जीव रहित
अन्ते	बीतनेपर	**अण्डं**	ब्रह्माण्डको
तत्	उस	**जीवः**	(परमात्मा) समष्टि
उदके	जलमें (कारण		चेतनने
	वारिमें)	**अजीवयत्**	जीवित कर
शयं	सोये		दिया ॥३४॥
काल	काल (के अनुसार)		

स एव पुरुषस्तस्मादण्डं निर्भिद्य निर्गतः ।
सहस्रोर्वङ्घ्रिबाह्वक्षः सहस्राननशीर्षवान् ॥३५॥

स एव पुरुषः तस्मात् अण्डं निर्भिद्य निर्गतः सहस्र उरु अंघ्रि बाहु अक्षः सहस्र आनन शीर्षवान ॥ ३५ ॥

स	वह	**सहस्र**	हजारों
एव	ही	**उरु**	जंघा,
पुरुषः	पुरुष	**अंघ्रि**	पैर,

बाहु	भुजा (और)	तस्मात्	उस
अक्षः	नेत्रोंवाला,	अण्डं	ब्रह्माण्ड रूप अंडेको
सहस्र	हजारों	निर्भिद्य	फोड़कर
आनन	मुखों (और)	निर्गतः	निकला ॥३५॥
शीर्षवान्	मस्तकोंवाला		

यस्येहावयवैर्लोकान् कल्पयन्ति मनीषिणः ।
कट्यादिभिरधः सप्त सप्तोर्ध्वं जघनादिभिः ॥३६॥

यस्य इह अवयवैः लोकान् कल्पयन्ति मनीषिणाः कट्यादिभिः अधः सप्त सप्त उर्ध्वं जघनादिभिः ॥ ३६ ॥

इह	यहाँ संसारमें	सप्त	सात (और)
मनीषिणः	बुद्धिमान लोग	जघनादिभिः	जाँघ आदि (कटि)से
यस्य	जिसके	ऊर्ध्वं	ऊपर
कट्यादिभिः	कटि आदि (नाभि) से	सप्त	सात
		लोकान्	लोकोंकी
अधः	नीचे	कल्पयन्ति	कल्पना करते हैं ॥३६॥
अवयवैः	अंगोंमें		

पुरुषस्य मुखं ब्रह्म क्षत्रमेतस्य बाहवः ।
ऊर्वोर्वैश्यो भगवतः पद्भ्यां शूद्रोऽभ्यजायत ॥३७॥

पुरुषस्य मुखं ब्रह्म क्षत्रं एतस्य बाहवः उर्वः वैश्यः भगवतः पद्भ्यां शूद्रः अभ्यजायत ॥ ३७ ॥

भगवतः	विराट्	क्षत्रं	क्षत्रिय हैं,
पुरुषस्य	पुरुषका	उर्वोः	जांघोंसे
मुखं	मुख	वैश्यः	वैश्य और
ब्रह्म	ब्राह्मण हैं,	पद्भ्यां	पैरोंसे
एतस्य	इनकी	शूद्रः	शूद्र
बाहवः	भुजाएँ	अभ्यजायत	उत्पन्न हुए हैं ॥३७॥

भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः ।
हृदा स्वर्लोक उरसा महर्लोको महात्मनः ॥३८॥

भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकः अस्य नाभितः हृदा स्वर्लोक उरसा महर्लोकः महात्मनः ।। ३८ ।।

महात्मनः	इन महाविराट्के	हृदा	हृदयमें
पद्भ्यां	चरणोंमें	स्वर्लोकः	स्वर्गलोककी
भूर्लोकः	पृथ्वीलोककी	उरसा	वक्षस्थलमें
अस्य	इनकी	महर्लोकः	महर्लोककी
नभितः	नाभिमें	कल्पितः	कल्पनाकी गयी
भुवर्लोकः	अन्तरिक्षलोककी		है ।।३८।।

ग्रीवायां जनलोकश्च तपोलोकः स्तनद्वयात् ।
मूर्धभिः सत्यलोकस्तु ब्रह्मलोकः सनातनः ।।३९।।

ग्रीवायां जनलोकः च तपोलोकः स्तनद्वयात् मूर्धभिः सत्यलोकः तु ब्रह्मलोकः सनातनः ।। ३९ ।।

ग्रीवायां	गर्दनमें	मूर्धभिः तु	मूर्धामस्तकमें
जनलोकः	जनलोक,	सत्यलोकः	सत्यलोक है (जो)
स्तनद्वयात्	दोनों स्तनोंमें	सनातनः	सनातन
तपोलोकः च	तपोलोक, और	ब्रह्मलोकः	ब्रह्मलोक है ।।३९।।

तत्कट्यां चातलं क्लृप्तमूरुभ्यां वितलं विभोः ।
जानुभ्यां सुतलं शुद्धं जङ्घाभ्यां तु तलातलम् ।।४०।।

तत् कट्यां च अतलं क्लृप्तं ऊरुभ्यां वितलं विभोः जानुभ्यां सुतलं शुद्धं जंघाभ्यां तु तलातलम् ।। ४० ।।

तत्	उन	वितलं	वितल है
विभोः	सर्वव्यापककी	जानुभ्यां	घुटनोंमें
कट्यां	कमरमें	शुद्धं	पवित्र
अतलं	अतल	सुतलं	सुतल है
क्लृप्तं	व्याप्त है	जंघाभ्यां तु	पिंडलियोंमें
च	और	तलातलं	तलातल है ।।४०।।
ऊरुभ्यां	जाँघोंमें		

महासलं तु गुल्फाभ्यां प्रपदाभ्यां रसातलम् ।
पातालं पादतलत इति लोकमयः पुमान् ॥४१॥

महातलं तु गुल्फाभ्यां प्रपदाभ्यां रसातलं पातालं पादतलत इति लोकमयः पुमान् ॥ ४१ ॥

गुल्फाभ्यां तु	पैरकी गाँठोंमें	**पातालं**	पाताल है;
महातलं	महातल है,	**इति**	इस प्रकार
प्रपदाभ्यां	पैरके ऊपरी भागमें	**पुमान्**	विराट् पुरुष
रसातलं	रसातल है,	**लोकमयः**	सर्वलोकमय हैं ॥४१॥
पादतलत	तलुओंमें		

भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः ।
स्वर्लोकः कल्पितो मूर्ध्ना इति वा लोककल्पना ॥४२॥

भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकः अस्य नाभितः स्वर्लोकः कल्पितः मूर्ध्ना इति वा लोक कल्पनाः ॥ ४२ ॥

अस्य	इस विराट् पुरुषके	**मूर्ध्ना**	मस्तकमें
पद्भ्यां	पैरोंमें	**स्वर्लोकः**	स्वर्ग
भूर्लोकः	भूलोक	**कल्पितः**	कल्पित है,
कल्पितः	कल्पित है;	**इति वा**	ऐसा भी
नाभितः	नाभिमें	**लोक**	लोकोंकी
भुवर्लोकः	अन्तरिक्ष (और)	**कल्पनाः**	कल्पना है ॥४२॥

इति श्रीमद्भागवते महापुराणे वैयासिक्यां पारमहंस्यां
संहितायां द्वितीयस्कन्धे पञ्चमोऽध्यायः

अथ षष्ठोऽध्यायः

ब्रह्मोवाच–

वाचां वह्नेर्मुखं क्षेत्रं छन्दसां सप्त धातवः ।
हव्यकव्यामृतान्नानां जिह्वा सर्वरसस्य च ॥१॥

वाचां वह्नेः मुखं क्षेत्रं छन्दसां सप्तधातवः हव्य कव्य अमृत अन्नानां जिह्वाः सर्व रसस्य च ॥१॥

मुखं	(उन विराट् पुरुषका) मुख–	**हव्य**	(देवताओंके लिए दिये जानेवाला) हविष्य,
वाचां	वाणी (और)	**कव्य**	(पितरोंके लिए दिये जानेवाला) कव्य (रूप)
वह्नेः	(उसके अधिदेवता) अग्निका,	**अमृत**	अमृतमय
[1] **सप्तधातवः**	(उनकी) सातों धातुएँ—	**अन्नानां**	अन्नोंका (और)
[2] **छन्दसां च**	(वेदके सातों) छन्दोंका, एवं	**सर्वरसस्य**	सब रसोंका
जिह्वाः	(उनकी) जीभ—	**क्षेत्रं**	उत्पत्ति स्थान है ॥१॥

सर्वासूनां च वायोश्च तन्नासे परमायने ।
अश्विनोरोषधीनां च घ्राणो मोदप्रमोदयोः ॥२॥

सर्व असूनां च वायोः च तत् नासे परम अयने अश्विनोः ओषधिनां च घ्राणः मोदप्रमदयोः ॥ २ ॥

---

[1] सप्तधातु—रस, रक्त, मांस, मेद, अस्थि, मज्जा और शुक्र ।

[2] गायत्री, त्रिष्टुप, अनुष्टुप उष्णिक, वृहती, पङ्क्ति और जगती— ये सात छन्द हैं ।

तत्	उनके
नासे	नासारन्ध्रसे
सर्व	सब
असूनां	प्राणियोंके (प्राण, अपान, व्यान, उदान और समान) पाँचों प्राण
च वायोः	और (उन पंच प्राणोंके अधिदेव) वायु (उत्पन्न हुए)
च	और
घ्राणः	(उनकी) घ्राण इन्द्रिय
अश्विनोः	अश्विनीकुमारोंका,
ओषधीनां	ओषधियोंका
च मोद-प्रमोदयोः	तथा साधारण (एवं) विशेष गन्धका
परम	परम
अयने	निवास है ॥२॥

रूपाणां तेजसां चक्षुर्दिवः सूर्यस्य चाक्षिणी ।
कर्णौ दिशां च तीर्थानां श्रोत्रमाकाशशब्दयोः ।
तद्गात्रं वस्तुसाराणां सौभगस्य च भाजनम् ॥३॥

रूपाणां तेजसां चक्षुः दिवः सूर्यस्य च अक्षिणी कर्णौ दिशां च तीर्थानां श्रोत्रं आकाशः शब्दयोः तत् गात्रं वस्तुसाराणां सौभगस्य च भाजनम् ॥ ३ ॥

चक्षुः	(उनके) नेत्र
रूपाणां	रूपोंके, (एवं)
तेजसां	तेजके,
अक्षिणी	नेत्र गोलोक
दिवः	स्वर्गके
च	और
सूर्यस्य	सूर्यके (उत्पत्ति स्थान हैं) ।
कर्णौ:	(उनके) कान
दिशां	दिशाओंके
च	तथा
तीर्थानां	तीर्थोंके (उद्गम हैं)।
श्रोत्रं	(उनकी) श्रवणेन्द्रिय
आकाशः	आकाश (एवं)
शब्दयोः	शब्दका (मूल है) ।
तत्	उनका
गात्रं	शरीर
वस्तुसाराणां	सब पदार्थोंके सार भागका
सौभगस्य	सौन्दर्यका
भाजनम्	निवास है ॥३॥

त्वगस्य स्पर्शवायोश्च सर्वमेधस्य चैव हि ।
रोमाण्युद्भिज्जजातीनां यैर्वा यज्ञस्तु सम्भृतः ॥४॥

त्वक् अस्य स्पर्श वायोः च सर्वमेधस्य च एव हि रोमाणि उद्भिज जातीनां यैः वा यज्ञस्तु सम्भृतः ॥ ४ ॥

अस्य त्वक्	इन (विराट् पुरुष) की त्वचा	रोमाणि	(उनके) रोम
स्पर्श	स्पर्शेन्द्रिय	यैः वा	जिनसे
च	तथा	यज्ञस्तु	यज्ञ
वायोः	वायु	सम्भृतः	सम्पन्न होते हैं,
च	एवं	उद्भिजजातीनां	(उन) उद्भिज पदार्थोंके (उत्पत्ति स्थान हैं) ॥४॥
सर्वमेधस्य	सब यज्ञोंका		
एव हि	भी (मूल है) ।		

केशश्मश्रुनखान्यस्य शिलालोहाभ्रविद्युताम् ।
बाहवो लोकपालानां प्रायशः क्षेमकर्मणाम् ॥५॥

केश श्मश्रु नखानि अस्य शिला लोह अभ्र विद्युतां बाहवः लोकपालानां प्रायशः क्षेम कर्मणाम् ॥ ५ ॥

अस्य	इन (विराट् पुरुष)के	बाहवः	(उनकी) भुजाएँ
केश	केश अभ्र (मेघ) का,	प्रायशः	प्रायः
श्मश्रु	श्मश्रु (दाढ़ी-मूँछ)	कर्मणां	कर्मलोककी
नखानि	विद्युत (बिजली) का,	क्षेम	रक्षा करनेवाले
शिला लोह	नख शिला-लोहादि	लोकपालानां	लोकपालोंका
अभ्रविद्युतां	धातुओंका (उद्गम स्थान है) ।		(उत्पत्ति स्थान है) ॥५॥

विक्रमो भूर्भुवः स्वश्च क्षेमस्य शरणस्य च ।
सर्वकामवरस्यापि हरेश्चरण आस्पदम् ॥६॥

विक्रमः भूः भुवः स्वः च क्षेमस्य शरणस्य च सर्वकाम वरस्य अपि हरेः चरण आस्यदम् ॥ ६ ॥

विक्रमः	(उनका) चलना-फिरना	भूः	भूलोक,
		भुवः	अन्तरिक्ष

च	तथा	**शरण्यस्य**	शरण देनेके
स्वः	स्वर्ग (तीनों लोकोंका आश्रय है),	**च**	तथा
		सर्वकाम	सब कामनाओंका
हरेः	श्रीहरिके	**वरस्य**	वरदान देनेके
चरण	चरण-कमल	**अपि**	भी
क्षेमस्य	कल्याणके,	**आस्पदं**	स्थान हैं ॥६॥

अपां वीर्यस्य सर्गस्य पर्जन्यस्य प्रजापतेः ।
पुंसः शिश्न उपस्थस्तु प्रजात्यानन्दनिर्वृतेः ॥७॥

अपां वीर्यस्य सर्गस्य पर्जन्यस्य प्रजापतेः पुंसः शिश्नः उपस्थः तु प्रजाति अत्यानन्द निर्वृतेः ॥ ७ ॥

पुंसः	विराट् पुरुषका	**उपस्थः तु**	(उनकी) जननेन्द्रिय
शिश्नः	लिङ्ग (गोलक)	**प्रजाति**	सन्तानोत्पादन क्रियाके
अपां	जलका,		
वीर्यस्य	वीर्यका,	**अत्यानन्द**	अत्यन्त आनन्दकी
सर्गस्य	सृष्टिका,	**निर्वृतेः**	सुख लीनताका (आश्रय है।) ॥७॥
पर्जन्यस्य	मेघोंका (और)		
प्रजापतेः	प्रजापतिका (आधार है);		

पायुर्यमस्य मित्रस्य परिमोक्षस्य नारद ।
हिंसाया निर्ऋतेर्मृत्योर्निरयस्य गुदः स्मृतः ॥८॥

पायुः यमस्य मित्रस्य परिमोक्षस्य नारद हिंसाया निर्ऋतेः मृत्योः निरयस्य गुदः स्मृतः ॥ ८ ॥

नारद	नारद !	**परिमोक्षस्य**	मल त्यागका (आश्रय है);
पायुः	(विराट् पुरुषकी) गुदा इन्द्रिय	**गुदः**	(उनकी) गुदा (गोलक)
यमस्य	यमराजका		
मित्रस्य	मित्र देवताका (एवं)	**हिंसायाः**	हिंसाका

निर्ऋतेः	निर्ऋति देवताका	स्मृतः	आश्रय कहा गया
मृत्योः	मृत्युका (और)		है ॥८॥
निरयस्य	नरकोंका		

पराभूतेरधर्मस्य तमसश्चापि पश्चिमः ।
नाड्यो नदनदीनां तु गोत्राणामस्थिसंहतिः ॥९॥

पराभूतेः अधर्मस्य तमसः च अपि पश्चिमः नाड्यः नद नदीनां तु गोत्राणां अस्थि संहतिः ॥ ९ ॥

पश्चिमः	(विराट् पुरुषकी) पीठ	नाड्यः	(उनकी) नाड़ियाँ
पराभूतेः	पराजयका,	नद	नदोंके
अधर्मस्य	अधर्मका,	नदीनां तु	नदियोंके (उद्गम है)
च	और	अस्थि	(उनकी) हड्डियोंका
तमसः	अज्ञानका	संहतिः	समुदाय
अपि	भी (उत्पत्ति स्थान है);	गोत्राणां	पर्वतोंका (मूल है) ॥९॥

अव्यक्तरससिन्धूनां भूतानां निधनस्य च ।
उदरं विदितं पुंसो हृदयं मनसः पदम् ॥१०॥

अव्यक्त रस सिन्धूनां भूतानां निधनस्य च उदरं विदित पुसः हृदयं मनसः पदम् ॥ १० ॥

पुंसः	विराट् पुरुषका	निधनस्य	प्रलयका
उदरं	पेट	विदितं	(आश्रय) जाना जाता है ।
अव्यक्त	प्रकृति		
रस	रसतत्त्व	हृदयं	(उनका) हृदय
सिन्धूनां	समुद्रोंका	मनसः	मनका
च	और	पदं	स्थान है ॥१०॥
भूतानां	प्राणि-पदार्थोंके		

धर्मस्य मम तुभ्यं च कुमाराणां भवस्य च ।
विज्ञानस्य सत्त्वस्य परस्यात्मा परायणम् ॥११॥

धर्मस्य मम तुभ्यं च कुमाराणां भवस्य च विज्ञानस्य च सत्त्वस्य परस्य आत्मा परायणम् ॥ ११ ॥

परस्य	(उन) परमपुरुषका	**च**	तथा
आत्मा	चित्त	**भवस्य**	रुद्रका,
धर्मस्य	धर्मका,	**विज्ञानस्य**	बुद्धिका
मम	मेरा (ब्रह्माका)	**च**	और
च	एवं	**सत्त्वस्य**	(समष्टि) अन्तः-करणका
तुभ्यं	तुम्हारा (नारदका)	**परायणं**	परमाश्रय है ॥११॥
कुमाराणां	सनक्, सनन्दन, सनातन, सनत्कुमारका		

अहं भवान् भवश्चैव त इमे मुनयोऽग्रजाः ।
सुरासुरनरा नागाः खगा मृगसरीसृपाः १२॥

अहं भवान् भवः च एव त इमे मुनयः अग्रजाः सुर असुर नरा नागा खगा मृग सरीसृपाः ॥ १२ ॥

अहं	मैं ब्रह्मा,	**सुर**	देवता,
भवान्	तुम नारद	**असुर**	दैत्य,
च	और	**नरा**	मनुष्य,
भवः	रुद्र	**नागा**	नाग (अनेक सिर वाले सर्प),
एव	भी,	**खगा**	पक्षी,
त	तुम्हारे	**मृग**	पशु,
इमे	ये	**सरीसृपाः**	सरकनेवाले (रेंगनेवाले) प्राणी ॥१२॥
अग्रजाः	बड़े भाई		
मुनयः	(सनकादि) मुनिगण,		

गन्धर्वाप्सरसो यक्षा रक्षोभूतगणोरगाः ।
पशवः पितरः सिद्धा विद्याध्राश्चारणा द्रुमाः ॥१३॥

गन्धर्वा अप्सरसः यक्षा रक्षः भूतगणः उरगाः पशवः पितरः सिद्धाः विद्याध्राः चारणा द्रुमाः ॥ १३ ॥

गन्धर्वा	गन्धर्वगण,	पशवः	पशु,
अप्सरसः	अप्सराएँ,	पितरः	पितृगण,
यक्षा	यक्ष,	सिद्धाः	सिद्धगण,
रक्षः	राक्षस,	विद्याध्राः	विद्याधर,
भूतगणः	भूत (प्रेतादि) गण,	चारणा	चारण,
उरगाः	सर्प,	द्रुमाः	वृक्ष ॥१३॥

अन्ये च विविधा जीवा जलस्थलनभौकसः ।
ग्रहर्क्षकेतवस्तारास्तडितः स्तनयित्नवः ॥१४॥

अन्ये च विविधाः जीवा जल स्थल नभ ओकसः ग्रह ऋक्ष केतवः तारा: तडितः स्तनयित्नवः ॥ १४ ॥

अन्ये	दूसरे	जीवा	प्राणी,
जल	पानी,	ग्रह	ग्रह,
स्थल	पृथ्वी,	ऋक्ष	नक्षत्र,
च	और	केतवः	केतु,
नभः	आकाशमें	तारा:	तारे,
ओकसः	रहनेवाले	तडितः	बिजली,
विविधाः	अनेक प्रकारके	स्तनयित्नवः	मेघ ॥१४॥

सर्वं पुरुष एवेदं भूतं भव्यं भवच्च यत् ।
तेनेदमावृतं विश्वं वितस्तिमधितिष्ठति ॥१५॥

सर्वं पुरुष एव इदं भूतं भव्यं भवत् च यत् तेन इदं आवृतं विश्वं वितस्ति अधितिष्ठति ॥ १५ ॥

इदं	यह	विश्वं	संसार है (वह)
सर्वं	सब	पुरुष	विराट् पुरुष
भूतं	बीता हुआ,	एव	ही है;
भव्यं	वर्तमान,	तेन	उसने
च	तथा	इदं	इस संसारको
भवत्	होनेवाला	आवृतं	घेर रखा है;
यत्	जो		

वितस्ति	उसके एकबित्ते (दस अंगुलमें)	अधितिष्ठति	(यह विश्व) स्थित है ॥१५॥

स्वधिष्ण्यं प्रतपन् प्राणो बहिश्च प्रतपत्यसौ ।
एवं विराजं प्रतपंस्तपत्यन्तर्बहिः पुमान् ॥१६॥

स्वधिष्ण्यं प्रतपन् प्राणः बहिः च प्रतपति असौ एवं बिराजं प्रतपन् तपति अन्तः बहिः पुमान् ॥१६॥

असौ	यह	प्रतपन्	प्रकाशित करते हुए
प्राणः	सूर्य (जैसे)	पुमान्	विराट् पुरुष (ब्रह्माण्डको भी)
स्वधिष्ण्यं	अपने मण्डलमें		
प्रतपन्	प्रकाशित होता	अन्तः	भीतर (और)
बहिः च	बाहर भी	बहिः	बाहर
प्रतपति	प्रकाश फैलाता है	तपति	प्रकाशित करता है ॥१६॥
एवं	इसी प्रकार		
विराजं	विराट् देहको		

सोऽमृतस्याभयस्येशो मर्त्यमन्नं यदत्यगात् ।
महिमैष ततो ब्रह्मन् पुरुषस्य दुरत्ययः ॥१७॥

सः अमृतस्य अभयस्य ईशः मर्त्यं अन्नं यत् अत्यगात् महिमा एष ततः ब्रह्मन् पुरुषस्य दुरत्ययः ॥१७॥

ब्रह्मन्	नारदजी !	अत्यगात्	अतिक्रमण किये है (परे है)
सः	वह (विराट् पुरुष)	ततः	इसलिए
अमृतस्य	अमृतत्त्वका (एवं)	पुरुषस्य	उस पुरुषकी
अभयस्य	अभयका (मोक्षका)	एष	इस
ईशः	स्वामी है	महिमा	महिमाका
मर्त्यं	मनुष्यके	दुरत्ययः	पार नहीं मिलता ॥१७॥
अन्नं	(क्रिया एवं सङ्कल्पके) निर्माणसे		
यत्	क्योंकि		

पादेषु सर्वभूतानि पुंसः स्थितिपदो विदुः ।
अमृतं क्षेममभयं त्रिमूर्ध्नोऽधायि मूर्धसु ॥१८॥

पादेषु सर्वभूतानि पुंसः स्थिति पदः विदुः अमृतं क्षेमं अभयं त्रिमूर्ध्नः अधायि मूर्धसु ॥१८॥

पुंसः	(उस विराट्) पुरुषके	**विदुः**	जाना जाता है ।
पादेषु	एक पादमें	**मूर्धसु**	(महः लोकके) ऊपर
सर्वभूतानि	(भुः, भुवः आदि लोक और) सब प्राणी-पदार्थोंकी	**त्रिमूर्ध्नः**	जन, तप और सत्यलोकमें (क्रमशः)
स्थिति	स्थितिका	**अमृतं**	अमृत,
पदः	स्थान	**अभयं**	अभय (और)
		क्षेमं	मोक्ष (सुख)
		अधायि	निहित है ॥१८॥

पादास्त्रयो बहिश्चासन्नप्रजानां य आश्रमाः ।
अन्तस्त्रिलोक्यास्त्वपरो गृहमेधोऽबृहद्व्रतः ॥१९॥

पादाः त्रयः बहिः च आसन् अप्रजानां य आश्रमाः अन्तः त्रिलोक्याः तु अपरः गृहमेधः अबृहद्व्रतः ॥ १९ ॥

य अप्रजानां	जो सन्तान उत्पादन नहीं करते, ऐसे	**आसन्**	हैं
आश्रमाः	(ब्रह्मचारी, वानप्रस्थ और संन्यास) आश्रमके लिए	**च**	और
त्रिलोक्याः	(भुः भुवः और स्वः) तीनों लोकोंसे	**अबृहद्व्रताः**	ब्रह्मचर्य पालन न करनेवाले
बहिः	बाहर	**गृहमेधः तु**	गृहस्थके लिए
त्रय पादाः	(क्रमशः) जन, तप और सत्यलोक	**अन्तः**	(संसारके) भीतर
		अपरः	दूसरे (भुः, भुवः और स्वः लोक) हैं, (भूर्लोकमें तो वे रहते हैं हीं) ॥१९॥

सृती विचक्रमे विष्वङ् साशनानशने उभे ।
यदविद्या च विद्या च पुरुषस्तुभयाश्रयः ॥२०॥

सृती विचक्रमे विष्वङ् स अशनाः अनशने उभे यत् विद्या च अविद्या च पुरुषः तु उभय आश्रयः ॥२०॥

सृती	सृष्टिमें	अनशने	निष्कामों (भोग न चाहनेवालों) के लिए
विष्वङ्	सर्वत्र		
उभे	दो	विद्या च	परमार्थ विद्याका ।
विचक्रमे	मार्ग हैं,	यत्	जो
स अशनाः	सकामोंके (भोग चाहनेवालों) के लिए	पुरुषः	(परम) पुरुष हैं
		तु	(वे) तो
अविद्या च	अविद्याका है, और	उभय	दोनोंके (ही)
		आश्रयः	आश्रय हैं ॥२०॥

यस्मादण्डं विराड् जज्ञे भूतेन्द्रियगुणात्मकः ।
तद् द्रव्यमत्यगाद् विश्वं गोभिः सूर्य इवातपन् ॥२१॥

यस्मात् अण्डं विराट् जज्ञे भूत इन्द्रिय गुणात्मकः तद् द्रव्यं अत्यगात् विश्वं गोभिः सूर्य इव आतपन् ॥२१॥

यस्मात्	जिन (परमात्मा) से	अत्यगात्	अलग हैं
अण्डं	ब्रह्माण्ड,	इव	जैसे
भूतः	(पंच) भूत,	विश्वं	विश्वको
इन्द्रिय	(एकादश) इन्द्रियाँ,	गोभिः	(अपनी) किरणों द्वारा
गुणात्मकः	(एवं) गुणोंसे युक्त		
विराट्	विराट् पुरुष	आतपन्	प्रकाशित करते हुए (भी)
जज्ञे	उत्पन्न हुए		
तत् द्रव्यं	(वे परमात्मा भी) उन सबसे	सूर्य	सूर्य (अलग) है ॥२१॥

यदास्य नाभ्यान्नलिनादहमासं महात्मनः ।
नाविदं यज्ञसम्भारान् पुरुषावयवाद्ऋते ॥२२॥

यत् अस्य नाभ्यात् नलिनात् अहं आसं महात्मनः न अविदं यज्ञ सम्भारान् पुरुष अवयवात् ऋते ॥२२॥

यत्	जब	महात्मनः	विराट् पुरुषकी
अस्य	इस	नाभ्यात्	नाभिसे निकले

नलिनात्	कमलसे	ऋते	छोड़कर
अहं	मैं (ब्रह्मा)	यज्ञ	यज्ञकी (कोई भी)
आसं	उत्पन्न हुआ, (तब)	सम्भारान्	सामग्री
पुरुष	(इन) पुरुषके	न	नहीं
अवयवात्	अंगोंको	अविदं	जान सका ॥२२॥

तेषु यज्ञस्य पशवः सवनस्मतयः कुशाः ।
इदं च देवयजनं कालश्चोरुगुणान्वितः ॥२३॥

तेषु यज्ञस्य पशवः सवनस्पतयः कुशाः इदं च देवयजनं कालः च उरुगुणान्वितः ॥२३॥

तेषु	उन (विराट् पुरुषके अंगों) में ही	इदं	इस प्रकार
		च	से ही
यज्ञस्य	यज्ञीय	देवयजनं	परमात्माके लिए यज्ञकी
पशवः	पशु (दूध, घी आदि के गौ आदि)	उरुगुणान्वितः	बहुत गुणवाले
सवनस्पतयः	फलादि वनस्पतियोंके	कालः	कालकी (समयकी)
कुशाः	कुशोंकी (कल्पनाकी)	च	भी (कल्पनाकी)॥२३

वस्तून्योषधयः स्नेहा रसलोहमृदो जलम् ।
ऋचो यजूंषि सामानि चातुर्होत्रं च सत्तम ॥२४॥

वस्तूनि ओषधयः स्नेहाः रस लोह मृदः जलं ऋचः यजूंषि सामानि चातुर्होत्रं च सत्तम ॥२४॥

सत्तम	सत्पुरुष नारद !	ऋचः	ऋचाओंकी,
वस्तूनि	(यज्ञके लिए आवश्यक) वस्तुओंकी,	यजूंषि	यजुः (यजुर्वेदके गद्यकी),
ओषधयः	औषधियोंकी,	सामानि	साम (सामवेदकी स्तुतियोंकी),
स्नेहाः	स्नेहों (घी, तेल)की,	च	और
रस	(६) रसोंकी,	चातुर्होत्रं	चातुर्होत्रकी (कल्पना की) ॥२४॥
लोह	लोहेकी,		
मृदः	मिट्टीकी,		
जलं	जलकी,		

नामधेयानि मन्त्राश्च दक्षिणाश्च व्रतानि च ।
देवतानुक्रमः कल्पः सङ्कल्पस्तन्त्रमेव च ॥२५॥

नामधेयानि मन्त्राः च दक्षिणाः च व्रतानि च देवताः अनुक्रमः कल्पः सङ्कल्पः तन्त्रं एव च ॥२५॥

नामधेयानि	(यज्ञोंके) नाम,	**सङ्कल्पः**	संकल्प
मन्त्राः च	मन्त्र, एवं	**च**	तथा
दक्षिणाः च	दक्षिणा, भी	**तन्त्र**	अनुष्ठान रीति
व्रतानि च	तथा व्रत,	**एव**	की भी (कल्पना
देवताः	देवतागण,		की) ॥२५॥
अनुक्रमः कल्पः	विधि-क्रम,		

गतयो मतयः श्रद्धा प्रायश्चित्तं समर्पणम् ।
पुरुषावयवैरेते सम्भाराः सम्भृता मया ॥२६॥

गतयः मतयः श्रद्धा प्रायश्चित्तं समर्पणं पुरुष अवयवैः एते सम्भाराः सम्भृता मया ॥२६॥

गतयः	गतियाँ,	**सम्भाराः**	सामग्रियाँ
मतयः	बुद्धि,	**पुरुष**	(विराट्) पुरुषके
श्रद्धा	श्रद्धा,	**अवयवैः**	अंगोंसे
प्रायश्चित्तं	प्रायश्चित,	**मया**	मेरे द्वारा
समर्पणं	समर्पण—	**सम्भृताः**	एकत्रकी गयीं ॥२६॥
एते	इतनी		

इति सम्भृतसम्भारः पुरुषावयवैरहम् ।
तमेव पुरुषं यज्ञं तेनैवायजमीश्वरम् ॥२७॥

इति सम्भृतः सम्भारः पुरुष अवयवैः अहं तं एव पुरुषं यज्ञं तेन एव अयजं ईश्वरम् ॥२७॥

इति	इस प्रकार	**सम्भारः**	सामग्रीको
पुरुष	(विराट्) पुरुषके	**सम्भृतः**	एकत्र करके
अवयवैः	अंगोंसे	**अहं**	मैंने

तं एव	उस ही	पुरुषं	पुरुषका
ईश्वरं	सर्वनियन्ता	तेन एव	उसीसे ही
यज्ञं	यज्ञरूप	अयजं	पूजन किया ॥२७॥

ततस्ते भ्रातर इमे प्रजानां पतयो नव ।
अयजन् व्यक्तमव्यक्त पुरुषं सुसमाहिताः ॥२८॥

ततः ते भ्रातरः इमे प्रजानां पतयः नव अयजन् व्यक्तं अव्यक्तं पुरुषं सुसमाहिताः ॥२८॥

ततः	तदनन्तर	पतयः	पतियोंने
ते	तुम्हारे	सुसमाहिताः	अत्यन्त एकाग्रता पूर्वक
इमे	ये (अत्रि, वशिष्ठ, अंगिरा, पुलस्त्य,पुलह क्रतु, भृगु, दक्ष मरीचि)	व्यक्तं	प्रकट विराट् रूप
		अव्यक्तं	(और) अप्रकट अन्तर्यामी रूप
नव भ्रातरः	नौ भाई	पुरुषं	पुरुषकी
प्रजानां	प्रजाके	अयजन्	पूजा की ॥२८॥

ततश्च मनवः काले ईजिरे ऋषयोऽपरे ।
पितरो विबुधा दैत्याः मनुष्याः क्रतुभिर्विभुम् ॥२९॥

ततः च मनवः काले ईजिरे ऋषयः अपरे पितरः बिबुधाः दैत्याः मनुष्याः क्रतुभिः विभुम् ॥२९॥

ततः	उसके पश्चात्	विबुधाः	देवताओंने,
काले च	समय समयपर	दैत्याः	दैत्योंने,
अपरे	दूसरे	मनुष्याः	मनुष्योंने,
मनवः	मनुओंने,	क्रतुभिः	यज्ञोंसे
ऋषयः	ऋषियोंने,	विभुं	उन सर्वव्यापककी
पितरः	पितरोंने,	ईजिरे	आराधनाकी ॥२९॥

नारायणे भगवति तदिदं विश्वमाहितम् ।
गृहीतमायोरुगुणः सर्गादावगुणः स्वतः ॥३०॥

नारायणे भगवति तत् इदं विश्वं आहितं गृहीतः माया उरुगुणः सर्गादाः अगुणः स्वतः ॥३०॥

तत् इदं	वह यह	**माया**	मायासे
विश्वं	विश्व	**उरुगुणः**	अनन्त गुण
भगवति	भगवान्	**गृहीतः**	ग्रहण किये हैं (लेकिन)
नारायणे	नारायणमें		
आहितं	स्थित है (जिनने)	**स्वतः**	स्वरूपसे
सर्गादाः	सृष्टिके आदिमें	**अगुणः**	निर्गुण हैं ॥३०॥

सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः ।
विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक् ॥३१॥

सृजामि तत् नियुक्तः अहं हरः हरति तत् वशः विश्वं पुरुष रूपेण परिपाति त्रिशक्ति धृक् ॥३१॥

तत्	उनके द्वारा	**पुरुष रूपेण**	पुरुष (विष्णु) के रूपसे
नियुक्तः	नियुक्त		
अहं	मैं	**त्रिशक्ति**	(सृष्टि, स्थिति, प्रलयकी) तीनों शक्तियोंको
विश्वं	विश्वकी		
सृजामि	सृष्टि करता हूँ,		
तत्	उनके	**धृक्**	धारण करनेवाले (वे ही)
वशः	वशमें रहकर		
हरः	शिव	**परिपाति**	(इसका) पालन
हरति	प्रलय करते हैं,		करते हैं ॥३१॥

इति तेऽभिहितं तात यथेदमनुपृच्छसि ।
नान्यद्भगवतः किंचिद्भाव्यं सदसदात्मकम् ॥३२॥

इति ते अभिहितं तात यथा इदं अनुपृच्छसि न अन्यत् भगवतः किञ्चित् भाव्यं सत् असत् आत्मकम् ॥३२॥

तात	वत्स नारद !	**ते इति**	वह सब (तुमको)
यथा इदं	जो कुछ	**अभिहितं**	बतला दिया ।
अनुपृच्छसि	तुमने पूछा है	**सत् असत्**	कारण कार्य

आत्मकं	स्वरूप	किंचित्	कुछ भी
भाव्यं	मनमें आनेवाला तत्त्व	भगवतः	भगवान्‌से
		अन्यत् न	पृथक नहीं है ॥३२॥

न भारती मेऽङ्ग मृषोपलक्ष्यते
न वै क्वचिन्मे मनसो मृषा गतिः ।
न मे हृषीकाणि पतन्त्यसत्पथे
यन्मे हृदौत्कण्ठ्यवता धृतो हरिः ॥३३॥

न भारती मे अङ्ग मृषा उपलक्ष्यते न वै क्वचित् मे मनसः मृषा गतिः न मे हृषीकाणि पतन्ति असत्पथे यत् मे हृदा उत्कण्ठ्यवता धृतः हरिः ॥ ३३ ॥

अङ्ग	प्रिय नारद !	मे	मेरी
मे	मेरी	हृषीकाणि	इन्द्रियाँ
भारती	वाणी	असत्पथे	कुमार्गमें
मृषा	झूठी	न	नहीं
न	नहीं	पतन्ति	गिरतीं
उपलक्ष्यते	लक्षित होती;	यत्	क्योंकि
मे	मेरे	मे	मैंने
मनसः	मनका	उत्कण्ठ्यवता	उत्कण्ठापूर्वक
गतिः	सङ्कल्प	हृदि	हृदयमें
क्वचित्	कभी भी	हरिः	श्रीहरिको
मृषा	झूठा	धृतः	धारण किया
न वै	नहीं ही होता;		है ॥३३॥

सोऽहं समाम्नायमयस्तपोमयः
प्रजापतीनामभिवन्दितः पतिः ।
आस्थाय योगं निपुणं समाहित-
स्तं नाध्यगच्छं यत आत्मसम्भवः ॥३४॥

स अहं समाम्नायमयः तपोमयः प्रजापतीनां अभिवन्दितः पतिः आस्थाय योगं निपुणं समाहितः तं न अध्यगच्छं यत आत्म सम्भवः ॥३४॥

स	वह
अहं	मैं
समाम्नायमयः	वेदमूर्ति,
तपोमयः	तपोमूर्ति,
प्रजापतीनां	प्रजापतियों द्वारा
अभिवन्दितः	नमस्कृत
पतिः	उनका स्वामी
योगं	योगमें
आस्थाय	स्थित होकर
निपुणं	भली प्रकार
समाहितः	एकाग्र होकर (भी)
यत	जिससे
आत्म	मेरी
सम्भवः	उत्पत्ति हुई
तं	उसे
न	नहीं
अध्यगच्छं	जान सका ॥३४॥

नतोऽस्म्यहं तच्चरणं समीयुषां
भवच्छिदं स्वस्त्ययनं सुमङ्गलम् ।
यो ह्यात्ममायाविभवं स्म पर्यगाद्
यथा नभः स्वान्तमथापरे कुतः ॥३५॥

नतः अस्मि अहं तत् चरणं समीयुषां भवच्छिदं स्वस्त्ययनं सुमङ्गलं यः हि आत्ममाया विभवं स्म परि अगात् यथा नभः स्वान्तं अथ अपरे कुतः ॥ ३५ ॥

समीयुषां	शरणागतोंके
भवच्छिदं	संसार (जन्म-मृत्यु) को काटनेवाले
स्वत्ययनं	कल्याणधाम
सुमङ्गलं	अत्यन्त मंगलमय
तत्	उनके
चरणं	चरणोंमें
अहं	मैं
नतः	प्रणत
अस्मि	हूँ ।
हि	क्योंकि
यथा	जैसे
नभः	आकाश
स्वान्तं	अपने अन्तको (नहीं जानता)
यः	(वैसे ही) वे (भी)
आत्ममाया	अपनी मायाके
विभवं	वैभवका
परि	पार
अगात्	नहीं पाते
स्मः	हैं
अथ	तब
अपरे	दूसरे
कुतः	कैसे पा सकते हैं ॥३५॥

नाहं न यूयं यदृतां गतिं विदु-
र्न वामदेवः किमुतापरे सुराः ।
तन्मायया मोहितबुद्धयस्त्विदं
विनिर्मितं चात्मसमं विचक्ष्महे ॥३६॥

न अहं न यूयं यद् ऋतां गतिं विदुः न वामदेवः किमुत अपरे सुराः तत् मायया मोहित बुद्धयः तु इदं विनिर्मितं च आत्मसमं विचक्ष्महे ॥३६॥

यद्	जिनके	**मायया**	मायाके द्वारा
ऋतां	वास्तविक	**विनिर्मितं च**	निर्मित
गतिं	स्वरूपको	**इदं**	इस विश्वको
न अहं	न मैं,	**मोहित**	मोहित
न यूयं	न तुम लोग,	**बुद्धयः तु**	बुद्धिवाले तो
न वामदेवः	न शङ्करजी	**आत्मसमं**	(ठीक ठीक न समझकर) अपनी बुद्धिके अनुसार
विदुः	जानते हैं		
अपरे	(तब) दूसरे		
सुराः	देवता	**विचक्ष्महे**	विवेचन करते हैं ॥३६॥
किमुत	कैसे जान सकते हैं ?		
तत्	उनकी		

यस्यावतारकर्माणि गायन्ति ह्यस्मदादयः ।
न यं विदन्ति तत्त्वेन तस्मै भगवते नमः ॥३७॥

यस्य अवतार कर्माणि गायन्ति हि अस्मदादयः न यं विन्दन्ति तत्त्वेन तस्मै भगवते नमः ॥३७॥

यस्य	जिनके	**तत्त्वेन**	वास्तविक रूपसे
अवतार	अवतारोंके	**न**	नहीं
कर्माणि	कर्मोंका	**विन्दन्ति**	जानते,
अस्मदादयः	हम सब लोग	**तस्मै**	उन
गायन्ति हि	गायन ही करते हैं,	**भगवते**	भगवान्‌को
यं	जिनको	**नमः**	नमस्कार ॥३७॥

स एष आद्यः पुरुषः कल्पे कल्पे सृजत्यजः ।
आत्माऽऽत्मन्यात्मनाऽऽत्मानं संयच्छति च पाति च ॥३८॥

स एष आद्यः पुरुषः कल्पे कल्पे सृजति अजः आत्मा आत्मनि आत्मना आत्मानं संयच्छति च पाति च ॥३८॥

स एष	वे ये	आत्मना	अपने द्वारा ही
अजः	अजन्मा	आत्मानं	अपने ही को
आद्यः	आदि	सृजति	बनाते हैं
पुरुषः	पुरुष	च पाति	तथा पालन करते हैं
कल्पे कल्पे	प्रत्येक कल्पमें	च संयच्छति	तथा प्रलय भी करते हैं ॥३८॥
आत्मा	स्वयं		
आत्मनि	अपनेमें ही		

विशुद्धं केवलं ज्ञानं प्रत्यक् सम्यगवस्थितम् ।
सत्यं पूर्णमनाद्यन्तं निर्गुणं नित्यमद्वयम् ॥३९॥

विशुद्धं केवलं ज्ञानं प्रत्यक् समक् अवस्थितं सत्यं पूर्णं अनादि अन्तं निर्गुणं नित्यं अद्वयम् ॥३९॥

विशुद्धं	(वे) (मायालेश रहित) शुद्ध,	सत्यं	(वे) सत्य (त्रिकाला वाधित)
केवलं	केवल	पूर्णं	परिपूर्ण,
ज्ञानं	ज्ञान स्वरूप,	अनादि	अनादि,
प्रत्यक्	अन्तरात्मा रूपमें	अन्तं	अनन्त
सम्यक्	भली प्रकार	निर्गुणं	निर्गुण,
अवस्थितं	स्थित हैं ।	नित्यं	नित्य,
		अद्वयं	अद्वितीय हैं ॥३९॥

ऋषे विदन्ति मुनयः प्रशान्तात्मेन्द्रियाशयाः ।
यदा तदेवासत्तर्कैस्तिरोधीयेत विप्लुतम् ॥४०॥

ऋषे विन्दति मुनयः प्रशान्त आत्म इन्द्रिय आशयः यदा तदा एव असत् तर्कैः तिरोधीयेत विप्लुतम् ॥४०॥

ऋषे	देवर्षि !
प्रशान्त	अत्यन्त शान्त
आत्म	चित्त
इन्द्रिय	इन्द्रियाँ (और)
आशयः	अन्तःकरणवाले
मुनयः	मुनि लोग
विदन्ति	(इस वर्णित रूपमें उनको) जानतेहैं, (किन्तु)
यदा	जब
असत्	निराधार
तर्कैः	कुतर्कोंसे
विप्लुतं	(उनका ज्ञान) ढक जाता है
तदा एव	उस ही समय (वे)
तिरोधीयेत	तिरोहित हो जाते हैं ॥४०॥

आद्योऽवतारः पुरुषः परस्य
कालः स्वभावः सदसन्मनश्च ।
द्रव्यं विकारो गुण इन्द्रियाणि
विराट् स्वराट् स्थास्नु चरिष्णुभूम्नः ॥४१॥

आद्यः अवतारः पुरुषः परस्य कालः स्वभावः सत् असत् मनः च द्रव्यं विकारः गुण इन्द्रियाणि विराट् स्वराट् स्थास्नु चरिष्णु भूम्नः ॥४१॥

भूम्नः	सर्वव्यापक
पुरुषः परस्य	परम पुरुषका
आद्यः	पहिला
अवतारः	अवतार
कालः	काल,
स्वभावः	प्रकृति,
सत्	कारण,
असत्	कार्य,
मनः च	तथा मन,
द्रव्यं	पञ्चमहाभूत,
विकारः	अहंकार,
गुण	(सत्त्व, रज, तम) गुण,
इन्द्रियाणि	इन्द्रियाँ,
स्थास्नु	स्थावर (अचर),
चरिष्णु	जंगम (चर)
विराट्	विराट् ब्रह्माण्ड
स्वराट्	स्वयं प्रकाश (भगवान्का) है ॥४१॥

अहं भवो यज्ञ इमे प्रजेशा
दक्षादयो ये भवदादयश्च ।

स्वर्लोकपालाः खगलोकपाला
नृलोकपालास्तललोकपाला ॥४२॥

अहं भवः यज्ञ इमे प्रजेशाः दक्षादयः ये भवदादयः च स्वर्लोकपालाः खगलोकपालाः नृलोकपालाः तललोकपालाः ॥४२॥

अहं	मैं,	ये	जो
भवः	शङ्करजी,	स्वलोकपालाः	स्वर्गादि (अन्तरिक्ष) के पालक,
यज्ञ	विष्णु भगवान्,	खगलोकपालाः	पक्षिलोकके पालक,
इमे	ये	नृलोकपालाः	मनुष्यलोक (पृथ्वी) के पालक
प्रजेशाः	प्रजापति		
दक्षादयः	दक्षादिक,	तललोकपालाः	तललोक (अधो-लोकों) के पालक हैं ॥४२॥
भवदादयः	तुम लोग (ऋषिगण)		
च	तथा		

गन्धर्वविद्याधरचारणेशा
ये यक्षरक्षोरगनागनाथाः ।
ये वा ऋषीणामृषभाः पितृणां
दैत्येन्द्रसिद्धेश्वरदानवेन्द्राः ।
अन्ये च ये प्रेतपिशाचभूत-
कूष्माण्डयादोमृगपक्ष्यधीशाः ॥४३॥

गन्धर्व विद्याधर चारण ईशाः ये यक्ष रक्ष उरग नाग नाथाः ये वा ऋषीणां ऋषभाः पितृणां दैत्येन्द्र सिद्धेश्वर दानवेन्द्राः अन्ये च ये प्रेत पिशाच भूत कूष्माण्ड यादः मृग पक्षि अधीशाः ॥४३॥

गन्धर्व	गन्धर्वों,	यक्ष	यक्ष,
विद्याधर	विद्याधरों (और)	रक्ष	रक्ष,
चारण	चारणोंके	उरग	सर्प,
ईशाः	स्वामी;	नाग नाथाः	नाग वर्गोंके, स्वामी हैं;
ये	जो		

वा	अथवा
ये	जो
ऋषीणां	ऋषियोंमें
ऋषभाः	श्रेष्ठ हैं,
पितृणां	पितरोंमें (श्रेष्ठ हैं);
दैत्येन्द्र	दैत्योंके स्वामी,
सिद्धेश्वर	सिद्धोंके स्वामी
दानवेन्द्राः	दानवोंके स्वामी;
अन्ये च	दूसरे भी
ये प्रेत	जो प्रेत,
पिशाच	पिशाच,
भूत	भूत,
कूष्माण्ड	कूष्माण्ड,
यादः	जलजीव,
मृग	पशु,
पक्षि	पक्षी,
अधीशाः	(वर्गोंके) स्वामी हैं ॥४३॥

यत्किंच लोके भगवन्महस्व-
दोजःसहस्वद् बलवत् क्षमावत् ।
श्रीह्रीविभूत्यात्मवदद्भुतार्णं
तत्त्वं परं रूपवदस्वरूपम् ॥४४॥

यत् किंच लोके भगवन् महस्वत् ओजः सहस्वत् बलवत् क्षमावत् श्री ह्री विभूति आत्मवत् अद्भुत अर्णं तत्त्वं परं रूपवत् अस्वरूपम् ॥४४॥

लोके	(एवं) लोकमें
यत्	जो
किंच	कुछ
भगवन्	ऐश्वर्य युक्त,
महस्वत्	इन्द्रिय बलयुक्त,
ओजः	ओजस्वी,
सहस्वत्	शरीर-बलयुक्त
बलवत्	बलवान्,
क्षमावत्	क्षमाशील है;
श्री	शोभा,
ह्री	लज्जा,
विभूति	सम्पत्तिसे
आत्मवत्	अपने ही समान (अतुलनीय);
अद्भुत	अद्भुत
अर्णं	वर्णवाले
तत्त्वं	तत्त्व
रूपवत्	रूपवान् हों या
अस्वरूपं	रूप रहित (सभी)
परं	भगवत्स्वरूप ही हैं ॥४४॥

प्राधान्यतो यानृष आमनन्ति
लीलावतारान् पुरुषस्य भूम्नः ।

आपीयतां कर्णकषायशोषा-

ननुक्रमिष्ये त इमान् सुपेशान् ॥४५॥

प्राधान्यतः यान् ऋष आमनन्ति लीलावतारान् पुरुषस्य भूम्नः आपीयता, कर्ण कषाय शोषान् अनुक्रमिष्ये त इमान् सुपेशान् ॥४५॥

प्राधान्यतः	प्रधानतः		(श्रवण-कुसंगके
यान्	जिनका		दोषको)
ऋष	शास्त्र	**शोषान्**	दूर करनेवाले
आमनन्ति	वर्णन करते हैं (उन)	**लीलावतारान्**	लीलासे ग्रहण किये
भूम्नः	भूमा		अवतारोंका
पुरुषस्य	पुरुषके	**अनुक्रमिष्ये**	क्रमशः वर्णन करूँगा
त इमान	उन इन	**आपीयतां**	(तुम इस कथामृतका)
सुपेशान्	परम मधुर		पान करो ॥४५॥
कर्णकषाय	कर्णके मलको		

इति श्रीमद्भागवते महापुराणे वैयासिक्यां पारमहंस्यां
संहितायां द्वितीयस्कन्धे षष्ठोऽध्यायः

अथ सप्तमोऽध्यायः

ब्रह्मोवाच–

यत्रोद्यतः क्षितितलोद्धरणाय बिभ्रत्
क्रौडीं तनुं सकलयज्ञमयीमनन्तः ।
अन्तर्महार्णव उपागतमादिदैत्यं
तं दंष्ट्रयाद्रिमिव वज्रधरो ददार ॥१॥

यत्र उद्यतः क्षितितल उद्धरणाय विभ्रत् क्रौडीं तनु सकल यज्ञमयीं अनन्तः अन्तः महार्णव उपागतं आदिदैत्यं तं द्रंष्ट्रया अद्रिं इव वज्रधरः ददार ॥ १ ॥

क्षितितल	पृथ्वीतलका	**तं**	उस
उद्धरणाय	उद्धार करनेके लिए	**आदि दैत्यं**	आदि दैत्य (हिरण्याक्षको)
उद्यतः	प्रस्तुत		
यत्र	जहाँ (ब्रह्मलोकमें)	**वजधरः**	(जैसे) वज्रधारी इन्द्र
सकल	सम्पूर्ण		
यज्ञमयीं	यज्ञस्वरूप	**अद्रिं**	पर्वतको (बिजली गिराकर फाड़ देते है)
क्रौडीं तनुं	वाराहशरीर		
विभ्रत्	धारण करके		
अनन्तः	भगवान् अनन्त	**इव**	इसी प्रकार
महार्णव	प्रलय समुद्रके	**दंष्ट्रया**	दाढ़से
अन्तः	भीतर	**ददार**	फाड़ दिया ॥१॥
उपागतं	आये हुए		

विशेष—क्षितितल पृथ्वीका ऊपरी भाग ही जलके ऊपर आता है। उसीको प्रलय समुद्रसे ऊपर उठाना था। समुद्र तो पृथ्वीपर ही रहेगा। अब भी तीन चौथाई पृथ्वीपर समुद्र है।

जातो रुचेरजनयत् सुयमान् सुयज्ञ
आकूतिसूनुरमरानथ दक्षिणायाम् ।

लोकत्रयस्य महतीमहरद् यदार्तिं
स्वायम्भुवेन मनुना हरिरित्यनूक्तः ॥२॥

जातः रुचेः अजनयत् सुयमान् सुयज्ञ आकूति सूनुः अमरान् अथ दक्षिणायां लोकत्रयस्य महतीं अहरत् यत् आर्तिं स्वायम्भुवेन मनुना हरिः इति अनूक्तः ॥ २ ॥

रुचेः	(फिर वे प्रजापति) रुचिकी पत्नी	अमरान्	देवताओंको
		अजनयत्	उत्पन्न किया।
आकूति	आकूतिके	यत्	क्योंकि (उनने)
सूनुः	पुत्र (बनकर)	लोकत्रयस्य	तीनोंलोकोंके
सुयज्ञ	सुयज्ञ नामसे	महतीं आर्तिं	महान् क्लेश
जातः	अवतरित हुए,	अहरत्	हरण कर लिये
अथ	उस समय	स्वायम्भुवेन	(इसीसे) स्वायम्भुव
दक्षिणायां	दक्षिणा नामक पत्नीमें	मनुना	मनुने (उनको)
		हरिः इति	'हरि' नामसे
सुयमान्	सुयम नामक	अनूक्तः	पुकारा ॥२॥

जज्ञे च कर्दमगृहे द्विज देवहूत्यां
स्त्रीभिः समं नवभिरात्मगतिं स्वमात्रे ।
ऊचे ययाऽऽत्मशमलं गुणसङ्गपङ्क-
मस्मिन् विधूय कपिलस्य गतिं प्रपेदे ॥३॥

जज्ञे च कर्दमगृहे द्विज देवहूत्यां स्त्रीभिः समं नवभिः आत्मगतिं स्वमात्रे ऊचे यया आत्म शमलं गुणसङ्ग पङ्कं अस्मिन् विधूय कपिलस्य गतिं प्रपेदे ॥ ३ ॥

द्विज	नारद !	स्त्रीभिः	बहिनोंके
कर्दमगृहे	प्रजापति कर्दमके घरमें	समं	साथ
		जज्ञे	(भगवान्) उत्पन्न हुए।
च	भी		
देवहूत्यां	देवहूतिसे	स्वमात्रे	(उन्होंने) अपनी माताको
नवभिः	नौ		

आत्मगतिं	आत्मतत्त्वका	शमलं	मलिनताको
ऊचे	उपदेश किया,	विधूय	नष्ट करके
यया	जिसके द्वारा	अस्मिन्	इसी जन्ममें (वे)
गुणसङ्ग	गुणोंकी आसक्ति रूपी	कपिलस्य	भगवान् कपिलके
		गतिं	स्वरूपको
पङ्कं	कीचड़ रूपी	प्रपेदे	प्राप्त हो गयीं ॥३॥
आत्म	चित्तकी		

विशेष—त्रिगुणमय संसारके शरीर नामादिकी आसक्ति ही वह कीचड़ है जो चित्तको मलिन किये है। इसके नष्ट करनेपर ही आत्मतत्त्व या भगवत्प्राप्ति होती है।

अत्रेरपत्यमभिकाङ्क्षत आह तुष्टो
दत्तो मयाहमिति यद् भगवान् स दत्तः।
यत्पादपङ्कजपरागपवित्रदेहा
योगर्द्धिमापुरुभयीं यदुहैहयाद्याः ॥४॥

अत्रेः अपत्यं अभिकांक्षत आह तुष्टः दत्तः मया अहं इति यद् भगवान् स दत्तः यत् पादपङ्कज पराग पवित्र देहा योग ऋद्धि आपुः उभयीं यदु हैहय आद्याः ॥ ४ ॥

अत्रेः	(प्रजापति महर्षि) अत्रिके	दत्तः	दत्त (दत्तात्रेय रूपसे उत्पन्न) हुए
अपत्यं	पुत्रकी	यत्	जिनके
अभिकांक्षत	कामना करनेपर	पादपङ्कज	चरण-कमलकी
यत्	जब	पराग	धूलिसे
तुष्टः	संतुष्ट होकर	पवित्रदेहाः	पवित्र शरीर
भगवान्	भगवान्ने	यदु	यदु (और)
आह	कहा—	हैहयआद्याः	सहस्रार्जुन आदिने
मया	"मैंने	योग	योगकी
अहं इति	अपनेको ही	उभयींऋद्धिं	भोग मोक्ष दोनों
दत्तः	दिया", (तब)		वैभव
स	वे ही (भगवान्)	आपुः	प्राप्त किया ॥४॥

तप्तं तपो विविधलोकसिसृक्षया मे
आदौ सनात् स्वतपसः स चतुःसनोऽभूत् ।
प्राक्कल्पसम्प्लवविनष्टमिहात्मतत्त्वं
सम्यग् जगाद मुनयो यदचक्षतात्मन् ॥५॥

तप्तं तपः विविध लोक सिसृक्षया मे आदौ सनात् स्वतपसः स चतुः सनः अभूत् प्राक् कल्प सम्प्लव विनष्टं इह आत्मतत्त्वं सम्यक् जगाद मुनयः यत् अचक्षत् आत्मन् ॥५॥

मे	मैंने	प्राक् कल्प	पहिले कल्पके
विविध लोक	अनेक लोकोंकी	सम्प्लव	प्रलयमें
सिसृक्षया	सृष्टि करनेकी इच्छासे	विनष्टं	विस्मृत हुए
तपः	तपस्या	आत्मतत्त्वं	आत्मतत्त्वके
तप्तं	की ।		ज्ञानको
स्वतपसः	उस अपनी तपस्यासे	इह	इस कल्पमें
आदौ सनात्	प्रारम्भमें सन्	सम्यक्	भली प्रकार
	नामवाले	जगाद	उपदेश किया
स	वे	यत्	जिससे
चतुः	चार	मुनयः	मुनिगण
सनः	सन्—तपस्वी	आत्मतत्त्वं	आत्मतत्त्वका
	(सनक् सनन्दनन्द	अचक्षत्	साक्षात्कार करते
	सनातन,सनत्कुमार)		हैं ॥५॥
अभूत	उत्पन्न हुए		

धर्मस्य दक्षदुहितर्यजनिष्ट मूर्त्यां
नारायणो नर इति स्वतपःप्रभावः ।
दृष्ट्वाऽऽत्मनो भगवतो नियमावलोपं
देव्यस्त्वनङ्गपृतना घटितुं न शेकुः ॥६॥

धर्मस्य दक्षदुहितरि अजनिष्ट मूर्त्यां नारायणः नर इति स्वतपः प्रभावः दृष्ट्वा आत्मनः भगवतः नियम अवलोपं देव्यः तु अनङ्ग पृतना घटितुं न शेकुः ॥६॥

धर्मस्य	धर्मकी (पत्नी)	दृष्ट्वा	उसे देखकर
दक्षदुहितरि	दक्षकी पुत्री	अनङ्ग	कामदेवकी
मूर्त्यां	मूर्तिसे (वे)	पृतना	सेनाकी
नारायणः	नारायण	देव्यः	देवियाँ (अप्सराएँ)
नर	(और) नर		भी
इति	इन नामोंसे	भगवतः	भगवान्‌के
अजनिष्ट	उत्पन्न हुए।	नियम	नियम (तप) का
स्वतपः	उनके तपका	अवलोपं	नाश
प्रभावः	प्रभाव	घटितुं	करनेमें
आत्मनः	उनके अपने जैसा (अद्वितीय) है।	शेकुः	सफल
		न	नहीं हुईं ॥६॥

कामं दहन्ति कृतिनो ननु रोषदृष्ट्या
रोषं दहन्तमुत ते न दहन्त्यसह्यम् ।
सोऽयं यदन्तरमलं प्रविशन् बिभेति
कामः कथं नु पुनरस्य मनः श्रयेत ॥७॥

कामं दहन्ति कृतिनः ननु रोष दृष्ट्या रोषं दहन्तं उत ते न दहन्ति असह्यं सः अयं यत् अन्तरं अलं प्रविशन् बिभेति कामः कथं नु पुनः अस्य मनः श्रयेत ॥७॥

कृतिनः	पुण्य पुरुष (शिवादि)	दहन्ति	जला पाते।
ननु	निश्चय	सः	वही (क्रोध)
रोष	क्रोध भरी	अयं यत्	इन (नर-नारायण)के
दृष्ट्या	दृष्टिसे	अन्तरं	चित्तमें
काम	कामको	प्रविशन्	प्रवेश करनेमें
दहन्ति	जला देते हैं	अलं	अत्यन्त
उत	किन्तु	बिभेति	डरता है।
दहन्तं	(अपने आपको) जलानेवाले	पुनः	फिर
		अस्य	इनके
असह्यं रोषं	असह्य क्रोधको	मनः	मनमें
ते न	वे नहीं	कामः	काम

नु	तो	श्रयेत	आश्रय ले सकता
कथं	कैसे		है ॥७॥

विद्धः सपत्न्युदितपत्रिभिरन्ति राज्ञो
बालोऽपि सन्नुपगतस्तपसे वनानि ।
तस्मा अदाद् ध्रुवगतिं गृणते प्रसन्नो
दिव्याः स्तुवन्ति मुनयो यदुपर्यधस्तात् ॥८॥

विद्धः सपत्न्य उदित पत्रिभिः अन्ति राज्ञः बालः अपि सन् उपगतः तपसे वनानि तस्मा अदात् ध्रुव गतिं गृणते प्रसन्नः दिव्याः स्तुवन्ति मुनयः यत् उपरि अधस्तात् ॥८॥

राज्ञः	राजा (उत्तानपाद)के	गृणते	(उनके द्वारा) स्तुति करनेपर
अन्ति	समीप ही	प्रसन्नः	प्रसन्न होकर (भगवान्ने)
सपत्न्य	सौतेली माँ (सुरुचि) के	तस्मा	उनको
उदित	कहे हुए	ध्रुवगतिं	(वह) ध्रुवपद
पत्रिभिः	(वाग्) वाणोंसे	अदात्	दिया
विद्धः	बींधे जानेपर	यत्	जिसकी
बालः	(ध्रुव) बालक	उपरि	ऊपर
सन्	होनेपर	अधस्तात	नीचे (परिक्रमा करते)
अपि	भी	दिव्याः	दिव्य
वनानि	वनमें	मुनयः	मुनि (सप्तर्षि)
तपसे	तप करने	स्तुवन्ति	स्तुति करते हैं ॥८॥
उपगतः	चले गये ।		

यद्वेनमुत्पथगतं द्विजवाक्यवज्र-
विप्लुष्टपौरुषभगं निरये पतन्तम् ।
त्रात्वार्थितो जगति पुत्रपदं च लेभे
दुग्धा वसूनि वसुधा सकलानि येन ॥९॥

यत् वेनं उत्पथगतं द्विज वाक्य वज्र विप्लुष्टः पौरुष भगं निरये पतन्तं त्रात्वा अर्थितः जगति पुत्रपदं च लेभे दुग्धाः वसूनि वसुधाः सकलानि येन ॥९॥

यत्	जब	अर्थितः	(ऋषियों द्वारा) प्रार्थना करनेपर
उत्पथगतं	कुमार्गगामी		
वेनं	वेनके	त्रात्वा	(उसकी) रक्षा करके
द्विजवाक्य	ब्राह्मणोंकी वाणीरूप	जगति	(भगवान्‌ने) संसारमें
वज्र	वज्रसे	पुत्रपदं	पुत्रत्व
पौरुष	पौरुष (और)	च	भी
भगं	ऐश्वर्य	लेभे	प्राप्त किया (और)
विप्लुष्टः	नष्ट हो गये,	येन	जिन्होंने
निरये	(तब उसके) नरकमें	वसुधाः	(गो रूप) पृथ्वीसे
		सकलानि	सब
पतन्तं	गिरते समय	वसूनि	सम्पत्तियाँ
		दुग्धाः	दोहन कीं ॥९॥

नाभेरसावृषभ आस सुदेविसूनु-
र्यो वै चचार समदृग् जडयोगचर्याम् ।
यत् पारमहंस्यमृषयः पदमामनन्ति
स्वस्थः प्रशान्तकरणः परिमुक्तसङ्गः ॥१०॥

नाभेः असावृषभः आस सुदेवि सूनुः यः वै चचार समदृक् जडयोग चर्यां यत् पारमहंस्यं ऋषयः पदं आमनन्ति स्वस्थ प्रशान्तकरणः परिमुक्तः सङ्गः ॥१०॥

असा	ये (भगवान्)	स्वस्थ	अपने स्वरूपमें स्थित होकर,
नाभेः	राजा नाभिकी (पत्नी)	प्रशान्तकरणः	इन्द्रियोंको शान्त करके,
सुदेवि	सुदेवीके	सङ्गः	आसक्तिको
सुनुः	पुत्र	परिमुक्तः	त्यागकर,
वृषभः	ऋषभ	जड़योग	जड़योगकी
आस	हुए,	चर्यां	चर्या (विधि) का
यः वै	जिन	चचार	पालन किया,
समदृक्	समदर्शीने		

यत्	जिसे	पारहंस्य पदं	परमहंस पद
ऋषयोः	ऋषिगण		(अवधूतचर्या)
		आमनन्ति	कहते हैं ॥१०॥

सत्रे ममास भगवान् हयशीरषाथो
साक्षात् स यज्ञपुरुषस्तपनीयवर्णः ।
छन्दोमयो मखमयोऽखिलदेवतात्मा
वाचो बभूवुरुशतीःश्वसतोऽस्य नस्तः ॥११॥

सत्रे मम आस भगवान् हयशीर्षाः अथो साक्षात् स यज्ञपुरुषः तपनीयवर्णः छन्दोमयः मखमयः अखिल देवतात्मा वाचः बभूवुः उशतीः श्वसतः अस्य नस्तः ॥११॥

अथो	इसके पश्चात्	छन्दोमयः	वेदमय,
मम	मेरे	मखमयः	यज्ञमय और
सत्रे	यज्ञमें	अखिल	अखिल
साक्षात् भगवान्	साक्षात् भगवान्	देवतात्मा	देवस्वरूप हैं ।
यज्ञपुरुषः	यज्ञपुरुष	अस्य	इनकी
तपनीयवर्णः	स्वर्णके समान	नस्तः	नासिकासे
	कान्तिवाले	श्वसतः	श्वास रूपमें
हयशीर्षाः आस	हयशीर्ष (हयग्रीव)	उशतीः	पवित्र
	हुए	वाचः	वेदवाणी
स	वे	बभूवुः	प्रकट हुई ॥११॥

मत्स्यो युगान्तसमये मनुनोपलब्धः
क्षोणीमयो निखिलजीवनिकायकेतः ।
विस्रंसितानुरुभये सलिले मुखान्मे
आदाय तत्र विजहार ह वेदमार्गान् ॥१२॥

मत्स्यः युगान्त समये मनुना उपलब्धः क्षोणीमयः निखिल जीवः निकायः केतः विस्रंसितान् उरुभये सलिले मुखात् मे आदाय तत्र विजहार ह वेदमार्गान् ॥१२॥

युगान्त समये	(चाक्षुष मनुके) युगके अन्त समयमें
मनुना	(सत्यव्रत भावी) मनुके द्वारा
मत्स्यः	मत्स्य रूपमें (भगवान्)
उपलब्धः	प्राप्त हुए (और)
निखिल	सम्पूर्ण
जीवः	जीवोंको
निकायः	धारण करनेवाली
क्षोणीमयः	पृथ्वी (रूप नौका)के
उरुभये	महाभयसे
केतः	आश्रय हुए (एवं)
सलिले	(प्रलयके) जलमें
मुखात् मे	मेरे मुखसे
विस्रंसितान्	गिरे हुए
वेदमार्गान्	वेदोंको
आदाय	लेकर
तत्र ह	वहाँ ही
विजहार	विहार करते रहे ।।१२।।

क्षीरोदधावमरदानवयूथपाना-
मुन्मथ्नतामसृतलब्धय आदिदेवः ।
पृष्ठेन कच्छपवपुर्विदधार गोत्रं
निद्राक्षणोऽद्रिपरिवर्तकषाणकण्डूः ।।१३।

क्षीरोदधाः अमर दानव यूथपानां उन्मथ्नतां अमृत लब्धय आदिदेवः पृष्ठेन कच्छपवपुः विदधार गोत्रं निद्राक्षणः अद्रि परिवर्त कषाण कण्डूः ।।१३।।

अमृत	अमृतकी
लब्धय	प्राप्तिके लिए
अमर	देवता (और)
दानव	दैत्य
यूथपानां	यूथपतियों द्वारा
क्षीरोदधा	क्षीर सागर
उन्मथ्नतां	मन्थनके समय
आदिदेवः	आदिदेव (भगवान्) ने
कच्छपवपुः	कच्छप शरीरसे
पृष्ठेन	पीठपर
गोत्रं	पर्वतको
विदधार	धारण किया,
अद्रि	(उस) पर्वतके
परिवर्त	घूमनेसे
कण्डूः	खुलजाहट
कषाण	मिटनेसे
निद्राक्षणः	(सुखकी) नींदके क्षण बिता सके ।१३।

त्रैविष्टपोरुभयहा स नृसिंहरूपं
कृत्वा भ्रमद्भ्रुकुटिदंष्ट्रकरालवक्त्रम् ।
दैत्येन्द्रमाशु गदयाभिपतन्तमारा-
दूरौ निपात्य विददार नखैः स्फुरन्तम् ॥१४॥

त्रैविष्टप उरु भयहा स नृसिंह रूपं कृत्वा भ्रमत् भृकुटि दंष्ट्र कराल वक्त्रं दैत्येन्द्रं आशु गदया अभिपतन्तं आरात् उरौ निपात्य विददार नखैः स्फुरन्तम् ॥१४॥

त्रैविष्टप	स्वर्गके (देवताओंके)	आरात्	समीप ही
उरु	भारी	गदया	गदा लेकर
भयहा	भयको नष्ट करनेके लिए	अभिपतन्तं	झपटते
		दैत्येन्द्रं	दैत्येन्द्र (हिरण्यकशिपु) को
स	उन (भगवान्) ने		
भ्रमत्	घूमती हुई	आशु	शीघ्र
भृकुटि	भौहों (और)	उरौ	जांघोंपर
कराल	भयङ्कर	निपात्य	गिराकर
दंष्ट्रं	दाँतों युक्त	स्फुरन्तं	चमकते
वक्त्रं	मुखवाला	नखैः	नखोंसे
नृसिंह रूपं	नृसिंह रूप	विददार	फाड़ डाला ॥१४॥
कृत्वा	धारण करके		

अन्तःसरस्युरुबलेन पदे गृहीतो
ग्राहेण यूथपतिरम्बुजहस्त आर्तः ।
आहेदमादिपुरुषाखिललोकनाथ
तीर्थश्रवः श्रवणमङ्गलनामधेय ॥१५॥

अन्तः सरसि उरु बलेन पदे गृहीतः ग्राहेण यूथपतिः अम्बुज हस्तः आर्तः आह इदं आदिपुरुष अखिल लोकनाथ तीर्थश्रवः श्रवणमंगल नामधेय ॥१५॥

सरसि	सरोवरके	उरु	बहुत
अन्तः	भीतर	बलेन	बलवान

ग्राहेण	मगर द्वारा	आह	कहा—
पदे	पैर	आदिपुरुष	आदिपुरुष !
गृहीतः	पकड़ लिए जानेपर	अखिल लोकनाथ	अखिल लोकनाथ !
आर्तः	व्याकुल होकर	तीर्थश्रवः	पवित्र कीर्ति !
यूथपतिः	(हाथियोंके) यूथके स्वामी गजराजने	श्रवण मंगल	श्रवण मात्रसे ही मंगल करनेवाले
अम्बुजहस्तः	सूंड़में कमल लेकर	नामधेय	नामों वाले ॥१५॥
इदं	यह		

श्रुत्वा हरिस्तमरणार्थिनमप्रमेय-
श्चक्रायुधः पतगराजभुजाधिरूढः ।
चक्रेण नक्रवदनं विनिपाट्य तस्मा-
द्धस्ते प्रगृह्य भगवान् कृपयोज्जहार ॥१६॥

श्रुत्वा हरिः तं अरणं अर्थिनं अप्रमेयः चक्रायुधः पतगराज भुजा अधिरूढः चक्रेण नक्र वदनं विनिपाट्य तस्मात् हस्ते प्रगृह्य भगवान् कृपया उज्जहार ॥१६॥

तं	उस	चक्रेण	(और) चक्रसे
अर्थिनं	प्रार्थीकी	नक्र	मगरके
अरणं	रक्षाकी पुकार	वदनं	मुखको
श्रुत्वा	सुनकर,	विनिपाट्य	फाड़कर,
अप्रमेयः	असीम पराक्रम	हस्ते	(गजराजकी) सूंड़
हरिः	श्रीहरि	प्रगृह्य	पकड़कर
चक्रायुधः	अपना अस्त्र चक्र लेकर	भगवान्	भगवान्‌ने
		कृपया	कृपा करके
पतगराज	गरुड़के	तस्मात्	उस (मगर) से
भुजा	कन्धेपर	उज्जहार	(गजराजका) उद्धार
अधिरूढः	आरूढ़ होकर (वहाँ पहुँचे),		किया ॥१६॥

ज्यायान् गुणैरवरजोऽप्यदितेः सुतानां
लोकान् विचक्रम इमान् यदथाधियज्ञः ।

क्ष्मां वामनेन जगृहे त्रिपदच्छलेन
याच्ञामृते पथि चरन् प्रभुभिर्न चाल्यः ॥१७॥

ज्यायान् गुणैः अवरजः अपि अदितेः सुतानां लोकान् विचक्रम इमान् यत् यथा अधियज्ञः क्ष्मां वामनेन जगृहे त्रिपदः छलेन याच्ञां ऋते पथिचरन् प्रभुभिः न चाल्यः ॥१७॥

अदितेः	अदितिके	**इमान्**	इस
सुतानां	पुत्रोंमें	**क्ष्मां**	पृथ्वी आदि
अवरजः	सबसे छोटे	**लोकान्**	लोकोंको
अपि	होनेपर भी	**विचक्रम**	मापकर
गुणैः	गुणोंसे	**जगृहे**	ले लिया।
ज्यायान्	बड़े थे	**पथिचरन्**	जो ठीक मार्गपर चल रहा है
यत्	क्योंकि		
अधियज्ञः	यज्ञपुरुष (भगवान्ने)	**प्रभुभिः**	समर्थके लिए भी
		याच्ञां	मांगनेको
वामनेन	वामन रूपसे	**ऋते**	छोड़कर
त्रिपदः	तीन पैरके	**चाल्यः**	धक्का देने योग्य (वह)
छलेन	छलसे		
यथा	जैसे ही (सङ्कल्प लिया)	**न**	नहीं है ॥१७॥

विशेष—जो ठीक मार्गपर जा रहा है, आप कितने भी समर्थ हों उसे धक्का देकर आगे निकलना उचित नहीं है। एकमात्र उपाय है कि उससे एक ओर होकर आगे जानेका मार्ग माँगिये।

नार्थो बलेरयमुरुक्रमपादशौच-
मापः शिखा धृतवतो विबुधाधिपत्यम्।
यो वै प्रतिश्रुतमृते न चिकीर्षदन्य-
दात्मानमङ्ग शिरसा हरयेऽभिमेने ॥१८॥

न अर्थः बलेः अयं उरुक्रम पादशौचं आपः शिखा धृतवतः विबुध आधिपत्यं यः वै प्रतिश्रुतं ऋते न चिकीर्षत् अन्यत् आत्मानं अंग शिरसा हरये अभिमेने ॥१८॥

अंग	प्रिय नारद !	यः	जिन्होंने
उरुक्रम	अनन्त पराक्रम वामन भगवान्के	वै	निश्चयपूर्वक
पादशौचं आपः	चरण-प्रक्षालनका पवित्र जल (चरणामृत)	प्रतिश्रुतं	अपनी प्रतिज्ञाकी (पूर्ति)
शिखा	मस्तकपर	ऋते	छोड़कर
धृतवतः	धारण करनेवाले	अन्यत्	दूसरा (कुछ)
बलेः	बलिके लिए	न	नहीं
विबुध	देवताओंके	चिकीर्षत्	करना चाहा (प्रतिज्ञा पूर्तिके लिए)
आधिपत्यं	स्वामित्व (इन्द्र-पद) से	आत्मानं	अपने
अयं अर्थः	यह प्रयोजन	शिरसा	मस्तकको
न	नहीं था	हरये	भगवान्को
		अभिमेने	अर्पित कर दिया ॥१८॥

तुभ्यं च नारद भृशं भगवान् विवृद्ध-
भावेन साधुपरितुष्ट उवाच योगम् ।
ज्ञानं च भागवतमात्मसतत्त्वदीपं
यद्वासुदेवशरणा विदुरञ्जसैव ॥१९॥

तुभ्यं च नारद भृशं भगवान् विवृद्धः भावेन साधु परितुष्टः उवाच योगं ज्ञानं च भागवतं आत्म सतत्त्व दीपं यत् वासुदेव शरणाः विदुः अञ्जसा एव ॥१९॥

नारद	नारद !	भगवान्	भगवान्ने
तुभ्यं	तुमको	योगं	योग
च	भी	आत्म	आत्माके
भृशं	अत्यन्त	सतत्त्व दीपं	तत्त्वको प्रकाशित करनेवाले
विवृद्धः	बढ़े हुए (तीव्र)	भागवतं	भक्ति मार्गके
भावेन	भावसे	स	साथ
साधु	भली प्रकार	ज्ञानं	ज्ञानका
परितुष्टः	सन्तुष्ट हुए		

च	भी	वासुदेव	वासुदेवकी
उवाच	उपदेश (हंस रूपसे) किया।	शरणाः	शरण लेनेवाले
		एव	ही
यत्	जिस (ज्ञान) को	विदुः	जानते हैं ॥१९॥
अञ्जसा	सरलतासे		

चक्रं च दिक्ष्वविहतं दशसु स्वतेजो
मन्वन्तरेषु मनुवंशधरो बिभर्ति ।
दुष्टेषु राजसु दमं व्यदधात् स्वकीर्ति
सत्ये त्रिपृष्ठ उशतीं प्रथयंश्चरित्रैः ॥२०॥

चक्रं च दिक्षु अवहितं दशसु स्वतेजः मन्वन्तरेषु मनुवंशधरः बिभर्ति दुष्टेषु राजसु दमं व्यदधात् स्वकीर्ति सत्ये त्रिपृष्ठः उशतीं प्रथयं चरित्रैः ।२०।

मन्वन्तरेषु	मन्वन्तरोंमें	राजसु	राजाओंके लिए
मनुवंशधरः	मनुवंशकी रक्षा करते हुए	दमं	दण्ड
		व्यदधात्	विधान करते हैं
दशसु	दसो	त्रिपृष्ठः	त्रिलोकीके ऊपर
दिक्षु	दिशाओंमें	सत्ये	सत्य (ब्रह्म) लोक
अवहितं	बेरोकटोक	च	तक
स्वतेजः	अपने तेजका	चरित्रैः	अपने चरित्रोंसे
चक्रं	चक्र	स्वकीर्ति उशतीं	अपनी निर्मल कीर्ति
बिभर्ति	धारण करते हैं	प्रथयम्	विस्तारित कर देते हैं ॥२०॥
च	और		
दुष्टेषु	दुष्ट		

धन्वन्तरिश्च भगवान् स्वयमेव कीर्ति-
र्नाम्ना नृणां पुरुरुजां रुज आशु हन्ति ।
यज्ञे च भागममृतायुरवावरुन्ध
आयुश्च वेदमनुशास्त्यवतीर्य लोके ॥२१॥

धन्वन्तरिः च भगवान् स्वयं एव कीर्तिः नाम्ना नृणां पुरु रुजां रुज आशु हन्ति यज्ञे च भागं अमृत आयुः अवावरुन्ध आयुः च वेदं अनुशास्ति अवतीर्य लोके ॥२१॥

भगवान्	भगवान्
धन्वन्तरिः च	धन्वन्तरि भी
स्वयं एव	अपने ही
नाम्ना	नामके द्वारा
पुरु रुजां	बहुत रोगी
नृणां	मनुष्योंके
रुज	रोगको
आशु	शीघ्र
हन्ति	नाश कर देते हैं
कीर्तिः	ऐसी (उनकी) प्रसिद्धि है,
यज्ञे च	यज्ञमें भी (वैद्य होनेपर भी)
भागं	उनका भाग है
अमृत	अमृत (पिलाकर)
आयुः	(देवताओंकी) आयुको
अवावरुन्ध	रोक दिया (उन्हें अमर कर दिया)
च लोके	तथा संसारमें
अवतीर्य	अवतार लेकर
आयुः वेदं	आयुर्वेदका
अनुशास्ति	प्रवर्तन किया ॥२१॥

क्षत्रं क्षयाय विधिनोपभृतं महात्मा
ब्रह्मध्रुगुज्झितपथं नरकार्तिलिप्सु ।
उद्धन्त्यसाववनिकण्टकमुग्रवीर्य-
स्त्रिःसप्तकृत्व उरुधारपरश्वधेन ॥२२॥

क्षत्रं क्षयाय विधिना उपभृतं महात्मा ब्रह्मध्रुक् उज्झितपथं नरक आर्तिलिप्सुः उद्धन्ति असौ अवनि कण्टकं उग्रवीर्यः त्रिःसप्त कृत्वः उरुधार परशुअधेन ॥२२॥

विधिना	संयोगवश
उपभृतं	बढ़े हुए
ब्रह्मध्रुक्	ब्राह्मण-द्रोही
उज्झितपथं	सन्मार्ग विमुख
नरक	नरककी
आर्तिलिप्सुः	आर्ति चाहनेवाले (नारकीय)
अवनि	पृथ्वीके
कण्टकं	कण्टक रूप
क्षत्रं	क्षत्रियोंके
क्षयाय	विनाशके लिए
असौ	इन
उग्रवीर्य	प्रचण्डतेजा
महात्मा	परम पराक्रमी (परशुराम) ने
उरुधार	तीक्ष्ण धारवाले
परशु	फरसेके
अधेन	प्रहारसे
त्रिसप्त	इक्कीस बार
कृत्वः	करके
उद्धन्ति	मारा ॥२२॥

अस्मत्प्रसादसुमुखः कलया कलेश
इक्ष्वाकुवंश अवतीर्य गुरोर्निदेशे ।
तिष्ठन् वनं सदयितानुज आविवेश
यस्मिन् विरुध्य दशकन्धर आर्तिमार्च्छत् ॥ ३॥

अस्मत् प्रसाद सुमुखः कलयाः कलेश इक्ष्वाकुवंश अवतीर्य गुरोः निदेशे तिष्ठन् वनं स दयिता अनुज आविवेश यस्मिन् विरुध्य दशकन्धरः आर्तिं आर्च्छत् ॥२३॥

अस्मत्	हमपर	अनुज	छोटे भाई (लक्ष्मण) के
प्रसाद	कृपासे		
सुमुखः	प्रसन्न होकर	स	साथ
कलेशः	कलाओंके स्वामी	वनं	वनमें
कलयाः	(भरत, लक्ष्मण, शत्रुघ्न) कलाओंके साथ	तिष्ठन्	रहने
		आविवेश	गये ।
		यस्मिन्	जिनसे
इक्ष्वाकुवंश	इक्ष्वाकुके वंशमें	विरुध्य	विरोध करके
अवतीर्य	अवतार लेकर	दशकन्धरः	रावण
गुरोः	पिताकी	आर्तिं	संकटको
निदेशे	आज्ञासे	आर्च्छत्	प्राप्त हुआ (मारा (गया ॥२३॥
दयिता	पत्नी		

यस्मा अदादुदधिरूढभयाङ्गवेपो
मार्गं सपद्यरिपुरं हरवद् दिधिक्षोः ।
दूरे सुहृन्मथितरोषसुशोणदृष्ट्या
तातप्यमानमकरोरगनक्रचक्रः ॥२४॥

यस्मा अदात् उदधि रूढ भय अङ्गवेप. मार्गं सपदि अरिपुरं हरवत् दिधिक्षोः दूरे सुहृत् मथित रोष सुशोण दृष्ट्याः तातप्यमान मकर उरग नक्र चक्रः ॥२४॥

अरिपुरं	शत्रुके नगर (त्रिपुरको)	दिधिक्षोः	जलानेको उद्यत्
		हरवत्	शंकरजीके समान

दूरे सुहृत	पत्नीके वियोगके कारण	नक्र	मगर
रोष	क्रोधसे	चक्रः	समुदायवाला
सुशोण	अत्यन्त लाल	अधिरूढ भय	भयाक्रान्त
दृष्ट्याः	दृष्टिसे ही	अङ्गवेपः	काँपते शरीर
मथित	मथा जाता	उदधि	समुद्रने
तातप्यमान	संतप्त होते	सपदि	शीघ्र ही
मकर	घड़ियाल	यस्मा	जिनको
उरग	सर्प	मार्ग	मार्ग
		अदात्	दे दिया ॥२४॥

वक्षःस्थलस्पर्शरुग्णमहेन्द्रवाह-
दन्तैर्विडम्बितककुब्जुष ऊढहासम् ।
सद्योऽसुभिः सह विनेष्यति दारहर्तु-
र्विस्फूर्जितैर्धनुष उच्चरतोऽधिसैन्ये ॥२५॥

वक्षःस्थल स्पर्श रुग्ण महेन्द्रवाह दन्तैः विडम्बित ककुब्जुषु उढहासं सद्यः असुभिः सह विनेष्यति दारहर्तुः विस्फूर्जितैः धनुष उच्चरतः अधिसैन्ये ॥२५॥

वक्षःस्थल	(अपनी) छातीकी	अधिसैन्ये	सेनाके मध्य (आनेपर)
स्पर्श	टक्करसे		
महेन्द्रवाह	इन्द्रके वाहन ऐरावतके	विस्फूर्जितैः	प्रचण्ड
दन्तैः	दाँतोंके	धनुष	धनुषकी
रुग्ण	टूट जानेसे	उच्चरतः	टंकारके साथ
ककुब्जुषु	दिशाओंको	सद्यः	तत्काल
उढहासं	अट्टहाससे	असुभिः	प्राणोंके
विडम्बित	गुंजित (करनेवाले)	सह	साथ
दारहर्तुः	पत्नी चुरानेवाले (उसी रावणके)	विनेष्यति	विनाश कर देंगे ॥२५॥

भूमेः सुरेतरवरूथविमर्दिताया-
क्लेशव्ययाय कलया सितकृष्णकेशः ।

जातः करिष्यति जनानुपलक्ष्यमार्गः
कर्माणि चात्ममहिमोपनिबन्धनानि ॥२६॥

भूमेः सुरेतर वरूथ विमर्दितायाः क्लेश व्ययाय कलया सितकृष्णकेशः जातः करिष्यति जना अनुपलक्ष्य मार्गः कर्माणि च आत्ममहिमा उपनिबन्धनानि ॥२६॥

सुरेतर	असुरोंके	**जना**	लोगोंके लिए
वरूथ	झुण्डोंसे	**अनुपलक्ष्य**	अनुमानके (अगोचर)
विमर्दितायाः	रौंदी हुई	**मार्गः**	मार्गसे परे
भूमेः	पृथ्वीके	**आत्ममहिमा**	अपनी महिमासे
क्लेश	कष्टको	**उपनिबन्धनानि**	परिपूर्ण
व्ययाय	नष्ट करनेके लिए	**कर्माणि**	कर्मोंको
कलया	कलासे*	**च**	भी
■ **सितकृष्णकेशः**	श्वेत और काले केशोंसे	**करिष्यति**	करेंगे ॥२६॥
जातः	अवतरित होकर		

---

* कलया—कलासे और सम्पूर्ण कलाओंके साथ यह दोनों अर्थ सम्भव है। दोनों अर्थ किया जाना चाहिए। 'कलया' इसका अन्वय तब दो बार होगा।

कलया—सम्पूर्ण कलाओंके साथ तथा कलासे श्वेत-कृष्ण केशके रूपमें। इसमें सम्पूर्ण कलाके साथ नन्दगृहमें और सितकृष्णकेशसे कलासे मथुरामें।

■ **केश**—केशावतारके लिए श्रीमद्भागवत, विष्णुपुराण, महाभारत आदि सब जगहोंमें 'कैश' शब्द व्यवहृत हुआ है। केशका प्रचलित अर्थ 'बाल' है। संस्कृत भाषामें 'केश' के पर्यायवाची शब्द हैं कच, कुनील, चिकुर आदि। कहीं भी केशावतारके लिए 'केश' की जगह दूसरे पर्यायवाची शब्दका प्रयोग नहीं हुआ है। अतः 'केश' शब्द एक विशेष अर्थमें लिया गया है।

तोकेन जीवहरणं यदुलूकिकाया-
स्त्रैमासिकस्य च पदा शकटोऽपवृत्तः ।
यद् रिङ्गतान्तरगतेन दिविस्पृशोर्वा
उन्मूलनं त्वितरथार्जुनयोर्न भाव्यम् ॥२७॥

तोकेन जीवहरणं यत् उलूकिकायाः त्रैमासिकस्य च पदा शकटः अपवृत्तः यत् रिङ्गतः अन्तरगतेन दिविस्पृशो वा उन्मूलनं तु इतरथा अर्जुनयोः न भाव्यम् ॥२७॥

तोकेन्	शिशु अवस्थामें (ही)	**अपवृत्तः**	उलट देना,
उलूकिकायाः	पूतनाका	**च**	और
यत्	जो	**रिङ्गतः**	सरकते हुए
जीवहरणं	प्राण हर लेना है,	**अन्तरगतेन**	बीचमें जाकर
त्रैमासिकस्य	तीन महीनेकी वयमें	**दिविस्पृशो**	गगनचुम्बी
पदा	पैरसे	**अर्जुनयो**	अर्जुनके दोनों
शकटः	छकड़ा		वृक्षोंको

*** अंशवो ये प्रकाशन्ते मम ते केश संज्ञिताः ।**
सर्वज्ञा केशवं तस्मान्मामाहुर्मुनिसत्तमाः ॥

महाभारत (गीता प्रेस) शान्ति पर्व ३४१.४८-४९
महाभारत (भण्डारक, पूना) ३२८.४३

अर्थ—भगवान् कहते हैं—मेरेमें विद्यमान अंशु (ज्योतिः) समूहका नाम 'केश' है, इसीसे सर्वज्ञ मुनि-सत्तम-गण मुझे 'केशव' कहते हैं ।

"तत्र च सर्वत्र केशेनर शब्द प्रयोगात् नानावर्णांशूनां श्रीनारद दृष्टतया मोक्षधर्म प्रसिद्धेश्च । —श्रीकृष्ण सन्दर्भ-२९

श्रीनृसिंह पुराणमें भी इस सिद्धान्तका समर्थक प्रमाण मिलता है—

देवक्यां वसुदेवाच्च अवतीर्य महीतले ।
सितकृष्णौ च मच्छक्ती कंसादीन घातयिष्वयतः ॥

नृसिंह पुराण, ५३.३२

उन्मूलनं	जड़से उखाड़ देना,	न भाव्यं	सम्भव नहीं है ॥२७॥
यत् तु	यह सब तो		
इतरथा	(भगवान्‌के अतिरिक्त किसी) दूसरेसे		

यद् वै व्रजे व्रजपशून् विषतोयपीथान्
पालांस्त्वजीवयदनुग्रहदृष्टिवृष्ट्या ।
तच्छुद्धयेऽतिविषवीर्यविलोलजिह्व-
मुच्चाटयिष्यदुरगं विहरन् ह्रदिन्याम् ॥२८॥

यत् वै व्रजे व्रजपशून् विषतोय पीथान् पालान् तु अजीवयत् अनुग्रह दृष्टि वृष्ट्या तत् शुद्धये अतिविष वीर्य विलोल जिह्वं उच्चाटयिष्यत् उरगं विहरन् ह्रदिन्याम् ॥२८॥

यत्	जो	अजीवयत्	जीवित कर दिया
वै	वह आश्चर्यजनक है कि	ह्रदिन्यां	(यमुना) सरितामें
		विहरन्	क्रीड़ा करते हुए
व्रजे	व्रजमें	तत्शुद्धये	उस (यमुना) की शुद्धिके लिए
विषतोय	विषैले जल		
पीथान्	दूषितको पीकर मृत हुए	अतिविष	अतिविषके*
		वीर्य	पराक्रमसे
व्रज पशून	व्रजके पशुओं और	विलोल जिह्वं	लपलपाते जीभवाले
पालान्	पशुपालकोंको	उरगं	सर्प (कालिय नाग) को
तु	भी		
अनुग्रह	कृपा भरी	उच्चाटयिष्यत्	(वहाँसे) निकाल देंगे ॥२८॥
दृष्टि वृष्ट्याः	दृष्टिकी वर्षासे		

तत् कर्म दिव्यमिव यन्निशि निःशयानं
दावाग्निना शुचिवने परिदह्यमाने ।
उन्नेष्यति व्रजमतोऽवसितान्तकालं
नेत्रे पिधाय्य सबलोऽनधिगम्यवीर्यः ॥२९॥

---

* अत्यन्त उग्र विषोंकी अतिविष संज्ञा है ।

तत् कर्म दिव्यं इव यत् निशि निःशयानं दावाग्निना शुचिवने परिदह्यमाने उन्नेष्यति व्रजं अतः अवसित अन्तकालं नेत्रे पिधाय सबलः अनधिगम्य वीर्यः ॥२९॥

यत् निशि	जो उसी रातको	सबलः	बलराम सहित (स्वयं)
निःशयनम्	घोर निद्रामें सोये हुओंको	उन्नेष्यति	बचा लेंगे।
शुचिवने	मूंजके वनमें	अतः	अतः
दावाग्निना	दावाग्नि द्वारा	तत्	उन
परिदह्यमाने	जलाये जानेवाले,	अनधिगम्य	अचिन्त्य
अन्तकालं	अन्तकाल आया	वीर्य	पराक्रम
अवसित	माननेवाले	कर्म	(भगवान्का) कर्म
व्रजं	व्रजवासियोंको	दिव्यं इव	अलौकिक-सा ही
नेत्रेपिधाय	नेत्र बन्द कराकर		है ॥२९॥

गृह्णीत यद् यदुपबन्धममुष्य माता
शुल्बं सुतस्य न तु तत् तदमुष्य माति ।
यज्जृम्भतोऽस्य वदने भुवनानि गोपी
संवीक्ष्य शङ्कितमनाः प्रतिबोधिताऽऽसीत् ॥३०॥

गृह्णीत यत् यत् उपबन्धं अमुष्य माता शुल्बं सुतस्य न तु तत् तत् अमुष्य माति यत् जृम्भतः अस्य वदने भुवनानि गोपी संवीक्ष्य शंकितमनाः प्रतिबोधिता आसीत् ॥३०॥

अमुष्य	इनकी	गृह्णीत	उठाती थीं
माता	माता (यशोदा)	तत् तत्	वे सभी
सुतस्य	पुत्रके	अमुष्य	इनको
उपबन्धं	बाँधनेके लिए	तु	तो
यत् यत्	जो जो	न	नहीं
शुल्बं	रस्सी		

माति	माप (घेर) पाती थी
यत्	जिनके
जृम्भतः	जम्हाई लेनेपर
अस्य	इनके
वदने	मुखमें
भुवनानि	त्रिभुवनको
संवीक्ष्य	देखकर
गोपी	गोपी (यशोदाजी)
शङ्कितमनाः	शंकित्त चित्त (फिर)
प्रतिबोधिता	सावधान
आसीत्	हो गयीं ॥३०॥

नन्दं च मोक्ष्यति भयाद् वरुणस्य पाशाद्
गोपान् बिलेषु पिहितान् मयसूनुना च ।
अह्नचापृतं निशि शयानमतिश्रमेण
लोकं विकुण्ठमुपनेष्यति गोकुलं स्म ॥३१॥

नन्दं च मोक्ष्यति भयात् वरुणस्य पाशात् गोपान् बिलेषु पिहितान् मयसूनुना च अह्नि आपृतं निशिशयानं अतिश्रमेण लोकं विकुण्ठं उपनेष्यति गोकुलं स्म ॥३१॥

नन्दं	(बे) नन्द बाबाको
च	भी
भयात्	(अजगरके) भयसे (और)
वरुणस्य	वरुणके
पाशात	बन्धनसे
मोक्ष्यति	छुड़ावेंगे ।
मयसूनना	मयके पुत्र व्योमासुर द्वारा
बिलेषु	गुफामें
पिहितान्	बन्द किये
गोपान्	गोपोंको
च	भी (छुड़ालायेंगे)।
अह्नि	दिनमें
आपृतं	(काम धन्धेमें) अत्यस्त व्यस्त
निशि	रात्रिमें
अतिश्रमेण	बहुत परिश्रमसे (थके)
शयानं	सो जानेवाले (साधनहीन)
गोकुलं	गोकुलके लोगोंको
विकुण्ठं	वैकुण्ठ
लोकं	लोक
उपनेष्यति स्म	ले जायेंगे ॥३१॥

गोपैर्मखे प्रतिहते व्रजविप्लवाय
देवेऽभिवर्षति पशून् कृपया रिरक्षुः ।

धर्तोच्छिलीन्ध्रमिव सप्त दिनानि सप्त-
वर्षो महीध्रमनघैककरे सलीलम् ॥३२॥

गोपैः मखे प्रतिहते व्रज विप्लवाय देवे अभिवर्षति पशून् कृपया रिरक्षुः धर्ताः उच्छिलिन्ध्रं इव सप्त दिनानि सप्त वर्षः महीध्रं अनघ एककरे सलीलम् ॥३२॥

अनघ	निष्पाप नारद !	रिरक्षुः	रक्षा करनेकी इच्छासे
गोपैः	गोपों द्वारा	सप्त वर्षः	सात वर्षकी अवस्थाके ही (श्रीकृष्ण)
मखे	(इन्द्र) यज्ञके	सलीलं	खेल खेलमें
प्रतिहते	बन्द कर देनेपर	उच्छिलिन्ध्रं	बरसाती छत्तेके
व्रज	व्रजके	इव	समान
विप्लवाय	विनाशके लिए	महीध्रं	(गोवर्धन) पर्वतको
देवे	देवता इन्द्र द्वारा	एककरे	एक ही हाथपर
अभिवर्षति	घोर वर्षा करते समय	सप्तः दिनानि	सात दिनतक
कृपया	कृपासे	धर्ताः	उठाये रहेंगे ॥३२॥
पशून्	पशुओंकी		

क्रीडन् वने निशि निशाकररश्मिगौर्यां
रासोन्मुखः कलपदायतमूर्च्छितेन ।
उद्दीपितस्मररुजां व्रजभृद्वधूनां
हर्तुर्हरिष्यति शिरो धनदानुगस्य ॥३३॥

क्रीडन् वने निशि निशाकर रश्मि गौर्यां रासोन्मुखः कलपदायत मूर्च्छितेन उद्दीपित स्मररुजां व्रजभृत् वधूनां हर्तुः हरिष्यति शिरः धनद अनुगस्य ॥ ३३ ॥

निशाकररश्मि	चन्द्र किरणोंसे	कलपदायत	मनोहर पदोंसे विस्तृत
गौर्यां	उज्वल	मूर्च्छितेन	(वंशी) वादनसे (आकृष्ट आई)
वने	वनमें	रासोन्मुख	रासोद्यत
निशि	रात्रिमें		
क्रीडन्	क्रीड़ा करते हुए		

:स्मररुजां	कामकी बेचैनी	धनद	कुवेरके
उद्दीपित	बढ़ी हुई	अनुगस्य	अनुचर (शंखचूड़)
व्रजभृत्	व्रजवासियोंकी	शिरः	सिर
वधूनां	वहुओं (गोपियों) के	हरिष्यति	काट लेंगे ॥३३॥
हर्तुः	हरण करनेवाले		

ये च प्रलम्बखरदर्दुरकेश्यरिष्ट-

मल्लेभकंसयवनाः कुजपौण्ड्रकाद्याः ।

अन्ये च शाल्वकपिबल्वलदन्तवक्त्र-

सप्तोक्षशम्बरविदूरथरुक्मिमुख्याः ॥३४॥

ये च प्रलम्ब खर दर्दुर केशि अरिष्ट मल्ल इभ कंस यवनाः कुज पौण्ड्रक आद्याः अन्ये च शाल्व कपि बल्वल दन्तवक्त्र सप्त उक्ष शम्बर विदूरथ रुक्ममुख्याः ॥३४॥

ये	जो	पौण्ड्रकआद्याः	पौण्ड्रक आदि,
च	भी	अन्ये च	दूसरे भी
प्रलम्ब	प्रलम्बासुर,	शाल्व	शाल्व,
खर	गधा (धेनुकासुर),	कपि	द्विविदवानर,
दर्दुर	बकासुर,	बल्वल	बल्वल,
केशि	केशी,	दन्तवक्त्र	दन्तवक्त्र,
अरिष्ट	अरिष्टासुर,	सप्त उक्ष	सातो सांड़,
मल्ल	(कंसके) पहलवान (चाणूर-मुष्टिकादि)		(राजा नग्नजित्के)
		शम्बर	शम्बरदैत्य,
इभ	हाथी (कुलमापीड़),	विदूरथ	विदूरथ,
कंस	कंस,	रुक्मि मुख्याः	जिनमें रुक्मीमुख्य
यवनाः	(ससैन्य) कालयवन,		था ॥३४॥
कुज	भौमासुर,		

ये वा मृधे समितिशालिन आत्तचापाः

काम्बोजमत्स्यकुरुकैकयसृञ्जयाद्याः ।

यास्यन्त्यदर्शनमलं बलपार्थभीम-
व्याजाह्वयेन हरिणा निलयं तदीयम् ॥३५॥

ये वा मृधे समितशालिन आत्तचापाः काम्बोज मत्स्य कुरु कैकय, सृञ्जयाद्याः यास्यन्ति अदर्शनं अलं बल पार्थ भीम व्याज आह्वयेन हरिणा निलयं तदीयम् ॥३५॥

वा	अथवा	बल	बलराम,
ये	जो	पार्थ	अर्जुन,
समितशालिन्	सेना रखनेवाले	भीम,	भीमसेन
आत्तचापाः	धनुष चढ़ाये	आह्वयेन	के नामके
मृधे	युद्धमें (आवेंगे वे)	व्याज	बहाने
काम्बोज	(कन्धार) काम्बोज,	हरिणा	श्रीकृष्ण द्वारा
मत्स्य	मत्स्य,	अलं अदर्शनं	मारे जाकर
कुरु	कुरु,	तदीयं	उन (भगवान्) के
कैकय	कैककय,	निलयं	धाम
सृजयाद्याः	सृञ्जय आदि देशोंके (राजा),	यास्यन्ति	जायेंगे ॥३५॥

कालेन मीलितधियामवमृश्य नृणां
स्तोकायुषां स्वनिगमो बत दूरपारः ।
आविर्हितस्त्वनुयुगं स हि सत्यवत्यां
वेदद्रुमं विटपशो विभजिष्यति स्म ॥३६॥

कालेन मीलित धिया अवमृश्य नृणां स्तोक आयुषां स्व निगमाः बत दूरपारः आविर्हितः तु अनुयुगं स हि सत्यवत्यां वेदद्रुमं विटपशः विभजिष्यति स्म ॥३६॥

हि	क्योंकि	स्तोक	थोड़ी
कालेन	समयके फेरसे	आयुषां	आयुवाले
धिया	बुद्धिके	नृणां	मनुष्योंको
मीलित	घट जानेपर	स्व	अपने

निगमः	तत्त्वसे	**सत्यव्रतायां**	सत्यव्रतीमें
बत	प्रायः	**आविर्हितः तु**	आविर्भूत होकर ही
दूरपारः	दूर चला गया	**वेदद्रुमं**	वेदरूपी वृक्षको
अवमृश्य	विचार करके	**विटपशः**	शाखाओंमें
स	वही (भगवान्)	**विभजिष्यति स्म**	विभाजन
अनुयुगं	प्रत्येक युगमें		करेंगे ॥३६॥

देवद्विषां निगमवर्त्मनि निष्ठितानां
पूर्भिर्मयेन विहिताभिरदृश्यतूर्भिः ।
लोकान् घ्नतां मतिविमोहमतिप्रलोभं
वेषं विधाय बहु भाष्यत औपधर्म्यम् ॥३७॥

देवद्विषां निगमवर्त्मनि निष्ठितानां पूः भिः मयेन विहिताभिः अदृश्यतुः भिः लोकान् घ्नतां मतिविमोहं अतिप्रलोभं वेषं विधाय बहु भाष्यत औपधर्म्यम् ॥३७॥

निगमवर्त्मनि	वेदोंके मार्गमें	**अतिप्रलोभं**	अत्यन्त लोभनीय
निष्ठितानां	निष्ठित	**वेषं**	वेश (बुद्धका)
देवद्विषां	देवताओंके शत्रु (दैत्योंके)	**विधाय**	धारण करके
मयेन	मयदानवके	**मतिविमोहं**	बुद्धिको भ्रमित करनेवाले
विहिताभिः	बनाये हुए	**बहु**	बहुतसे
अदृश्यतुः भिः	अदृश्य रहनेवाले	**औपधर्म्यं**	उपधर्मों (पाखण्डों) का
पूः भिः	(त्रि) पुरोंके द्वारा	**भाष्यत**	उपदेश किया ॥३७॥
लोकान्	लोकोंका		
घ्नतां	नष्ट करते (देखकर)		

यर्ह्यालयेष्वपि सतां न हरेः कथाः स्युः
पाखण्डिनो द्विजजना वृषला नृदेवाः ।
स्वाहा स्वधा वषडिति स्म गिरो न यत्र
शास्ता भविष्यति कलेर्भगवान् युगान्ते ॥३८॥

यर्हि आलयेषु अपि सतां न हरेः कथाः स्युः पाखण्डिनः द्विजजनाः वृषला नृदेवाः स्वाहा स्वधा वषट् इति स्म गिरः न यत्र शास्ताः भविष्यति कलेः भगवान् युगान्ते ॥३८॥

कलेः	कलि	**स्वाहा**	(देवयज्ञके लिए) स्वाहा
युगान्ते	युगके अन्तमें	**स्वधा**	(पितृयज्ञके लिए) स्वधा
यर्हि	जब	**वषट्**	(अंगन्यासादिके लिए) वषट्
सतां	सज्जनोंके	**इति स्म**	इस प्रकारकी
आलयेषु	घरोंमें	**गिरः**	वाणी
अपि	भी	**यत्र**	जहाँ (जब)
हरेः	श्रीहरिकी	**न**	नहीं (सुनी जायगी तब)
कथाः	कथा	**भगवान्**	भगवान् (कल्कि रूपमें अवतार लेकर)
न	नहीं	**शास्ताः**	दण्ड देनेवाले
स्युः	होगी,	**भविष्यति**	होंगे ॥३८॥
द्विजजनाः	ब्राह्मण लोग		
पाखण्डिनः	पाखण्डी(हो जायेंगे),		
वृषला	शूद्र		
नृदेवाः	राजा (हो जायेंगे),		

सर्गे तपोऽहमृषयो नव ये प्रजेशाः
स्थाने च धर्ममखमन्वमरावनीशाः ।
अन्ते त्वधर्महरमन्युवशासुराद्या
मायाविभूतय इमाः पुरुशक्तिभाजः ॥३९॥

सर्गे तपः अहं ऋषयः नव ये प्रजेशाः स्थाने च धर्म मखं अनु अमराः अवनीशाः अन्ते तु अधर्म हर मन्युवशा असुराद्या माया विभूतय इमाः पुरुशक्तिभाजः ॥३९॥

सर्गे	सृष्टिके लिए	**ये**	जो
तपः	तपस्या	**नव**	नौ
अहं	मुझ ब्रह्मा	**प्रजेशाः**	प्रजापति

ऋषियः	ऋषि हैं (उनके रूपमें)	**अन्ते**	प्रलयके लिए
च	और	**तु**	तो
स्थाने	पालन (स्थिति) के लिए	**अधर्म**	अधर्म
धर्म	धर्म	**हर**	रुद्र
मखं	यज्ञ	**मन्युवशः**	मन्युवश नामकागणों
अमराः	देवता	**असुराद्याः**	असुरादि (के रूपमें)
अनु	(देवताओंके) अनुयायी (गन्धर्वादि)	**इमाः**	ये सब
अवनीशाः	राजा लोगों (के रूपमें)	**पुरुशक्तिभाजः**	अनन्त शक्तिवाले (भगवान्) की
		माया	माया
		विभूतय	विभूतियाँ हैं ॥३९॥

विष्णोर्नु वीर्यगणनां कतमोऽर्हतीह
यः पार्थिवान्यपि कविर्विममे रजांसि ।
चस्कम्भ यः स्वरंहसास्खलता त्रिपृष्ठं
यस्मात् त्रिसाम्यसदनादुरु कम्पयानम् ॥४०॥

विष्णोः नु वीर्य गणनां कतमः अर्हति इह यः पार्थिवानि अपि कविः विममे रजांसि चस्कम्भः यः स्वरंहसा स्खलता त्रिपृष्ठं यस्मात् त्रि साम्य सदनात् उरु कम्पयानम् ॥४०॥

इह	संसारमें	**गणना**	गणना
यः	जो	**कतमः**	कौन
कविः	बुद्धिमान	**अर्हति**	कर सकता है,
पार्थिवानि	पृथ्वीके	**यः**	जिनके
अपि	भी	**स्वरंहसा**	अपने वेगसे
रजांसि	धूलिकणोंको	**त्रिपृष्ठं**	स्वर्गतक
विममे	गिनले	**स्खलता**	नापते समय
नु	तो	**सदनात्**	(मेरा) सदन (ब्रह्मलोकतक)
विष्णोः	भगवान् विष्णुके		
वीर्य	पराक्रमकी	**चस्कम्भ**	काँपने लगा

यस्मात्	जिनके	त्रि	तीनों लोक
उरु	अत्यन्त	साम्य	स्थिर हुए ॥४०॥
कम्पयानं	अनुकम्पा करनेपर		

नान्तं विदाम्यहममी मुनयोऽग्रजास्ते
मायाबलस्य पुरुषस्य कुतोऽपरे ये ।
गायन् गुणान् दशशतानन आदिदेवः
शेषोऽधुनापि समवस्यति नास्य पारम् ॥४१॥

न अन्तं विदामि अहं अमी मुनयः अग्रजाः ते मायाबलस्य पुरुषस्य कुतः अपरे ये गायन् गुणान् दशशतानन आदिदेवः शेषः अधुना अपि समवस्यति न अस्य पारम् ॥४१॥

पुरुषस्य	परम पुरुषकी	आदिदेवः	आदिदेव
मायाबलस्य	मायाके बलका	शेषः	शेष
अन्तं	अन्त	दशशतानन	सहस्र मुखोंसे
अहं	मैं (और)	गुणान्	(उन भगवान्‌के) गुणोंका
अमी मुनयः	ये मुनिगण	गायन्	गान करते हुए
ते	तुम्हारे	अस्य	इनका
अग्रजाः	बड़े भाई	पारं	पार
न	नहीं	अधुनाअपि	अबतक भी
विदामि	जानते	न	नहीं
ये	जो	समवस्यति	सोच पाते हैं ॥४१॥
अपरे	दूसरे हैं		
कुतः	कैसे जान सकते हैं ।		

येषां स एव भगवान् दययेदनन्तः
सर्वात्मनाऽऽश्रितपदो यदि निर्व्यलीकम् ।
ते दुस्तरामतितरन्ति च देवमायां
नैषां ममाहमिति धीः श्वशृगालभक्ष्ये ॥४२॥

येषां स एव भगवान् दययेत् अनन्तः सर्वात्मना आश्रितः पदः यदि निर्व्यलीकं ते दुस्तरां अतितरन्ति च देवमायां न एषां मम अहं इति धीः श्वश्रृगाल भक्षे ॥४२॥

येषां	जिनपर	भक्ष्ये	भोजन (शरीर) में
स एव	वही	मम-अहं	मैं-मेरा
अनन्तः भगवान्	अनन्त भगवान्	इति	ऐसी
दययेत्	दया करें,	धीः	बुद्धि
यदि	यदि	न	नहीं है
निर्व्यलीकं	निष्कपट भावसे	ते	वे
सर्वात्मना	सब प्रकारसे	च	ही
पदः	(उनके) चरणोंके	दुस्तरां	दुस्तर
आश्रितः	आश्रित हुए हैं,	देवमायां	देवमायाको
एषां	जिनकी	अतितरन्ति	पार कर पाते हैं ।४२।
श्व श्रृगाल	कुत्ते और सियारोंके		

वेदाहमङ्ग परमस्य हि योगमायां
यूयं भवश्च भगवानथ दैत्यवर्यः ।
पत्नी मनोः स च मनुश्च तदात्मजाश्च
प्राचीनबर्हिर्ऋभुरङ्ग उत ध्रुवश्च ॥४३॥

वेद अहं अङ्ग परमस्य हि योगमायां यूयं भवः च भगवान् अथ दैत्यवर्यः पत्नी मनोः स च मनुः च तत् आत्मजाः च प्राचीनबर्हिः ऋभुः अङ्ग उत ध्रुवः च ॥४३॥

अङ्ग	प्रिय नारद	भगवान्	भगवान्
परमस्य	परम पुरुषकी	भवः	शंकरजी
हि	उस	च	और
योगमायां	योगमायाको	दैत्यवर्यः	दैत्य श्रेष्ठ प्रहलाद
अहं	मैं	मनोः	स्वायम्भुव मनुकी
वेद	जानता हूँ ।	पत्नी	शतरूपा
यूयं	तुम लोग (मेरे पुत्र)	स च	वही
अथ	तथा	मनुः	स्वायम्भुव मनु

च	एवं	ऋभुः	ऋभु
तत् आत्मजाः	उनके पुत्र (प्रियवत, उत्तानपाद)	उत	तथा
		अङ्ग	राजा अंग
च	और	च	एवं
प्राचीनबर्हि	प्राचीनबर्हि	ध्रुव	ध्रुव ॥४३॥

इक्ष्वाकुरैलमुचुकुन्दविदेहगाधि-
रघ्वम्बरीषसगरा गयनाहुषाद्याः ।
मान्धात्रलर्कशतधन्वनुरन्तिदेवा
देवव्रतो बलिरमूर्त्तरयो दिलीपः ॥४४॥

इक्ष्वाकुः ऐल (पुरुरवा) मुचुकुन्द विदेह (जनक) गाधिः रघु अम्बरीष सगरा गय नाहुषाद्याः (ययाति आदि) मान्धात्र अलर्क शतधन्व अनु रन्तिदेवः देवव्रत (भीष्म) बलिः अमूर्तरयः दिलीप ॥४४॥

सौभर्युतङ्कशिबिदेवलपिप्पलाद-
सारस्वतोद्धवपराशरभूरिषेणाः ।
येऽन्ये विभीषणहनूछुपेन्द्रदत्त-
पार्थार्ष्टिषेणविदुरश्रुतदेववर्याः ॥४५॥

सौभरि उतङ्क शिवि देवल पिप्पलाद सारस्वत उद्धव पराशर भूरिषेणाः ये अन्ये (जो दूसरे) विभीषण हनूमत् उपेन्द्रदत्त (शुकदेव) पार्थ (अर्जुन) अर्ष्टिषेण विदुर श्रुतदेव वर्याः (श्रेष्ठ पुरुष हैं) ॥४५॥*

ते वै विदन्त्यतितरन्ति च देवमायां
स्त्रीशूद्रहूणशबरा अपि पापजीवाः ।
यद्यद्भुतक्रमपरायणशीलशिक्षा-
स्तिर्यग्जना अपि किमु श्रुतधारणा ये ॥४६॥

---

* यह केवल नाम हैं ।

ते वै विदन्ति अतितरन्ति च देवमायां स्त्री शूद्र हूण शबराः अपि पापजीवाः यत् अद्भुत क्रम परायण शील शिक्षाः तिर्यक्जनाः अपि किमु श्रुतधारणाः ये ॥४६॥

यत्	जिनको	तिर्यक्जनाः	पशु-पक्षीकी योनिके
अद्भुत क्रम	अद्भुत पराक्रम (भगवान्के)	अपि	भी
		वै	निश्चित
परायण	परायण	देवमायां	देवमायाको
शील	रहनेकी	विदन्ति	जानते हैं
शिक्षाः	शिक्षा मिली है	च	तथा
ते	वे	अतितरिन्ति	पार कर जाते हैं।
स्त्री	स्त्री	ये	जो
शूद्र	शूद्र	श्रुतधारणाः	वैदिक आचार धारी हैं
पापजीवाः	पापजीवी		
अपि	होनेपर भी	किमु	उनकी बात ही क्या ॥४६॥
हूण	हूण		
शवराः	शबर (भीलादि)		

शश्वत् प्रशान्तमभयं प्रतिबोधमात्रं
शुद्धं समं सदसतः परमात्मतत्त्वम् ।
शब्दो न यत्र पुरुकारकवान् क्रियार्थो
माया परैत्यभिमुखे च विलज्जमाना ॥४७॥

शश्वत् प्रशान्तं अभयं प्रतिबोधमात्रं शुद्धं समं सत् असत् परं आत्मतत्त्वं शब्दः न यत्र पुरुकारकवान् क्रियार्थ माया परैति अभिमुखे च विलज्जमाना ॥४७॥

आत्मतत्त्वं	आत्मतत्त्व	समं	सम (वैषम्यरहित)
शश्वत्	नित्य	सत् असत् परं	कार्य कारणसे अतीत है
प्रशान्तं	प्रशान्त (एकरस)		
अभयं	अभय	यत्र	जहां
प्रतिबोधमात्रं	ज्ञानमात्र	शब्दः	शब्द (लौकिक वैदिक कोई)
शुद्धं	शुद्ध (निर्मल)		

न	नहीं पहुँचता	**माया च**	माया भी (जहाँसे)
पुरुकारकवान्	अनेक साधनोंसे होनेवाले	**अभिमुखे**	सामने जानेमें
		विलज्जमाना	लज्जित होकर
क्रियार्थः	कर्मोंका फल (भी नहीं पहुँचता)	**परेति**	लौट आती है ॥४७॥

तद् वै पदं भगवतः परमस्य पुंसो
ब्रह्मेति यद् विदुरजस्रसुखं विशोकम् ।
सध्र्यङ् नियम्य यतयो यमकर्तहेतिं
जह्युः स्वराडिव निपानखनित्रमिन्द्रः ॥४८॥

तत् वै पदं भगवतः परमस्य पुंसः ब्रह्म इति विदुः अजस्र सुखं विशोकं सध्र्यङ् नियम्य यतयः यं अकर्त हेतिं जह्युः स्वराट् इव निपान खनित्रं इन्द्रः ॥४८॥

तत्	वह	**नियम्य**	लगाकर
वै	ही	**निपान**	कुआँ
भगवतः	भगवान्	**खनित्रं**	खोदनेके शस्त्रको
परमस्य	परम	**इन्द्रः**	इन्द्र
पुंसः	पुरुषका	**इव**	की भाँति (इन्द्र
पदं	स्वरूप है,		स्वयं वर्षाके देवता
ब्रह्म	ब्रह्म		होनेसे कुआँ जैसे नहीं
इति	इस नामसे		खोदते-खोदनेका अस्त्र
विदुः	जाना जाता है,		फेंक देते हैं, वैसे ही)
अजस्रसुखं	अखण्ड आनन्दरूप	**स्वराट्**	स्वयं प्रकाशमें
विशोकं	शोकरहित है		(में स्थित होकर)
यतयः	संयमी	**अकर्तहेतिं**	कर्मोंके काटनेके
सध्र्यङ्	भली प्रकार		साधनोंको
यं	जिनमें (मनको)	**जह्युः**	त्याग देते हैं ॥४८॥

स श्रेयसामपि विभुर्भगवान् यतोऽस्य
भावस्वभावविहितस्य सतः प्रसिद्धिः ।

देहे स्वधातुविगमेऽनुविशीर्यमाणे
व्योमेव तत्र पुरुषो न विशीर्यतेऽजः ॥४९॥

स श्रेयसां अपि विभुः भगवान यतः अस्य भाव स्वभाव विहितस्य सतः प्रसिद्धिः देहे स्वधातु विगमे अनु विशीर्यमाणे व्योम इव तत्र पुरुषः न विशीर्यते अजः ॥४९॥

स	वे	स्वधातु	अपनी धातु (रक्त-मांसादिके)
विभुः	सर्वव्यापक		
श्रेयसां	कल्याणोंके	विगमे	पृथक-पृथक होनेपर
अपि	भी	अनु	उसके साथ
भगवान	स्वामी (प्रदाता) हैं,	विशीर्यमाणे	नष्ट होनेपर
यतः	क्योंकि	व्योम	(शरीरमें स्थित) आकाश
स्वभाव	अपने स्वभावके		
विहितस्य	अनुसार होनेवाले	इव	की भाँति
भाव	भाव (कर्म)	तत्र	उसमें (स्थित)
अस्य	इन (भगवानकी)	अजः	अजन्मा
सतः	सत्तासे ही	पुरुषः	पुरुष
प्रसिद्धिः	सफल होते हैं।	विशीर्यते	नष्ट
देहे	शरीरके	न	नहीं होता ॥४९॥

सोऽयं तेऽभिहितस्तात भगवान् विश्वभावनः।
समासेन हरेर्नान्यदन्यस्मात् सदसच्च यत् ॥५०॥

सः अयं ते अभिहितः तात भगवान् विश्वभावनः समासेन हरेः न अन्यत् अन्य अस्मात् सत् असत् च यत् ॥५०॥

तात	पुत्र नारद !	भगवान्	भगवानका
अयं	यह	समासेन	संक्षिप्त रूपसे
ते	तुमसे	अभिहितः	वर्णन किया,
सः	उन	सत्	कारण
विश्वभावन	विश्वको भावनासे बनानेवाले	असत्	कार्य
		यत्	जो

च	भी है	अन्य	पृथक
अस्मात्	इन	न	नहीं है ॥५०॥
हरेः	श्रीहरिसे		

इदं भागवतं नाम यन्मे भगवतोदितम् ।
संग्रहोऽयं विभूतीनां त्वमेतद् विपुलीकुरु ॥५१॥

इदं भागवतं नाम यत् मे भगवता उदितं संग्रहः अयं विभूतीनां त्वं एतत् विपुली कुरु ॥५१॥

इदं	यह	विभूतीनां	(भगवानकी) विभूतियोंका
भागवतं	भागवत		
नाम	नामका (ज्ञान) है ।	संग्रहः	संग्रह (संक्षिप्त वर्णन)
यत्	जिसे		है ।
मे	मुझसे	त्वं	तुम
भगवता	भगवान्‌ने	एतत	इसका
उदितं	प्रकाशित किया (सुनाया),	विपुली	विस्तार
		कुरु	करो ॥५१॥
अयं	यह		

यथा हरौ भगवति नृणा भक्तिर्भविष्यति ।
सर्वात्मन्यखिलाधारे इति सङ्कल्प्य वर्णय ॥५२॥

यथा हरौ भगवति नृणां भक्तिः भविष्यति सर्वात्मनि अखिलाधारे इति सङ्कल्प्य वर्णय ॥५२॥

यथा	जैसे	भक्तिः	भक्ति
भगवति	भगवान्	भविष्यति	होगी
सर्वात्मनि	सर्वात्मा	इति	ऐसा
अखिलाधारे	सर्वाधार	सङ्कल्प्य	संकल्प करके
हरौ	श्रीहरिमें	वर्णय	वर्णन करो ॥५२॥
नृणां	मनुष्योंकी		

मायां वर्णयतोऽमुष्य ईश्वरस्यानुमोदतः ।
शृण्वतः श्रद्धया नित्यं मायया ऽऽत्मा न मुह्यति ॥५३॥

मायां वर्णयतः अमुष्य ईश्वरस्य अनुमोदतः शृण्वतः श्रद्धया नित्यं मायया आत्मा न मुह्यति ॥५३॥

अमुष्य	इन	**अनुमोदतः**	अनुमोदन करनेवालेका
ईश्वरस्य	परमेश्वरकी	**शृण्वतः**	सुनते हुए ।
मायां	मायाका	**आत्मा**	चित्त
नित्यं	सदा	**मायया**	मायासे
श्रद्धया	श्रद्धाके साथ	**न**	नहीं
वर्णयतः	वर्णन करनेवाले (तथा)	**मुह्यते**	मोहित होता ॥५३॥

इति श्रीमद्भागवते महापुराणे वैयासिक्यां पारमहंस्यां संहितायां द्वितीयस्कन्धे सप्तमोऽध्यायः

अथ अष्टमोऽध्यायः

राजोवाच-

ब्रह्मणा चोदितो ब्रह्मन् गुणाख्यानेऽगुणस्य च ।
यस्मै यस्मै यथा प्राह नारदो देवदर्शनः ॥१॥

ब्रह्मणा चोदितः ब्रह्मन् गुण आख्याने अगुणस्य च यस्मै यस्मै यथा प्राह नारदः देवदर्शनः ॥१॥

ब्रह्मन्	शुकदेवजी	**देवदर्शनः**	देवताओंके समान जिनका दर्शन दुर्लभ है (उन)
ब्रह्मणा	ब्रह्माजीके द्वारा		
अगुणस्य	निर्गुण भगवान्के		
च	भी	**नारदः**	नारदजीने
गुण	गुणोंका	**यस्मै यस्मै**	जिन जिनको
आख्याने	वर्णन करनेके लिए	**यथा**	जैसे
चोदितः	प्रेरित किये जानेपर	**प्राह**	उपदेश किया ॥१॥

एतद् वेदितुमिच्छामि तत्त्वं वेदविदां वर ।
हरेरद्भुतवीर्यस्य कथा लोकसुमङ्गलाः ॥२॥

एतत् वेदितुं इच्छामि तत्त्वं वेदविदांवर हरेः अद्भुत वीर्यस्य कथाः लोक सुमङ्गलाः ॥२॥

वेदविदांवर	वेदवेत्ताओंमें (आप) श्रेष्ठ हैं	**वीर्यस्य**	अद्भुत पराक्रम
		हरेः	श्रीहरिकी
एतत्	यह	**कथाः**	कथा
तत्त्वं	तत्त्व	**लोक**	लोकके लिए
वेदितुं	जाननेकी	**सुमङ्गलाः**	परम कल्याणकारिणी है ॥२॥
इच्छामि	मेरी इच्छा है (क्योंकि)		

कथयस्व महाभाग यथाहमखिलात्मनि ।
कृष्णे निवेश्य निःसङ्गं मनत्यक्षे कलेवरम् ॥३॥

कथयस्व महाभाग यथा अहं अखिलात्मनि कृष्णे निवेश्य निःसङ्गं मनः त्यक्षे कलेवरम् ॥३॥

महाभाग	महाभाग !	**निःसङ्गं**	आसक्ति रहित
कथयस्व	(वह) वर्णन कीजिये	**मनः**	मनको
यथा	जैसे	**निवेश्य**	प्रवेश कराके
अहं	मैं	**कलेवरं**	शरीरको
अखिलात्मनि	अखिलात्मा	**त्यक्षे**	छोड़ दूं ॥३॥
कृष्णे	श्रीकृष्णमें		

शृण्वतः श्रद्धया नित्यं गृणतश्च स्वचेष्टितम् ।
कालेन नातिदीर्घेण भगवान् विशते हृदि ॥४॥

शृण्वतः श्रद्धया नित्यं गृणतः च स्वचेष्टितं कालेन न अति दीर्घेण भगवान् विशते हृदि ॥४॥

स्वचेष्टितं	अपनी लीलाको	**अति**	बहुत
श्रद्धया	श्रद्धापूर्वक	**दीर्घेण**	लम्बे
नित्यं	सदा	**कालेन**	समयमें
शृण्वतः	सुननेवाले	**न**	नहीं (शीघ्र ही)
च	तथा	**भगवान्**	भगवान्
गृणतः	कहने वालेके	**हृदि**	हृदयमें
हृदि	हृदयमें	**विशते**	प्रवेश करते हैं ॥४॥

प्रविष्टः कर्णरन्ध्रेण स्वानां भावसरोरुहम् ।
धुनोति शमलं कृष्णः सलिलस्य यथा शरत् ॥५॥

प्रविष्टः कर्ण रन्ध्रेण स्वानां भाव सरोरुहं धुनोति शमलं कृष्णः सलिलस्य यथा शरत् ॥५॥

स्वानां	अपने जनोंके	**कर्णरन्ध्रेण**	कानोंके छिद्रसे
भावसरोरुहं	भाव (हृदय) कमलमें	**प्रविष्टः**	प्रवेश करके
		कृष्णः	श्रीकृष्ण

शमलं	मनोमलको	यथा	जैसे
धुनोति	(वैसे ही) नष्ट कर देते हैं	सलिलस्य	पानीके (मलको)
		शरत्	शरदृतु ॥५॥

धौतात्मा पुरुषः कृष्णपादमूलं न मुञ्चति ।
मुक्तसर्वपरिक्लेशः पान्थः स्वशरणं यथा ॥६॥

धौतात्मा पुरुषः कृष्ण पादमूलं न मुञ्चति मुक्त सर्व परिक्लेशः पान्थः स्वशरणं यथा ॥६॥

यथा	जैसे	सर्व परिक्लेशः	सब चारों ओरसे आते क्लेशोंसे
पान्थः	यात्री		
स्वशरणं	अपने आश्रयको (नहीं छोड़ता)	मुक्तः	छूटकर
		कृष्ण	श्रीकृष्णके
धौतात्मा	निर्मल हुए चित्तवाला	पादमूलं	चरणोंको
पुरुषः	पुरुष	न	नहीं
		मुञ्चति	छोड़ता ॥६॥

यदधातुमतो ब्रह्मन् देहारम्भोऽस्य धातुभिः ।
यदृच्छया हेतुना वा भवन्तो जानते यथा ॥७॥

यत् अधातुमतः ब्रह्मन् देहारम्भः अस्य धातुभिः यदृच्छया हेतुना वा भवन्तः जानते यथा ॥७॥

ब्रह्मन्	ब्रह्मन् !		होता है,
यत्	क्योंकि (यह जीव)	वा	अथवा
अधातुमतः	पञ्चमहाभूतोंके सम्बन्धसे रहित	हेतुना	किसी कारणसे होता है,
अस्य	इसके	यथा	(इस विषयमें) जैसा है
देहारम्भः	शरीरका प्रारम्भ		
धातुभिः	पञ्चमहाभूतोंसे होता है,	भवन्तः	आप
		जानते	जानते हैं ॥७॥
यदृच्छया	(यह) अकस्मात्		

आसीद् यदुदरात् पद्मं लोकसंस्थानलक्षणम् ।
यावानयं वै पुरुष इयत्तावयवैः पृथक् ।
तावानसाविति प्रोक्तः संस्थावयववानिव ॥८॥

आसीत् यत् उदरात् पद्मं लोकसंस्थान लक्षणं यावान् अयं वै पुरुषः इयत्ता अवयवैः पृथक् तावान् असौ इति प्रोक्तः संस्था अवयवान् इव ॥८॥

यत्	जिनके	अवयवैः	अंगोंके होनेसे
उदरात्	पेट (नाभि) से	वै	निश्चय
लोकसंस्थान	लोकोंकी सृष्टि	इयत्ता	सीमावाला है,
लक्षणं	लक्षणवाला (जिससे सृष्टि हुई)	यावान्	जितना है,
		तावान्	उतना ही
पद्मं	(वह) कमल	अवयवान इव	अंगोंवालेकी भाँति
आसीत्	उत्पन्न हुआ	असौ संस्था	इसका भी स्वरूप
अयं	(यह)	इति प्रोक्तः	इस प्रकार कहा गया है ॥८॥
पुरुषः	पुरुष (व्यक्ति)		
पृथक्	अलग-अलग		

अजः सृजति भूतानि भूतात्मा यदनुग्रहात् ।
ददृशे येन तद्रूपं नाभिपद्मसमुद्भवः ॥९॥

अजः सृजति भूतानि भूतात्मा यत् अनुग्रहात् ददृशे येन तत् रूपं नाभिपद्म समुद्भवः ॥९॥

यत्	जिनके	येन	जिनके (अनुग्रह) से
अनुग्रहात्	अनुग्रहसे	नाभिपद्म	नाभि कमलसे
भूतात्मा	सर्वभूतमय	समुद्भवः	उत्पन्न होनेवाले
अजः	ब्रह्माजी	तत्	उनके
भूतानि	प्राणियोंकी	रूपं	रूपको
सृजति	सृष्टि करते हैं,	ददृशे	देख सके ॥९॥

स चापि यत्र पुरुषो विश्वस्थित्युद्भवाप्ययः ।
मुक्त्वाऽऽत्ममायां मायेशः शेते सर्वगुहाशयः ॥१०॥

स च अपि यत्र पुरुषः विश्व स्थिति उद्भव अप्ययः मुक्त्वा आत्ममायां मायेशः शेते सर्व गुहाशयः ॥१०॥

विश्व	संसारकी	पुरुषः	पुरुष
उद्भव	सृष्टि,	अपि	भी
स्थिति	स्थिति,	यत्र	जहाँ
अप्ययः	प्रलयको	च	भी
मुक्त्वा	त्यागकर	मायेशः	मायाका स्वामी
सर्व	सबके	आत्ममायां	अपनी मायामें
गुहाशयः	हृदय गुहामें रहनेवाला	शेते	सोता है (वह स्थान बतलावें) ॥१०॥
स	वह		

पुरुषावयवैर्लोकाः सपालाः पूर्वकल्पिताः ।
लोकैरमुष्यावयवाः सपालैरिति शुश्रुम ॥११॥

पुरुषाः अवयवैः लोकाः सपालाः पूर्व कल्पिताः लोकैः अमुष्य अवयवाः सपालैः इति शुश्रुम ॥११॥

पुरुषाः	पुरुषके	अमुष्य	इस (विराट् पुरुष)के
अवयवैः	अंगोंसे	अवयवाः	अंग (कल्पित किये गये),
लोकाः	सब लोक		
सपालाः	लोकपालों सहित	इति	इस प्रकार (दोनों बातें)
पूर्व	पहिले		
कल्पिताः	कल्पित किये गये,	शुश्रुम	(मैंने आपसे) सुनी (इसका क्या तात्पर्य है) ॥११॥
सपालैः	लोकपालों सहित		
लोकैः	लोकोंसे		

यावान् कल्पो विकल्पो वा यथा कालोऽनुमीयते ।
भूतभव्यभवच्छब्द आयुर्मानं च यत् सतः ॥१२॥

यावान् कल्पः विकल्पः वा यथा कालः अनुमीयते भूत भव्य भवत् शब्द आयुः मानं च यत् सतः ॥१२॥

यावान्	जितना (बड़ा)	भव्य	भविष्य
कल्पः	महाकल्प	शब्द	ये नाम (जिस आधारपर रखे जाते हैं)।
वा	अथवा	च	तथा
विकल्पः	(उसके) अवान्तर कल्प (होते हैं,)	यत्	जो
यथा	जैसे	सतः	शरीरधारी हैं
कालः	समयका	आयुः	(उनकी) आयुका
अनुमीयते	अनुमान किया जाता है,	मानं	परिमाण (क्या है ?) ॥१२॥
भूत	भूत		
भवत्	वर्तमान		

कालस्यानुगतिर्या तु लक्ष्यतेऽण्वी बृहत्यपि ।
यावत्यः कर्मगतयो यादृशीर्द्विजसत्तम ॥१३॥

कालस्य अनुगतिः या तु लक्ष्यते अण्वी बृहत् अपि यावत्यः कर्मगतयः यादृशीः द्विजसत्तम ॥१३॥

द्विजसत्तम	द्विजोत्तम !		गति है,
कालस्य	कालकी	यावत्यः	जितनी
या तु	जो भी	यादृशीः	जिस प्रकारकी
अण्वी	सूक्ष्म (क्षणादि),	कर्मगतयः	कर्मसे प्राप्त होनेवाली गतियाँ
बृहत्	बड़ी	लक्ष्यते	जान पड़ती हैं ॥१३॥
अपि	भी (वर्षादि)		
अनुगतिः	बराबर चलनेवाली		

यस्मिन् कर्मसमावायो यथा येनोपगृह्यते ।
गुणानां गुणिनां चैव परिणाममभीप्सताम् ॥१४॥

यस्मिन् कर्म समावायः यथा येन उपगृह्यते गुणानां गुणिनां च एष परिणामं अभीप्सताम् ॥१४॥

गुणानां	(सत्त्व, रज, तम) गुणोंके	गुणिनां	(इन) गुणोंवालोंके
		च	भी

परिणामं	फलको	येन	जिनके द्वारा
अभीप्सतां	चाहते हुए	उपगृह्यते	(वे कर्म) ग्रहण किये
एव	ही		जाते हैं (किस
यस्मिन्	जिस		इच्छासे, कैसा
कर्म	कर्म		अधिकारी, किस
समावायः	विस्तारमें		विधिसे, कौनसा कर्म
यथा	जैसे		करता है ?) ॥१४॥

भूपातालककुब्व्योमग्रहनक्षत्रभूभृताम् ।
सरित्समुद्रद्वीपानां सम्भवश्चैतदोकसाम् ॥१५॥

भू पाताल ककुब् व्योम ग्रह नक्षत्र भूभृतां सरित् समुद्र द्वीपानां सम्भवः च एतत् ओकसाम् ॥१५॥

भू	पृथ्वी,	सरित्	नदियों,
पाताल	पाताल	समुद्र	समुद्र,
	(नीचेके लोक),	द्वीपानां	द्वीपोंकी,
ककुब्	दिशाएँ,	च	तथा
व्योम	आकाश,	एतत्	इनमें
ग्रह	ग्रह,	ओकसां	रहनेवालोंकी
नक्षत्र	नक्षत्र,	सम्भवः	उत्पत्ति (कैसे
भूभृतां	पर्वतोंकी,		हुई ?) ॥१५॥

प्रमाणमण्डकोशस्य बाह्याभ्यन्तरभेदतः ।
महतां चानुचरितं वर्णाश्रमविनिश्चयः ॥१६॥

प्रमाणं अण्डकोशस्य बाह्य अभ्यन्तर भेदतः महतां च अनुचरितं वर्ण आश्रम विनिश्चयः ॥१६॥

अण्डकोशस्य	ब्रह्माण्डका	वर्ण	(चारों ब्राह्मणादि)
बाह्य	बाहरी		वर्ण
अभ्यन्तर	भीतरके	आश्रम	(ब्रह्मचर्यादि)
भेदतः	भेदसे		आश्रमोंका
प्रमाणं	प्रमाण (विस्तार),		

विनिश्चयः	ठीक ठीक निर्णय (तथा)		पुरुषोंका
च महतां	और महान	**अनुचरितं**	चरित (सुनाइये) ॥१६॥

युगानि युगमानं च धर्मो यश्च युगे युगे ।
अवतारानुचरितं यदाश्चर्यतमं हरेः ॥१७॥

युगानि युगधर्मं च धर्मः यः च युगे युगे अवतार अनुचरितं यत् आश्चर्यतमं हरेः ॥१७॥

युगानि	युगोंका	**हरेः**	श्रीहरिके
च युगधर्मानि	तथा (उन) युगोंके धर्मोंका और	**यत्**	जो
		आश्चर्यतमं	अत्यन्त आश्चर्यजनक
यः	जो	**अवतार**	अवतारोंकी
च	भी	**अनुचरितं**	(युग युगमें) लीलाएँ
धर्मः	धर्म		हुईं ॥१७॥
युगे युगे	(उन उन) युगोंमें होते हैं,		

नृणां साधारणो धर्मः सविशेषश्च यादृशः ।
श्रेणीनां राजर्षीणां च धर्मः कृच्छ्रेषु जीवताम् ॥१८॥

नृणां साधरणः धर्मः सविशेषः च यादृशः श्रेणीनां राजर्षीणां च धर्मः कृच्छ्रेषु जीवताम् ॥१८॥

नृणां	मनुष्योंका	**श्रेणीनां**	(विभिन्न) वर्गों (व्यवसायमें लगे) लोगोंका
साधारणः	साधारण		
धर्मः	धर्म		
च	और	**राजर्षीणां**	राजर्षियोंका
यादृशः	जैसा	**च कृच्छ्रेषु**	तथा आपत्तिमें
सविशेषः	विशेष (धर्म होता है),	**जीवतां**	रहनेवालोंका (आपद्)
		धर्मः	धर्म (बतलाइये) ॥१८॥

तत्त्वानां परिसंख्यानं लक्षणं हेतुलक्षणम् ।
पुरुषाराधनविधिर्योगस्याध्यात्मिकस्य च ॥१९॥

तत्त्वानां परिसंख्यानं लक्षणं हेतु लक्षणं पुरुषः आराधन विधिः योगस्य आध्यात्मिकस्य च ॥१९॥

तत्त्वानां	(सृष्टिके) तत्त्वोंकी	आराधनविधिः	आराधनाकी विधि
परिसंख्यानं	गणना,	च	तथा
लक्षणं	(उनका) लक्षण,	आध्यात्मिकस्य	आध्यात्मिक
हेतु लक्षणं	उस लक्षणका कारण,	योगस्य	योगकी (विधि
पुरुषः	परम पुरुषकी		बतलाइये) ॥१९॥

योगेश्वरैश्वर्यगतिर्लिङ्गभङ्गस्तु योगिनाम् ।
वेदोपवेदधर्माणामितिहासपुराणयोः ॥२०॥

योगेश्वरः ऐश्वर्य गतिः लिङ्ग भङ्ग तु योगिनां वेद उपवेद धर्माणां इतिहास पुराणयोः ॥२०॥

योगेश्वरः	योगेश्वरोंके	वेद	वेद,
ऐश्वर्य	ऐश्वर्यका	उपवेद	उपवेद,
गतिः	स्वरूप	इतिहास	इतिहास,
तु	तथा	पुराणयोः	पुराणोंके (वर्णित)
योगिनां	योगियोंका	धर्माणां	धर्मोंका (स्वरूप
लिङ्ग भङ्ग	लिङ्ग देह नष्ट होना (मोक्ष)		बतलावें) ॥२०॥

सम्प्लवः सर्वभूतानां विक्रमः प्रतिसंक्रमः ।
इष्टापूर्तस्य काम्यानां त्रिवर्गस्य च यो विधिः ॥२१॥

सम्प्लवः सर्वभूतानां विक्रमः प्रतिसंक्रमः इष्ट आपूर्तस्य काम्यानां त्रिवर्गस्य च यः विधिः ॥२१॥

सर्वभूतानां	सब प्राणियोंकी	सम्प्लवः	प्रलय,
प्रतिसंक्रमः	उत्पत्ति,	इष्ट	देवतादिके लिए
विक्रमः	पराक्रम (स्थिति)		होनेवाले यज्ञादि

आपूर्तस्य	समाजके लाभके लिए किये जानेवाले कूप सरोवरादि बनवाना,	त्रिवर्गस्य	अर्थ, धर्म, काम (प्राप्त करने तथा सेवनकी)
काम्यानां	सकाम कर्मोंकी	यः	जो
च	और	विधिः	विधि है। (वह सुनाइये) ॥२१॥

यश्चानुशायिनां सर्गः पाखण्डस्य च सम्भवः ।
आत्मनो बन्धमोक्षौ च व्यवस्थानं स्वरूपतः ॥२२॥

यः च अनुशायिनां सर्गः पाखण्डस्य च सम्भवः आत्मनः बन्ध मोक्षौ च व्यवस्थानं स्वरूपतः ॥२२॥

यः	जो	च	ही (कैसे होती है) ?
अनुशायिनां	(प्रलयके समय) प्रकृतिमें लीन रहने वाले (जीवों) की	आत्मानः	आत्माका
		बन्ध	बन्धन,
सर्गः	सृष्टि है (वह कैसे होती है) ?	मोक्षौ	मोक्ष
		च	तथा
च	तथा	स्वरूपतः	अपने स्वरूपमें
पाखण्डस्य	पाखण्डकी	व्यवस्थानं	स्थिति (का स्वरूप क्या है ?) ॥२२॥
सम्भवः	उत्पत्ति		

यथाऽऽत्मतन्त्रो भगवान् विक्रीडत्यात्ममायया ।
विसृज्य वा यथा मायामुदास्ते साक्षिवद् विभुः ॥२३॥

यथा आत्मतन्त्राः भगवान् विक्रीडति आत्ममायया विसृज्य वा यथा मायां उदास्ते साक्षिवत् विभुः ॥२३॥

आत्मतन्त्रः	स्वतन्त्र	वा	अथवा
भगवान्	भगवान्	यथा	जैसे
यथा	जैसे	मायां	मायाको
आत्ममायया	अपनी मायासे	विसृज्य	छोड़कर
विक्रीडति	खेलते हैं	विभुः	(वे) सर्वव्यापक

साक्षिवत्	साक्षीके समान (तटस्थ)*	उदास्ते	उदासीन हो जाते हैं ॥२३॥

सर्वमेतच्च भगवन् पृच्छते मेऽनुपूर्वशः ।
तत्त्वतोऽर्हस्युदाहर्तुं प्रपन्नाय महामुने ॥२४॥

सर्वं एतत् च भगवन् पृच्छते मे अनुपूर्वशः तत्त्वतः अर्हसि उदाहर्तुं प्रपन्नाय महामुने ॥२४॥

भगवन्	भगवन् !	सर्वं	सब
महामुने	महामुनि !	च	ही (प्रश्नोंका)
मे	मुझ	अनुपूर्वशः	क्रमशः
प्रपन्नाय	शरणागतके	तत्त्वतः	वास्तविक
पृच्छते	पूछे हुए	उदाहर्तुं	उत्तर देना (आपको)
एतत्	इन	अर्हसि	चाहिए ॥२४॥

अत्र प्रमाणं हि भवान् परमेष्ठी यथाऽऽत्मभूः ।
परे चेहानुतिष्ठन्ति पूर्वेषां पूर्वजैः कृतम् ॥२५॥

अत्र प्रमाणं हि भवान् परमेष्ठी यथा आत्मभूः परे च इह अनुतिष्ठन्ति पूर्वेषां पूर्वजैः कृतम् ॥२५॥

अत्र	इस विषयमें	इह	इस लोकमें
भवान्	आप	पूर्वेषां	पहिलेके
यथा	जैसे	पूर्वजैः	पूर्वजोंके
परमेष्ठी	लोकस्रष्टा	कृतं	कृत्योंका
आत्मभूः	ब्रह्माजी हैं (वैसे)	अनुतिष्ठन्ति	अनुकरण करते हैं
प्रमाणं	प्रमाण हैं (सर्वज्ञ हैं),		(उनका अपना कोई
हि	क्योंकि		अनुभव नहीं
परे	दूसरे		होता) ॥२५॥
च	तो		

न मेऽसवः परायन्ति ब्रह्मन्ननशनादमी ।
पिबतोऽच्युतपीयूषमन्यत्र कुपिताद् द्विजात् ॥२६॥

---

* 'साक्षिवत्' इसलिए क्योंकि तब कोई साक्ष्यदृश्य होता ही नहीं ।

न मे असवः परायन्ति ब्रह्मन् अनशनात् अभी पिबतः अच्युत पीयूषं अन्यत्र कुपितात् द्विजात् ॥२६॥

ब्रह्मन्	ब्रह्मन् !	**अन्यत्र**	छोड़कर
अच्युत	भगवान्‌की (कथाके)	**अभी**	इस
पीयूषं	अमृतको	**अनशनात्**	अनशनसे
पिबतः	पीते हुए	**न**	नहीं
मे	मेरे	**परायन्ति**	निकल सकते (अतः आप मेरी चिन्ता छोड़ दें।) ॥२६॥
असवः	प्राण		
कुपितात्	क्रुद्ध हुए		
द्विजात्	ब्राह्मणके (शापको)		

सूत उवाच–

स उपामन्त्रितो राज्ञा कथायामिति सत्पतेः ।
ब्रह्मरातो भृशं प्रीतो विष्णुरातेन संसदि ॥२७॥

सः उपामन्त्रितः राज्ञा कथायां इति सत्पते ब्रह्मरातः भृशं प्रीतः विष्णुरातेन संसदि ॥२७॥

इति	इस प्रकार	**कथायां**	कथाके लिए
राज्ञाः	राजा	**उपामन्त्रितः**	प्रार्थना किये जानेपर
विष्णुरातेन	परीक्षित द्वारा	**सः**	वे
संसदि	(ऋषियोंकी) सभामें	**ब्रह्मरातः**	शुकदेवजी
सत्पते	सत्पुरुषोंके नाथ (भगवान) की	**भृशं**	अत्यन्त
		प्रीतः	प्रसन्न हुए ॥२७॥

प्राह भागवतं नाम पुराणं ब्रह्मसम्मितम् ।
ब्रह्मणे भगवत्प्रोक्तं ब्रह्मकल्प उपागते ॥२८॥

प्राह भागवतं नाम पुराणं ब्रह्मसम्मितं ब्रह्मणे भगवत् उक्तं ब्रह्मकल्प उपागते ॥२८॥

ब्रह्मकल्प	ब्रह्म (नामक प्रथम) कल्प	**उपागते**	आनेपर
		भगवत्	भगवानके द्वारा

ब्रह्मणे	ब्रह्माको	भागवतं नाम	भागवत नामक
उक्तं	कहा गया	पुराणं	पुराण
ब्रह्मसम्मितं	वेदतुल्य	प्राह	सुनाया ॥२८॥

यद् यत् परीक्षिदृषभः पाण्डूनामनुपृच्छति ।
आनुपूर्व्येण तत्सर्वमाख्यातुमुपचक्रमे ॥२९॥

यत् यत् परीक्षित् ऋषभः पाण्डुनां अनुपृच्छति आनुपूर्व्येण तत् सर्वं आख्यातुं उपचक्रमे ॥२९॥

पाण्डुनां	पाण्डुके वंशमें	तत्	उस
ऋषभः	श्रेष्ठ	सर्वं	सबका
परीक्षित्	परीक्षितने	आनुपूर्व्येण	क्रमशः
यत् यत्	जो जो	आख्यातुं	कहना
अनुपृच्छति	क्रमशः पूछा था	उपचक्रमे	प्रारम्भ किया ॥२९॥

इति श्रीमद्भागवते महापुराणे वैयासिक्यां पारमहंस्यां
संहितायां द्वितीयस्कन्धे अष्टमोऽध्यायः

अथ नवमोऽध्यायः

श्रीशुक उवाच-

आत्ममायामृते राजन् परस्यानुभवात्मनः ।
न घटेतार्थसम्बन्धः स्वप्नद्रष्टुरिवाञ्जसा ॥१॥

आत्ममायां ऋते राजन् परस्य अनुभवात्मनः न घटेत अर्थ सम्बन्धः स्वप्न द्रष्टुः इव अञ्जसा ॥१॥

राजन्	राजन् !	**ऋते**	छोड़कर
स्वप्न	स्वप्नको	**अञ्जसा**	सरलतासे
द्रष्टुः	दे ने वालेसे	**अर्थ**	(दृश्य) पदार्थोंसे
इव	की भाँति	**सम्बन्धः**	सम्बन्ध
अनुभवात्मनः	अनुभव स्वरूप	**न**	नहीं
परस्य	परमात्माका	**घटेत**	बन सकता ॥१॥
आत्ममायां	अपनी मायाको		

बहुरूप इवाभाति मायया बहुरूपया ।
रममाणो गुणेष्वस्या ममाहमिति मन्यते ॥२॥

बहुरूप इव आभाति मायया बहुरूपया रममाणः गुणेषु अस्या मम अहं इति मन्यते ॥२॥

बहुरूपया	बहुत रूपवाली	**अस्या**	इस (माया) के
मायया	मायाके साथ	**गुणेषु**	गुणोंमें
रममाणः	खेलता हुआ	**मम**	मेरा (और)
बहुरूपया	अनेक रूपवाली	**अहं**	मैं
इव	की भाँति	**इति**	ऐसा
आभाति	जान पड़ता है	**मन्यते**	मान लेता है ॥२॥

यर्हि वाव महिम्नि स्वे परस्मिन् कालमाययोः ।
रमेत गतसम्मोहस्त्यक्त्वोदास्ते तदोभयम् ॥३॥

यर्हि वाव महिम्नि स्वे पर अस्मिन् काल मायया: रमेत गत सम्मोहः त्यक्त्वा उदास्ते तदा उभयम् ॥३॥

यर्हि	जब	**वाव**	ही
अस्मिन्	इन	**रमेत्**	रमण करता है,
काल	(क्षुब्ध करनेवाले) काल	**सम्मोहः**	सम्मोहसे
		गत	छूटकर
मायया:	(मोहित करनेवाली) मायासे	**तदा**	तब
		उभयं	दोनों (मैं-मेरा) को
पर	परे	**त्यक्त्वा**	त्यागकर
स्वे	अपनी	**उदास्ते**	उदासीन हो जाता है ॥३॥
महिम्नि	महिमा (स्वरूप) में		

आत्मतत्त्वविशुद्ध्यर्थं यदाह भगवानृतम् ।
ब्रह्मणे दर्शयन् रूपमव्यलीकव्रतादृतः ॥४॥

आत्मतत्त्व विशुद्धि अर्थं यत् आह भगवान् ऋतं ब्रह्मणे दर्शयन् रूपं अव्यलीक व्रत आदृतः ॥४॥

अव्यलीक	निष्कपट	**आत्मतत्त्व**	आत्मतत्त्वके
व्रत	व्रत (तप) से	**विशुद्धि**	शुद्धिके (ज्ञानके)
आदृतः	सम्मानित	**अर्थं**	लिए
भगवान्	भगवान्ने	**ऋतं**	सत्य (तत्त्व) का
ब्रह्मणे	ब्रह्माको	**आह**	वर्णन किया था (वह मैं तुमसे कह रहा हूँ ।) ॥४॥
रूपं	अपने स्वरूपका		
दर्शयन्	दर्शन देते समय		
यत्	जो		

स आदिदेवो जगतां परो गुरुः
स्वधिष्ण्यमास्थाय सिसृक्षयैक्षत ।

तां नाध्यगच्छद् दृशमत्र सम्मतां
प्रपञ्चनिर्माणविधिर्यया भवेत् ॥५॥

स आदिदेवः जगतां परः गुरुः स्वधिष्ण्यं आस्थाय सिसृक्षये ऐक्षत तां न अध्यगच्छत् दृशं अत्र सम्मतां प्रपञ्च निर्माण विधिः यया भवेत् ॥५॥

स	वे	यया	जिससे
जगतां	संसारके	प्रपञ्च निर्माण	संसारकी रचनाकी
परः	परम	विधिः	प्रक्रिया
गुरुः	गुरु	भवेत्	सम्पन्न हो,
आदिदेवः	आदिदेव (ब्रह्माजी)	अत्र	इस
स्वधिष्ण्यं	अपने स्थान (कमल) पर	सम्मतां	विषयकी
		तां	उस
आस्थाय	बैठकर	दृशं	दृष्टि (बुद्धि-सूझ)
सिसृक्षये	सृष्टि करनेके लिए	न	नहीं
ऐक्षत	विचार करने लगे	अध्यगच्छत	प्राप्त कर सके ॥५॥

स चिन्तयन् द्व्यक्षरमेकदाम्भ-
स्युपाश्रृणोद् द्विर्गदितं वचो विभुः ।
स्पर्शेषु यत्षोडशमेकविंशं
निष्किञ्चनानां नृप यद् धनं विदुः ॥६॥

स चिन्तयन् द्वय अक्षरं एकदा अम्भसि उपाश्रृणोत् द्विः गदितं वचः विभुः स्पर्शेषु यत् षोडशं एकविंशं निष्किञ्चनानां नृप यत् धनं विदुः ॥६॥

एकदा	एकबार	वचः	वाणीसे
स	वे ब्रह्माजी	द्विः	दो बार
चिन्तयन्	विचार कर ही रहे थे कि	गदितं	बोले गये
		द्वय	दो
अम्भसि	(प्रलय समुद्रके) जलमें	अक्षरं	अक्षरोंको
		उपाश्रृणोत्	पास ही सुना
विभुः	सर्वव्यापक भगवानकी	नृप	राजन् !
		स्पर्शेषुयत्	व्यञ्जनाक्षरोंमें जो

षोडश	सोलहवाँ (त) और	निष्किञ्चनानां	सर्वस्व त्यागियोंका
एकविंश	इक्कीसवाँ (प) है	धनं	धन
यत्	जो	विदुः	जाना जाता है ॥६॥

निशम्य तद्वक्तृदिदृक्षया दिशो
विलोक्य तत्रान्यदपश्यमानः ।
स्वधिष्ण्यमास्थाय विमृश्य तद्धितं
तपस्युपादिष्ट इवादधे मनः ॥७॥

निशम्य तद् वक्तृ दिदृक्षया दिशः विलोक्य तत्र अन्यत् अपश्यमानः स्वधिष्ण्यं आस्थाय विमृश्य तत् हितं तपसि उपादिष्टः इव आदधे मनः ॥७॥

निशम्य	(उस वाणीको) सुनकर	आस्थाय	(स्थिर) बैठकर
		विमृश्य	विचार करके
तद्	उस	तपसि	तपस्या करनेके लिए
वक्तृ	बोलनेवालेको	उपादिष्टः	(मुझे) उपदेश किया गया हैं,
दिदृक्षया	देखनेकी इच्छासे		
दिशः	दिशाओंको	इव	यह समझकर
विलोक्य	देखकर,	तत्	उस
तत्र	वहाँ	हितं	(अपने) हितमें (तपमें)
अन्यत्	दूसरे किसीको		
अपश्यमानः	न देखकर,	मनः	मनको
स्वधिष्ण्यं	अपने स्थानपर	आदधे	लगाया ॥७॥

दिव्यं सहस्राब्दममोघदर्शनो
जितानिलात्मा विजितोभयेन्द्रियः ।
अतप्यत स्माखिललोकतापनं
तपस्तपीयांस्तपतां समाहितः ॥८॥

दिव्यं सहस्र अब्दं अमोघ दर्शनः जित अनिल आत्मा विजित उभय इन्द्रियः अतप्यत स्म अखिल लोक तापनं तपः तपीयान् तपतां समाहितः ॥८॥

असोध	अव्यर्थ	जित् आत्मा	मनको जीतकर
दर्शनः	ज्ञानवाले	उभय इन्द्रियः	कर्मेन्द्रिय ज्ञानेन्द्रिय दोनोंको
तपतां	तपस्या करने वालोंमें	विजित	वशमें करके,
तपीयान्	सर्वश्रेष्ठ तपस्वी (ब्रह्माजीने)	समाहितः	एकाग्र होकर,
दिव्यं	देवताओंके	अखिल लोक	सब लोकोंको
सहस्र	एक सहस्र	तापनं	प्रकाशित करनेमें सक्षम
अब्दं	वर्षतक	तपः	तप
अनिलः	श्वासको तथा	अतप्यतस्म	किया ॥८॥

तस्मै स्वलोकं भगवान् सभाजितः
सन्दर्शयामास परं न यत्परम् ।
व्यपेतसंक्लेशविमोहसाध्वसं
स्वदृष्टवद्भिर्विबुधैरभिष्टुतम् ॥९॥

तस्मै स्वलोकं भगवान् सभाजितः सन्दर्शयामास परं न यत् परं व्यपेत संक्लेश विमोह साध्वसं स्वदृष्टवद्भिः विबुधैः अभिष्टुतम् ॥९॥

सभाजितः	(ब्रह्माजीके तपसे) सत्कृत	विमोह	मोह,
भगवान्	भगवानने	साध्वसं	भयसे,
तस्मै	उनको	व्यपेत	रहित
स्वलोकं	अपनालोक	परं	परम (लोक) को
सन्दर्शयामास	दिखलाया	स्वदृष्टवद्भिः	जिन्होंने स्वयं देखा है
यत्	जिससे	विबुधैः	(उन नित्य) देवताओं द्वारा
परं	परे		
न	कोई (लोक) नहीं है,	अभिष्टुतं	उस (लोक) की स्तुति होती है ॥९॥
संक्लेश	क्लेश		

प्रवर्तते यत्र रजस्तमस्तयोः
सत्त्वं च मिश्रं न च कालविक्रमः ।

न यत्र माया किमुतापरे हरे-
रनुव्रता यत्र सुरासुरार्चिताः ॥१०॥

प्रवर्तते यत्र रजः तमः तयोः सत्त्वं च मिश्रं न च काल विक्रमः न यत्र माया किमुत अपरे हरेः अनुव्रता यत्र सुर असुर अर्चिताः ॥१०॥

यत्र	जहाँ	यत्र	जहाँ
रजः	रजोगुण,	माया	माया ही नहीं
तमः	तमोगुण (तथा)		पहुँचती (वहाँ)
तयोः	इन दोनोंसे	अपरे	दूसरे (मायाके द्वारा
मिश्रं	मिश्रित		उत्पन्न)
सत्त्वं	सत्त्वगुण	किमुत	कैसे जा सकते हैं ।
च	भी	यत्र	जहाँ
न	नहीं	सुर-असुर	देव-दैत्य (सबसे)
प्रवर्तते	प्रवृत्त होता,	अर्चिताः	पूजित
काल	कालका	हरेः	श्रीहरिके
विक्रमः	पराक्रम	अनुव्रताः	पार्षद (निवास
च	भी		करते) हैं ॥१०॥
न	(वहाँ) नहीं है ।		

श्यामावदाताः शतपत्रलोचनाः
पिशङ्गवस्त्राः सुरुचः सुपेशसः ।
सर्वे चतुर्बाहव उन्मिषन्मणि-
प्रवेकनिष्काभरणाः सुवर्चसः ।
प्रवालवैदूर्यमृणालवर्चसः
परिस्फुरत्कुण्डलमौलिमालिनः ॥११॥

श्याम अवदाताः शतपत्र लोचनाः पिशङ्गवस्त्राः सुरुचः सुपेशसः सर्वे चतुर्बाहव उन्मिषत् मणि प्रवेक निष्क आभरणाः सुवर्चसः प्रवाल वैदूर्य मृणाल वर्चसः परिस्फुरत् कुण्डल मौलि मालिनः ॥११॥

सर्वे	सब	श्याम	श्यामवर्णके
अवदाताः	उज्वल	शतपत्र	कमल (केसमान)

लोचनाः	नेत्रोंवाले	प्रवाल	मूँगे,
पिशङ्ग वस्त्राः	पीले वस्त्रवाले,	वैदूर्य	बैदूर्य (लहसनिया),
सुरुचः	सुन्दर,	मृणाल	कमलनाल
सुपेशसः	सुकुमार,		(केसमान)
सुवर्चसः	उत्तम कान्तियुक्त,	वर्चसः	कान्तिवाले,
चतुर्बाहव	चतुर्भुज	परिस्फुरत्	दमकते
उन्मिषत्	चमकती	कुण्डल	कुण्डल (पहिने),
मणि	मणियोंसे	मौलि	सिरोंपर
प्रवेक	जड़े हुए	मालिनः	मालाएँ पहिने
निष्क	स्वर्णके		थे ॥११॥
आभरणाः	आभूषणधारी,		

भ्राजिष्णुभिर्यः परितो विराजते
लसद्विमानावलिभिर्महात्मनाम् ।
विद्योतमानः प्रमदोत्तमाद्युभिः
सविद्युदभ्रावलिभिर्यथा नभः ॥१२॥

भ्राजिष्णुभिः यः परितः विराजते लसत् विमानावलिभिः महात्मनां विद्योतमानः प्रमदोत्तमा द्युभिः सविद्युत् अभ्रवलिभिः यथा नभः ॥१२॥

यथा	जैसे	द्युभिः	कान्तिसे युक्त,
नभः	आकाश	महात्मनां	उन महात्माओंके
सविद्युत	बिजलीके साथ	लसत	सुशोभित
अभ्रावलिभिः	मेघमालासे	भ्राजिष्णुभिः	तेजोमय
	(वैसे ही)	विमानावलिभिः	विमानोंके समूहोंसे
यः	जो (लोक)	परितः	चारों ओरसे
विद्योतमानः	प्रकाश करती हुई	विराजते	अत्यन्त शोभित हो
प्रमदोत्मामाः	श्रेष्ठ महिलाओंकी		रहा है ॥१२॥

श्रीर्यत्र रूपिण्युरुगायपादयोः
करोति मानं बहुधा विभूतिभिः ।

प्रेङ्खं श्रिता या कुसुमाकरानुगै-
र्विगीयमाना प्रियकर्म गायती ॥१३॥

श्रीः यत्र रूपिणी उरुगाय पादयोः करोति मानं बहुधा विभूतिभिः प्रेङ्खं श्रिताः या कुसुमाकरानुगैः विगीयमाना प्रियकर्म गायती ॥१३॥

यत्र	जहाँ	**श्रिताः या**	बैठकर (वे जब)
रूपिणि	साकार होकर	**प्रियकर्म**	अपने प्रियतमकी लीलाओंका
श्रीः	लक्ष्मीजी	**गायती**	गान करने लगती हैं (तब)
उरुगाय	अनन्त कीर्ति (भगवान) के	**कुसुमाकरानुगैः**	भौंरोंके द्वारा
पादयोः	चरणोंका	**विगीयमाना**	(उनका ही यश) गाया जाता है (भ्रमर उनके समीप गुंजार करने लगते हैं) ॥१३॥
बहुधा	अनेक प्रकारकी		
विभूतिभिः	विभूतियोंसे		
मानं	सम्मान (अर्चन)		
करोति	करती हैं,		
प्रेङ्खं	झूलेपर		

ददर्श तत्राखिलसात्वतां पतिं
श्रियः पतिं यज्ञपतिं जगत्पतिम् ।
सुनन्दनन्दप्रबलार्हणादिभिः
स्वपार्षदमुख्यैः परिसेवितं विभुम् ॥१४॥

ददर्श तत्र अखिल सात्वतां पतिं श्रियः पतिं यज्ञपतिं जगत्पतिं सुनन्द नन्द प्रबल अर्हणादिभिः स्वपार्षद मुख्यैः परिसेवितं विभुम् ॥१४॥

तत्र	उस लोकमें	**मुख्यैः**	प्रमुखोंसे
सुनन्द	सुनन्द,	**परिसेवितं**	चारों ओरसे सेवा किये जाते,
नन्द	नन्द,	**विभुं**	(उन) सर्वव्यापक
प्रबल	प्रबल,	**अखिल**	समस्त
अर्हणादिभिः	अर्हण आदि	**सात्वतांपतिं**	भक्तोंके स्वामी
स्वपार्षद	अपने पार्षद		

श्रियः पतिं	रमानाथ	ददर्श	(ब्रह्माने)
यज्ञपतिं	यज्ञेश्वर		देखा ॥१४॥
जगत्पतिं	जगन्नाथको		

भृत्यप्रसादाभिमुखं दृगासवं
प्रसन्नहासारुणलोचनाननम् ।
किरीटिनं कुण्डलिनं चतुर्भुजं
पीताम्बरं वक्षसि लक्षितं श्रिया ॥१५॥

भृत्य प्रसाद अभिमुखं दृक् आसवं प्रसन्नहास अरुण लोचन आननं किरीटिनं कुण्डलिनं चतुर्भुजं पीताम्बरं वक्षसि लक्षितं श्रिया ॥१५॥

भृत्य	सेवकोंपर	आननं	मुख,
प्रसाद	कृपा करनेको	किरीटिनं	मुकुटधारी,
अभिमुखं	(नित्य) उद्यत	कुण्डलिनं	कुण्डल पहिने,
दृक् आसवं	अमृत भरी	चतुर्भुजं	चतुर्भुज
	दृष्टिवाले,	पीताम्बर	पीतम्बरधारी
प्रसन्न हास	प्रसन्नतासे हँसते	वक्षसि	वक्षस्थलपर
अरुण	लाल	श्रिया	श्रीवत्सका
लोचन	नेत्रोंसे युक्त	लक्षितं	चिह्न (है) ॥१५॥

अध्यर्हणीयासनमास्थितं परं
वृतं चतुःषोडशपञ्चशक्तिभिः ।
युक्तं भगैः स्वैरितरत्र चाध्रुवैः
स्व एव धामन् रममाणमीश्वरम् ॥१६॥

अध्यर्हणीय आसनं आस्थितं परं वृतं चतुः षोडश पञ्च शक्तिभिः युक्तं भगैः इतरअत्र च अध्रुवैः स्व एव धामन् रममाणं ईश्वरम् ॥१६॥

अध्यर्हणीय	बहुमूल्य सम्मान्य	चतुः षोडष पञ्च	चार, सोलह और
परं आसनं	श्रेष्ठ आसनपर		पाँच–पच्चीस
आस्थितं	बैठे हुए,		(पुरुष, प्रकृति,

	महत्तत्त्व, अहंकार, मन, दस इन्द्रियाँ, पंच तन्मात्र, पंच	अत्र	(जो) यहाँ (भगवानको छोड़कर)
शक्तिभिः	तत्त्वोंसे	इतर च	दूसरोंसे तो
वृतं	घिरे	अध्रुवैः	अस्थायी रहते हैं,
स्वैः	अपने	स्व	अपने
भगैः	ऐश्वर्य (समग्र ऐश्वर्य, धर्म, यश, श्री, ज्ञान और वैराग्य) से	एव	ही
		धामन्	धाम (स्वरूप) में
		रममाणं	क्रीड़ा करते,
युक्तं	संयुक्त	ईश्वरं	सर्व समर्थ (को देखा) ॥१६॥

तद्दर्शनाह्लादपरिप्लुतान्तरो
हृष्यत्तनुः प्रेमभराश्रुलोचनः ।
ननाम पादाम्बुजमस्य विश्वसृग्
यत् पारमहंस्येन पथाधिगम्यते ॥१७॥

तत् दर्शन आह्लाद परिप्लुतः अन्तरः हृष्यत् तनुः प्रेमभर अश्रुलोचनः ननाम पादाम्बुजं अस्य विश्वसृक् यत् पारमहंस्येन पथा अधिगम्यते ॥१७॥

यत्	जो	हृष्यत्	रोमाञ्चित
पारमहंस्येन	परमहंसोंके	तनुः	शरीर,
पथा	मार्गसे (निवृत्ति मार्ग से)	प्रेमभर	प्रेमके आवेगसे
		अश्रुलोचनः	नेत्रोंसे अश्रु बहाते
अधिगम्यते	प्राप्त होते हैं	विश्वसृक्	सृष्टिकर्ता (ब्रह्माजी) ने
तत्	उनके		
दर्शन	दर्शनके	अस्य	इन (भगवान) के
आह्लाद	आनन्दसे	पादाम्बुजं	चरणकमलोंमें
परिप्लुतः	उमड़ते	ननाम	नमस्कार
अन्तरः	हृदय,		किया ॥१७॥

तं प्रीयमाणं समुपस्थितं तदा
प्रजाविसर्गे निजशासनार्हणम् ।
बभाष ईषत्स्मितशोचिषा गिरा
प्रियः प्रियं प्रीतमनाः करे स्पृशन् ॥१८॥

तं प्रीयमाणं समुपस्थितं तदा प्रजा विसर्गे निज शासन अर्हणं बभाष ईषत् स्मित शोचिषा गिरा प्रियः प्रियं प्रीतमनाः करे स्पृशन् ॥१८॥

तं	उन	अर्हणं	योग्य,
प्रियं	अपने प्रिय (ब्रह्मा)से	समुपस्थितं	सम्मुख उपस्थित,
तदा	उस समय	प्रीतमनाः	प्रसन्न चित्त होकर,
प्रीयमाणं	प्रसन्न करनेके प्रयत्नमें लगे	करे स्पृशन्	हाथसे स्पर्श करते हुए
प्रियः	(ब्रह्माके) प्रिय (भगवान)	ईषत् स्मित	मन्द मुसुकानसे
प्रजा विसर्गे	प्रजाकी सृष्टिमें	शोचिषा	अलंकृत
निज	अपने	गिरा	वाणीसे
शासन	आदेश	बभाष	बोले ॥१८॥

श्रीभगवानुवाच-

त्वयाहं तोषितः सम्यग् वेदगर्भ सिसृक्षया ।
चिरं भृतेन तपसा दुस्तोषः कूटयोगिनाम् ॥१९॥

त्वया अहं तोषितः सम्यक् वेदगर्भ सिसृक्षया चिरं भृतेन तपसा दुस्तोषः कूट योगिनाम् ॥१९॥

कूट योगिनां	(मनमें) कपट रखकर योग करने वालोंसे	सिसृक्षया	सृष्टि करनेकी इच्छासे
दुस्तोषः	सन्तुष्ट न होनेवाला	त्वया	तुम्हारे द्वारा
अहं	मैं	चिरं भृतेन	बहुत समयतक की गयी
वेदगर्भ	ब्रह्माजी		

तपसा	तपस्यासे	तोषितः	सन्तुष्ट किया
सम्यक्	भली प्रकार		गया ॥१९॥

वरं वरय भद्रं ते वरेशं माभिवाञ्छितम् ।
ब्रह्मञ्छ्रेयःपरिश्रामः पुंसो मद्दर्शनावधिः ॥२०॥

वरं वरय भद्रं ते वरेशं मां अभिवाञ्छितं ब्रह्मन् श्रेयः परिश्रामः पुंसः मत् दर्शन अवधिः ॥२०॥

ब्रह्मन्	ब्रह्माजी !	मां	मुझ
पुंसः	पुरुषके	वरेशं	वरदानोंके स्वामीसे
श्रेयः	कल्याणके लिए	अभिवाञ्छितं	अभीष्ट
परिश्रामः	परिश्रम	वरं	वरदान
	(सब साधन)	वरय	मांग लो,
मत्	मेरे	ते	तुम्हारा
दर्शन	दर्शन	भद्रं	कल्याण हो ॥२०॥
अवधिः	तक ही है, (अतः)		

मनीषितानुभावोऽयं मम लोकावलोकनम् ।
यदुपश्रुत्य रहसि चकर्थ परमं तपः ॥२१॥

मनीषितः अनुभावः अयं मम लोक अवलोकनं यत् उपश्रुत्य रहसि चकर्थ परमं तपः ॥२१॥

अयं	यह	उपश्रुत्य	(मेरी वाणी)
मम	मेरे		सुनकर
लोक	लोकका	परमं तपः	परम (घोर)
अवलोकनं	दर्शन		तपस्या (तुमने)
यत्	जो	चकर्थ	किया (उसी)
रहसि	एकान्तमें	मनीषितः	मनस्विताका
		अनुभावः	प्रभाव है ॥२१॥

प्रत्यादिष्टं मया तत्र त्वयि कर्मविमोहिते ।
तपो मे हृदयं साक्षादात्माहं तपसोऽनघ ॥२२॥

प्रत्यादिष्टं मया तत्र त्वयि कर्म विमोहिते तपः मे हृदयं साक्षात् आत्मा अहं तपसः अनघ ॥२२॥

अनघ	निष्पाप (ब्रह्माजी) !	प्रत्यादिष्टं	(तुम्हें) आदेश दिया गया
त्वयि	तुम्हारे	तपः	तप
कर्म	(सृष्टि रचनाके) कर्ममें	साक्षात्	प्रत्यक्ष
विमोहिते	(किंकर्तव्य) विमूढ़ होनेपर	मे	मेरा
तत्र	वहाँ	हृदयं	हृदय है,
मया	मेरे द्वारा	अहं	मैं
		तपसः	तपका
		आत्मा	आत्मा हूँ ॥२२॥

सृजामि तपसैवेदं ग्रसामि तपसा पुनः ।
बिभर्मि तपसा विश्वं वीर्यं मे दुश्चरं तपः ॥२३॥

सृजामि तपसा एव इदं ग्रसामि तपसा पुनः बिभर्मि तपसा बिश्वं वीर्यं मे दुश्चरं तपः ॥२३॥

इदं	इस	तपसा	तपस्यासे
विश्वं	विश्वकी	बिभर्मि	(संसारको) धारण करता हूँ,
तपसा	तपस्यासे		
एव	ही	तपः	तपस्या
सृजामि	सृष्टि करता हूँ,	मे	मेरी
पुनः	फिर	दुश्चरं	दुर्लंघ्य
तपसा	तपस्यासे	वीर्यं	शक्ति है ॥२३॥
ग्रसामि	(इसे) निगल लेता हूँ,		

ब्रह्मोवाच–

भगवन् सर्वभूतानामध्यक्षोऽवस्थितो गुहाम् ।
वेद ह्यप्रतिरुद्धेन प्रज्ञानेन चिकीर्षितम् ॥२४॥

भगवन् सर्वभूतानां अध्यक्षः अवस्थितः गुहां वेद हि अप्रतिरुद्धेन प्रज्ञानेन चिकीर्षितम् ॥२४॥

भगवन्	भगवन् !	**अप्रतिरुद्धेन**	अप्रतिहत
हि	क्योंकि	**प्रज्ञानेन**	(अपने) ज्ञानसे
सर्वभूतानां	समस्त प्राणियोंके	**चिकीर्षितं**	(मेरी जो) करनेकी इच्छा है
अध्यक्षः	(आप) स्वामी हैं,	**वेद**	(उसे) जानते ही हैं ॥२४॥
गुहां	(सबकी हृदय) गुहामें		
अवस्थितः	स्थित हैं,		

तथापि नाथमानस्य नाथ नाथय नाथितम् ।
परावरे यथा रूपे जानीयां ते त्वरूपिणः ॥२५॥

तथापि नाथमानस्य नाथ नाथय नाथितं परावर यथा रूपे जानीयां ते तु अरूपिणः ॥२५॥

तथापि	फिर भी	**ते**	आप
नाथ	स्वामी !	**अरूपिणः**	निराकार
नाथ मानस्य	याचना करते हुए (मेरी)	**तु**	के
नाथितुं	याचनाको	**परावरे**	कार्य-कारणात्मक
नाथय	पूरी कर दीजिये,	**रूपे**	रूपोंको
यथा	जिससे	**जानीयां**	जान सकूँ ॥२५॥

यथाऽऽत्ममायायोगेन नानाशक्त्युपबृंहितम् ।
विलुम्पन् विसृजन् गृह्णन् बिभ्रदात्मानमात्मना ॥२६॥

यथा आत्म माया योगेन नानाशक्ति उपबृंहितं विलुम्पन् विसृजन् गृहणन् बिभ्रत् आत्मानं आत्मना ॥२६॥

यथा	जैसे (आप)	**उपबृंहितः**	सम्पन्न होकर
आत्ममाया	अपनी मायाके	**विलुम्पन्**	(जगतका) प्रलय करते
योगेन	योग (आश्रम) से	**विसृजन्**	सृष्टि करते,
नानाशक्ति	नाना शक्तियोंसे		

गृहणन्	ग्रहण (पालन) करते,	आत्मानं	अपने (स्वरूप)
आत्मना	अपने द्वारा		को ही
		विभ्रत्	धारण करते हैं ।२६।

क्रीडस्यमोघसङ्कल्प ऊर्णनाभिर्यथोर्णुते ।
तथा तद्विषयां धेहि मनीषां मयि माधव ॥२७॥

क्रीडसि अमोघ सङ्कल्पः उर्णनाभिः यथा उर्णते तथा तत् विषयां धेहि मनीषां मयि माधव ॥२७॥

माधव	माधव !	तथा	ऐसी ही
यथा	जैसे	तत्	उस (सृष्टि) के
उर्णनाभिः	मकड़ी	विषयां	विषयकी
उर्णते	जाला बनाती है,	मनीषां	बुद्धि
अमोघ	अव्यर्थ	मयि	मुझमें
सङ्कल्पः	सङ्कल्प (आप)	धेहि	दीजिये ॥२७॥
क्रीडसि	(वैसे ही) खेलते हैं,		

भगवच्छिक्षितमहं करवाणि ह्यतन्द्रितः ।
नेहमानः प्रजासर्गं बध्येयं यदनुग्रहात् ॥२८॥

भगवत इच्छितं अहं करवाणि हि अतन्द्रितः न ईहमानः प्रजासर्गं बध्येयं यत् अनुग्रहात् ॥२८॥

हि	क्योंकि	करवाणि	कर सकूं और
भगवत	भगवन् आपकी	ईहमानः	सृष्टि करते समय भी
इच्छितं	इच्छाके अनुसार	यत् अनुग्रहात्	जिनके अनुग्रहसे
अहं	मैं	बध्येयं	(इसमें) बन्धनमें
अतन्द्रितः	प्रमाद रहित होकर	न	न पड़ूँ ॥२८॥
प्रजासर्गं	प्रजाकी सृष्टि		

यावत् सखा सख्युरिवेश ते कृतः
प्रजाविसर्गे विभजामि भो जनम् ।

अविक्लवस्ते परिकर्मणि स्थितो
मा मे समुन्नद्धमदोऽजमानिनः ॥२९॥

यावत् सखा सख्युः इव ईश ते कृतः प्रजाविसर्गे विभजामि भो जनं अविक्लवः ते परिकर्मणि स्थितः मा मे समुन्नद्ध मदः अज मानिनः ॥२९॥

ईश	सर्वसमर्थ	**भो**	हे प्रभो ! (तब)
सखा	परम मित्र !	**ते**	आपके ही
ते	आपने (मुझे)	**परिकर्मणि**	(सृष्टि रूप) सेवा
सख्युः	सखाको		कर्ममें
इव	भाँति	**स्थितः**	लगनेपर
कृतः	बना लिया है	**मे**	मुझमें
	(अतः)	**अज**	(अपनेको) अजन्मा
यादत्	जबतक	**मानिनः**	माननेका
प्रजाविसर्गे	प्रजाकी सृष्टिमें	**समुन्नद्ध**	बढ़ा हुआ
अविक्लवः	सावधानीसे	**मदः**	अहंकार
जनं	लोगों (प्राणियों) का	**मा**	न होवे ॥२९॥
विभजामि	विभाजन करने लगूँ		

श्रीभगवानुवाच–

ज्ञानं परमगुह्यं मे यद् विज्ञानसमन्वितम् ।
सरहस्यं तदङ्गं च गृहाण गदितं मया ॥३०॥

ज्ञानं परम गुह्यं मे यद् विज्ञान समन्वितं सरहस्यं तदङ्गं च गृहाण गदितं मया ॥३०॥

यद्	जो	**तदङ्गं**	उसके अङ्ग
विज्ञान	विशेष ज्ञानसे	**च**	भी
समन्वितं	संयुक्त	**मया**	मेरे द्वारा
परमगुह्यं	परम रहस्यमय	**ते**	तुम्हें
ज्ञानं	ज्ञान है,	**गदितं**	कहा गया
स रहस्यं	रहस्यके साथ	**गृहाण**	ग्रहण करो ॥३०॥

यावानहं यथाभावो यद्रूपगुणकर्मकः ।
तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहात् ॥३१॥

यावान् अहं यथा भावः यत् रूप गुण कर्मकः तथा एव तत्त्वविज्ञानं अस्तु ते मत् अनुग्रहात् ॥३१॥

अहं	मैं	तथा	वैसा
यावान्	जितना हूँ,	एव	ही
यथा	जैसे	तत्त्व विज्ञानं	तत्त्वका सम्पूर्ण ज्ञान
भावः	लक्षणवाला,	मत्	मेरे
यत्	जैसे	अनुग्रहात्	अनुग्रहसे
रूप	रूप,	ते	तुम्हें
गुण	गुण,	अस्तु	होवे ॥३१॥
कर्मकः	कर्मवाला हूँ ।		

अहमेवासमेवाग्रे नान्यद् यत् सदसत् परम् ।
पश्चादहं यदेतच्चयोऽवशिष्येत सोऽस्म्यहम् ॥३२॥

अहं एव आसं एव अग्रे न अन्यत् सत् असत् परं पश्चात् अहं यत् एतत् च यः अवशिष्येत सः अस्मि अहम् ॥३२॥

अग्रे	(सृष्टिके) पहिले	पश्चात्	पीछे
अहं	मैं	अहं	मैं (ही रहजाता हूँ)
एव	ही	यत्	जो
आसं	था,	एतत्	यह (सृष्टि)
एव	था ही था (एकमात्र मैं था),	च	भी (और)
		यः	(इससे) जो
अन्यत्	दूसरा	अवशिष्येत	बच रहता है
सत्	कारण	सः	वह
असत्	कार्य	अहं	मैं (ही)
परं	इनसे परे (भी)	अस्मि	हूँ ॥३२॥
न	(कुछ) नहीं था,		

ऋतेऽर्थं यत् प्रतीयेत न प्रतीयेत चात्मनि ।
तद्विद्यादात्मनो मायां यथाऽऽभासो यथा तमः ॥३३॥

ऋते अर्थं यत् प्रतीयेत न प्रतीयेत च आत्मनि तत् विद्यात् आत्मनः मायां यथा आभासः यथा तमः ॥३३॥

अर्थं	तत्त्वके
ऋते	अतिरिक्त
यत्	जो
प्रतीयेत	प्रतीत होता है (किन्तु),
आत्मनि	आत्मामें
च	तो
न	नहीं
प्रतीयेत	प्रतीत होता
तत्	उसको
आत्मनः	आत्माकी
मायां	माया
विद्यात्	जाने,
यथा	जैसे
आभासः	प्रतिबिम्ब या प्रतीति (जैसे न होनेपर भी दो चन्द्र दीखते हैं)
यथा	जैसे
तमः	राहु (यह वस्तुतः कोई ग्रह नहीं है; किन्तु पृथ्वीकी छायासे प्रतीत होता है) ॥३३॥

यथा महान्ति भूतानि भूतेषूच्चावचेष्वनु ।
प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहम् ॥३४॥

यथा महान्ति भूतानि भूतेषु उच्च अवचेषु अनुप्रविष्टानि अप्रविष्टानि तथा तेषु न तेषु अहम् ॥३४॥

यथा	जैसे
महान्ति भूतानि	महाभूत (पृथ्वी, जल, अग्नि, वायु, आकाश)
उच्च अवचानि	बड़े छोटे सब
भूतेषु	प्राणियोंमें
अप्रविष्टानि	बिना प्रवेश किये ही
अनुप्रविष्टानि	प्रवेश किये हैं (आकाश आदि सबमें हैं; किन्तु आकाशकी दृष्टिसे तो प्राणि-पदार्थकी सत्ता ही नहीं, अतः वह प्रवेश कहाँ किसमें करेगा),
तथा	वैसे ही

तेषु	उन सब (प्राणि पदार्थों) में होते हुए भी	तेषु	उनमें
		अहं	मैं
		न	नहीं हूँ ॥३४॥

एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनाऽऽत्मनः ।
अन्वयव्यतिरेकाभ्यां यत् स्यात् सर्वत्र सर्वदा ॥३५॥

एतावत् एव जिज्ञास्यं तत्त्व जिज्ञासु आत्मनः अन्वय व्यतिरेकाभ्यां यत् स्यात् सर्वत्र सर्वदा ॥३५॥

आत्मनः	आत्म	व्यतिरेकाभ्यां	प्रलय क्रमसे भी
तत्त्व	तत्त्वको	यत्	जो
जिज्ञासु	जाननेकी इच्छा वालेको	स्यात्	(नित्य) तत्त्व है (वह)
एतावत्	इतना मात्र	सर्वत्र	सब देशमें,
एव	ही	सर्वदा	सब कालमें (एक रस रहता) है ॥३५॥
जिज्ञास्यं	जानना चाहिये कि		
अन्वय	सृष्टि क्रमसे,		

एतन्मतं समातिष्ठ परमेण समाधिना ।
भवान् कल्पविकल्पेषु न विमुह्यति कर्हिचित् ॥३६॥

एतत् मतं सम आतिष्ठ परमेण समाधिना भवान् कल्प विकल्पेषु न विमुह्यति कर्हचित् ॥३६॥

परमेण	अत्यन्त	भवान्	आप
समाधिना	एकाग्रतापूर्वक	कल्प	महाकल्प
एतत्	इस	विकल्पेषु	उप कल्पोंमें
मतं	मतपर	कर्हिचित	कभी भी
सम	भली प्रकार	विमुह्येत	मोहित
आतिष्ठ	स्थित हो जाओ (फिर)	न	नहीं होंगे ॥३६॥

श्रीशुक उवाच-

सम्प्रदिश्यैवमजनो जनानां परमेष्ठिनम् ।
पश्यतस्तस्य तद् रूपमात्मनो न्यरुणद्धरिः ॥३७॥

सम्प्रदिश्य एवं अजनः जनानां परमेष्ठिनं पश्यतः तस्य तद् रूपं आत्मनः न्यरुणत् हरिः ॥३७॥

जनानां	लोगोंके	अजनः	अजन्मा
परमेष्ठिनं	पितामह (ब्रह्माजी) को	हरिः	श्रीहरिने
एवं	इस प्रकार	तद्	वह
सम्प्रदिश्य	समझाकर,	आत्मनः	अपना
तस्य	उनके	रूपं	रूप
पश्यतः	देखते देखते	न्यरुणत्	छिपा लिया ॥३७॥

अन्तर्हितेन्द्रियार्थाय हरये विहिताञ्जलिः ।
सर्वभूतमयो विश्वं ससर्जेदं स पूर्ववत् ॥३८॥

अन्तर्हित इन्द्रियार्थाय हरये विहित अञ्जलिः सर्वभूतमयः विश्वं ससर्ज दं स पूर्ववत् ॥३८॥

इन्द्रियार्थाय	इन्द्रिय गोचर (रूपके)	सर्वभूतमयः	सम्पूर्ण प्राणीमय
अन्तर्हिताय	तिरोहित हुए	इदं	इस
हरये	श्रीहरिके प्रति	विश्वं	विश्वको
विहित अञ्जलिः	हाथ जोड़कर,	पूर्ववत्	पहिले (कल्प) के समान
स	उन (ब्रह्माजी) ने	ससर्ज	बनाया ॥३८॥

प्रजापतिर्धर्मपतिरेकदा नियमान् यमान् ।
भद्रं प्रजानामन्विच्छन्नातिष्ठत् स्वार्थकाम्यया ॥३९॥

प्रजापतिः धर्मपतिः एकदा नियमान् यमान् भद्रं प्रजानां अन्विच्छन् आतिष्ठत् स्वार्थ काम्यया ॥३९॥

एकदा	एक बार	स्वार्थ काम्यया	अपने इस प्रयोजनकी कामनासे
धर्मपतिः	धर्मके स्वामी	नियमान् यमान्	यम-नियमोंका
प्रजापतिः	प्रजापति ब्रह्माजीने	आतिष्ठत्	भली प्रकार पालन किया ॥३९॥
प्रजानां	प्रजाका		
भद्रं	कल्याण		
अन्विच्छन्	चाहते हुए		

तं नारदः प्रियतमो रिक्थादानामनुव्रतः ।
शुश्रूषमाणः शीलेन प्रश्रयेण दमेन च ॥४०॥

तं नारदः प्रियतमः रिक्थादानां अनुव्रतः शुश्रूषमाणः शीलेन प्रश्रयेण दमेन च ॥४०॥

तं	उनको	**शुश्रूषमाणः**	(मायाका तत्त्व) सुननेकी इच्छासे
रिक्थादानां	उत्तराधिकारी (पुत्रों) में	**शीलेन**	अपनी सौम्यतासे,
प्रियतमः	अत्यन्त प्रिय	**प्रश्रयेण**	विनयसे,
अनुव्रतः	अनुगत	**दमेन च**	संयमसे भी (प्रसन्न किया) ॥४०॥
नारदः	नारद		

मायां विविदिषन् विष्णोर्मायेशस्य महामुनिः ।
महाभागवतो राजन् पितरं पर्यतोषयत् ॥४१॥

मायां विविदिषन् विष्णोः मायेशस्य महामुनिः महाभागवतः राजन् पितरं पर्यतोषयत् ॥४१॥

राजन्	राजन् !	**विविदिषन्**	जाननेकी इच्छासे
महाभागवतः	महाभागवत	**पितरं**	(अपने) पिता (ब्रह्माजी) को
महामुनिः	महामुनि (नारद) ने	**पर्यतोषयत्**	पूर्णतः सन्तुष्ट किया ॥४१॥
मायेशस्य	मायाके स्वामी		
विष्णोः	भगवान् विष्णुकी		
मायां	माया (केतत्त्व) को		

तुष्टं निशाम्य पितरं लोकानां प्रपितामहम् ।
देवर्षिः परिपप्रच्छ भवान् यन्मानुपृच्छति ॥४२॥

तुष्टं निशाम्य पितरं लोकानां प्रपितामहं देवर्षिः परिपप्रच्छ भवान् यत् मां अनुपृच्छति ॥४२॥

लोकानां	सब लोकोंके	**तुष्टं**	सन्तुष्ट
प्रपितामहं	प्रपितामह	**निशाम्य**	देखकर
पितरं	अपने पिताको	**देवर्षिः**	देवर्षि नारदने

	(वही)	मां	मुझसे
परिपप्रच्छ	पूछा	यत्	जो
भवान्	आप	अनुपृच्छसि	पूछते हैं ॥४२॥

तस्मा इदं भागवतं पुराणं दशलक्षणम् ।
प्रोक्तं भगवता प्राह प्रीतः पुत्राय भूतकृत् ॥४३॥

तस्मा इदं भागवतं पुराणं दशलक्षणं प्रोक्तं भगवता प्राह प्रीतः पुत्राय भूतकृत् ॥४३॥

तस्मा	उन		के द्वारा
पुत्राय	अपने पुत्र (नारदजी) से	प्रोक्तं	कहा गया
		इदं	यह
भूतकृत्	प्राणियोंके स्रष्टा (ब्रह्मा) ने	दशलक्षणं	दस लक्षणवाला
		पुराणं	पुराण
प्रीतः	प्रसन्न होकर	भागवतं	भागवत
भगवता	भगवान् (विष्णु)	प्राह	कहा ॥४॥

नारदः प्राह मुनये सरस्वत्यास्तटे नृप ।
ध्यायते ब्रह्म परमं व्यासायामिततेजसे ॥४४॥

नारदः प्राह मुनये सरस्वत्याः तटे नृप ध्यायते ब्रह्म परमं व्यासाय अमित तेजसे ॥४४॥

नृप	राजन् !	मुनये	मुनि
सरस्वत्याः तटे	सरस्वतीके किनारे	व्यासाय	व्यासजीसे
परमं ब्रह्म	परम ब्रह्मका	नारदः	नारदजीने
ध्यायते	ध्यान करते हुए	प्राह	कहा ॥४४॥
अमित तेजसे	अमित तेजस्वी		

यदुताहं त्वया पृष्टो वैराजात् पुरुषादिदम् ।
यथाऽऽसीत्तदुपाख्यास्ये प्रश्नानन्यांश्च कृत्स्नशः ॥४५॥

यत् उत अहं त्वया पृष्टः वैराजात् पुरुषात् इदं यथा आसीत् तत् उपाख्यास्ये प्रश्नान् अन्यान् च कृत्स्नशः ॥४५॥

यत्	जो	इदं	यह जगत्
उत	कि	आसीत्	उत्पन्न हुआ
त्वया	तुम्हारे द्वारा	तत्	वह
अहं	मुझसे	च	तथा
पृष्टः	पूछा गया	अन्यान्	दूसरे
वैराजात्	विराट्	प्रश्नान्	प्रश्नोंका
पुरुषात्	पुरुषसे	कृत्स्नशः	पूर्णतः
यथा	जैसे	उपाख्यास्ये	उत्तर दूँगा ॥४५॥

इति श्रीमद्भागवते महापुराणे वैयासिक्यां पारमहस्यां
संहितायां द्वितीयस्कन्धे नवमोऽध्यायः

अथ दशमोऽध्यायः

श्रीशुक उवाच-

अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः ।
मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः ॥१॥

अत्र सर्गः विसर्गः च स्थानं पोषणं ऊतयः मन्वन्तरः ईशानुकथा निरोधः मुक्तिः आश्रयः ॥१॥

अत्र	इस (महापुराण) में	मन्वन्तरः	मन्वन्तर,
सर्गः	सर्ग,	ईशानुकथा	ईशानुकथा,
विसर्गः	विसर्ग,	निरोधः	निरोध,
च	तथा	मुक्ति	मुक्ति,
स्थानं	स्थान,	आश्रयः	आश्रय (ये दस
पोषणं	पोषण,		विषय हैं) ॥१॥
ऊतयः	ऊतियाँ,		

दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणम् ।
वर्णयन्ति महात्मानः श्रुतेनार्थेन चाञ्जसा ॥२॥

दशमस्य विशुद्धि अर्थं नवानां इह लक्षणं वर्णयन्ति महात्मानः श्रुतेन अर्थेन च अञ्जसा ॥२॥

दशमस्य	दशम (आश्रयतत्त्व) की	च	और
विशुद्धि	ठीक ठीक निश्चय	अर्थेन	(कहीं श्रुतिके) तात्पर्यसे,
अर्थं	के लिए	अञ्जसा	सरलतासे
इह महात्मानः	इस (पुराण) में महात्मा लोग	नवानां	(शेष) नौ विषयोंका
श्रुतेन	(कहीं) श्रुतिसे,	लक्षणं	स्वरूप
		वर्णयन्ति	वर्णन करते हैं ॥२॥

भूतमात्रेन्द्रियधियां जन्म सर्ग उदाहृतः ।
ब्रह्मणो गुणवैषम्याद् विसर्गः पौरुषः स्मृतः ॥३॥

भूत मात्र इन्द्रिय धियां जन्म सर्ग उदाहृतः ब्रह्मणः गुण वैषम्यात् विसर्गः पौरुषः स्मृतः ॥३॥

गुण	(त्रि गुणोंमें	**सर्ग**	सर्ग
वैषम्यात्	विषमता आनेपर	**उदाहृतः**	कहा गया है।
भूत	पञ्चमहाभूत,	**ब्रह्मणः**	ब्रह्माके द्वारा
मात्र	(उनकी) तन्मात्रा,		(हुई सृष्टि)
इन्द्रिय	इन्द्रियों (तथा)	**पौरुषः**	पुरुषकृत
धियां	महत्तत्त्व एवं	**विसर्गः**	विसर्ग
	अहङ्कारका	**स्मृतः**	कही जाती है ॥३॥
जन्म	उत्पन्न होना,		

स्थितिर्वैकुण्ठविजयः पोषणं तदनुग्रहः ।
मन्वन्तराणि सद्धर्म ऊतयः कर्मवासनाः ॥४॥

स्थितिः वैकुण्ठ विजयः पोषणं तत् अनुग्रहः मन्वन्तराणि सद्धर्मः ऊतयः कर्मवासनाः ॥४॥

वैकुण्ठ	भगवान् विष्णुकी	**सद्धर्मः**	(मन्वन्तरोंके अधिपति
विजयः	विजय (विनाशकी		एवं उनकी सन्तानों
	ओर बढ़नेवाली		द्वारा आचरित)
	सृष्टिको बनाये		उत्तम धर्मको
	रखना जहाँतक है,	**मन्वन्तराणि**	मन्वन्तर कहते हैं,
	उस देश विस्तारको)	**कर्मवासनाः**	कर्मोंकी वासना
स्थितिः	स्थान कहा जाता है,		(तथा उनके फल)
तत्	उन (भगवान) के	**ऊतयः**	ऊति कहलाती
अनुग्रहः	अनुग्रहका नाम		हैं ॥४॥
पोषणं	पोषण है,		

अवतारानुचरितं हरेश्चास्यानुवर्तिनाम् ।
सतामीशकथाः प्रोक्ता नानाख्यानोपबृंहिताः ॥५॥

अवतार अनुचरितं हरेः च अस्य अनुवर्तिनां सतां ईशकथा प्रोक्ता नाना आख्यान उपबृंहिताः ॥५॥

हरेः	श्रीभगवानके	सतां	भक्तोंका
अवतार	अवतारोंका	नाना	अनेक
अनुचरित	चरित	आख्यान	आख्यानोंसे
च	तथा	उपबृंहिताः	युक्त कथा
अस्य	इन (भगवान) के	ईशकथा	ईशकथा
अनुवर्तिनां	अनुगामी	प्रोक्ता	कही गयी है ॥५॥

निरोधोऽस्यानुशयनमात्मनः सह शक्तिभिः ।
मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिः ॥६॥

निरोधः अस्य अनुशयनं आत्मनः सह शक्तिभिः मुक्तिः हित्वा अन्यथा रूपं स्वरूपेण व्यवस्थितिः ॥६॥

अस्य	इन भगवानका	अन्यथा	अपने स्वरूपसे भिन्न
आत्मनः	अपनी	रूपं	भावोंको
सह शक्तिभिः	शक्तियोंके साथ	हित्वा	त्यागकर
अनुशयनं	(योगनिद्रा स्वीकार करके) सो जाना	स्वरूपेण	अपने स्वरूपमें
		व्यवस्थितिः	स्थित हो जाना
निरोधः	निरोध कहा जाता है,	मुक्तिः	मुक्ति है ॥६॥

आभासश्च निरोधश्च यतश्चाध्यवसीयते ।
स आश्रयः परं ब्रह्म परमात्मेति शब्द्यते ॥७॥

आभासः च निरोधः च यतः च अध्यवसीयते स आश्रयः परं ब्रह्म परमात्मा इति शब्द्यते ॥७॥

आभासः	(इस जगत्की) सृष्टि	च	ही
च	और	अध्यवसीयते	प्रतीत होते (प्रवर्तित होते) हैं
निरोधः	प्रलय		
च	भी	स	वह
यतः	जिससे	परंब्रह्म	परमब्रह्म

परमात्मा	परमात्मा	**शब्द्यते**	कहलानेवाला
इति	इस नामसे	**आश्रयः**	आश्रय है ॥७॥

योऽध्यात्मिकोऽयं पुरुषः सोऽसावेवाधिदैविकः ।
यस्तत्रोभयविच्छेदः पुरुषो ह्याधिभौतिकः ॥८॥

यः आध्यात्मिकः अयं पुरुषः सः असा एव आधिदैविकः यः तत्र उभय विच्छेदः पुरुषः हि आधिभौतिक ॥८॥

यः	जो	**यः**	जो
अयं	यह	**तत्र**	वहाँ
आध्यात्मिकः	आध्यात्मिक	**उभय**	दोनों (आध्यात्मि और आधिदैविक)का
पुरुषः	पुरुष है (शरीरमें नेत्रका अधिदेव सूर्य)	**विच्छेदः**	पार्थक्य करनेवाला है,
सः	वह	**पुरुषः हि**	(वह) पुरुष ही
असा	यह	**आधिभौतिकः**	आधिभौतिक (शरीर) है ॥८॥
एव	ही		
आधिदैविकः	आधिदैविक (सूर्य मण्डलका अधिदेवता सूर्य) है		

विशेष—

देहमें अध्यात्म पुरुष जीव तथा इन्द्रिय देवता हैं अधिदेव समष्टिके देवता तथा सृष्टिका संचालक ईश्वर है। इन दोनोंमें पृथकता अधिभूत शरीरकी आसक्तिसे ही जान पड़ती है। अन्यथा नेत्रका अधिदेवता तथा सूर्य मण्डलका अधिदेवता एक ही सूर्य है।

एकमेकतराभावे यदा नोपलभामहे ।
त्रितयं तत्र यो वेद स आत्मा स्वाश्रयाश्रयः ॥९॥

एकं एकतर अभावे यदा न उपलभामहे त्रितयं तत्र यः वेद स आत्मा स्वाश्रय आश्रयः ॥९॥

यदा	जब	**अभावे**	न रहनेपर
एकतर	एकके भी	**एकं**	एकको भी

न	नहीं	वेद	जानता है
उपलभामहे	पाया (जाना) जाता है	स	वह
		स्वाश्रय आश्रयः	अपने ही आधारपर स्थित
तत्र	वहाँ		
यः	जो	आत्मा	आत्मा है ॥९॥
त्रितयं	तीनोंको		

विशेष—

आध्यात्मिक नेत्रेन्द्रिय, अधिदेव सूर्य, अधिभूत नेत्र गोलक इन तीनमें एक भी उपस्थित न हो—नेत्रेन्द्रिय सहयोग न दे तो खुले नेत्र दिनमें भी कुछ नहीं दीखेगा। नेत्र गोलक ठीक न हों तो व्यक्ति अन्धा होता ही है। नेत्र बन्द करनेपर या सोते समय भी कुछ नहीं दीखता। सूर्य या कोई प्रकाश रूप अधिदेव न हो तो नेत्र ठीक हों, देखना भी चाहें तो कुछ नहीं दीखेगा। इन इन्द्रियों, गोलकों, देवताओंको जाननेवाला आत्मा—स्वयं प्रकाश अपने ही आश्रयसे है।

पुरुषोऽण्डं विनिर्भिद्य यदासौ स विनिर्गतः।
आत्मनोऽयनमन्विच्छन्नपोऽस्राक्षीच्छुचिः शुचीः ॥१०॥

पुरुषः अण्डं विनिर्भिद्य यदा असौ स विनिर्गतः आत्मनः अयनं अन्विच्छन् अपः स्राक्षीत् शुचिः शुचीः ॥१०॥

शुचिः	परम पवित्र	आत्मनः	अपने लिए
यदा स	जब वह	अयनं	निवासका
पुरुषः	पुरुष	अन्विच्छन्	अन्वेषण करता हुआ
असौ अण्डं	इस ब्रह्माण्डको	शुचीः	पवित्र
विनिर्भिद्य	फोड़कर	अपः	जलकी
विनिर्गतः	बाहर निकला,	स्राक्षीत्	उत्पत्ति की ॥१०॥

तास्ववात्सीत् स्वसृष्टासु सहस्रपरिवत्सरान्।
तेन नारायणो नाम यदापः पुरुषोद्भवाः ॥११॥

ताः सु अवात्सीत् स्वसृष्टासु सहस्र परिवत्सरान् तेन नारायणः नाम यत् आपः पुरुष उद्भवाः ॥११॥

स्वसृष्टासु	अपने उत्पन्न किये	नाम	नाम पड़ा
ताः सु	उस (जल) में	यत्	क्योंकि
सहस्र	एक हजार	आपः	जल (नार)
परिवत्सरान्	वर्षोंतक	पुरुष	पुरुषसे (नरसे)
अवात्सीत्	रहा	उद्भवाः	उत्पन्न हुआ (अतः जलका नाम नार पड़ा) ॥११॥
तेन	इससे		
नारायणः	नारायण		

द्रव्यं कर्म च कालश्च स्वभावो जीव एव च ।
यदनुग्रहतः सन्ति न सन्ति यदुपेक्षया ॥१२॥

द्रव्यं कर्म च कालः च स्वभावः जीव एव च यत् अनुग्रहतः सन्ति न सन्ति यत् उपेक्षया ॥१२॥

यत्	जिस (नारायण) की	च	तथा
अनुग्रहतः	कृपासे ही	जीव	जीवकी
द्रव्यं	पदार्थ	एव	भी
कर्म	कर्म	सन्ति	सत्ता है
च	तथा	यत्	जिसके
कालः	काल	उपेक्षया	उपेक्षा कर देनेपर
च	भी	न	(ये सब) नहीं
स्वभावः	प्रकृति	सन्ति	रह जाते ॥१२॥

एको नानात्वमन्विच्छन् योगतल्पात् समुत्थितः ।
वीर्यं हिरण्मयं देवो मायया व्यसृजत् त्रिधा ॥१३॥

एकः नानात्वं अन्विच्छन् योगतल्पात् समुत्थितः वीर्यं हिरण्मयः देवः मायया व्यसृजत् त्रिधा ॥१३॥

योगतल्पात्	योगनिद्रासे	हिरण्मयं	(अपने) स्वर्णमय
समुत्थितः	जागनेपर	वीर्यं	वीर्यका
एकः	(उन) अकेले	मायया	मायाके द्वारा
देवः	देवता (नारायण) ने	त्रिधा	तीन रूपोंमें
नानात्वं	अनेकताकी	व्यसृजत्	त्याग किया ॥१३॥
अन्विच्छन्	इच्छा करके		

अधिदैवमथाध्यात्ममधिभूतमिति प्रभुः ।
यथैकं पौरुषं वीर्यं त्रिधाभिद्यत तच्छृणु ॥१४॥

अधिदैवं अथ अध्यात्मं अधिभूतं इति प्रभुः यथा एकं पौरुषं वीर्यं त्रिधा अभिद्यत् तत् शृणु ॥१४॥

अधिदैवं	अधिदैव	एकं	एक ही
अथ	और	पौरुषं	पुरुषका
अध्यात्मं	अध्यात्म,	वीर्यं	वीर्य
अधिभूतं	अधिभूत,	त्रिधा	तीन प्रकारसे
इति	इस प्रकार,	अभिद्यत	भेदवाला हो गया
यथा	जैसे	तत्	वह
प्रभुः	सर्व समर्थ	शृणु	सुनो ॥१४॥

अन्तःशरीर आकाशात् पुरुषस्य विचेष्टतः ।
ओजः सहो बलं जज्ञे ततः प्राणो महानसुः ॥१५॥

अन्तःशरीर आकाशात् पुरुषस्य विचेष्टतः ओजः सहः बलं जज्ञे ततः प्राणः महान् असुः ॥१५॥

पुरुषस्य	पुरुषके	बलं	शरीरबल
विचेष्टतः	विशेष चेष्टा करने (हिलने-डोलने) पर	जज्ञे	उत्पन्न हुए
		ततः	फिर
अन्तःशरीर	(उनके) शरीरके भीतरी	असुः	(इन सबका) संचालक
आकाशात्	आकाशसे	महान्	महान्
ओजः	इन्द्रिय बल,	प्राणः	प्राण (उत्पन्न हुआ) ॥१५॥
सहः	मनोबल,		

अनु प्राणन्ति यं प्राणाः प्राणन्तं सर्वजन्तुषु ।
अपानन्तमपानन्ति नरदेवमिवानुगाः ॥१६॥

अनुप्राणन्ति यं प्राणाः प्राणन्तं सर्व जन्तुषु अपानन्तं अपानन्ति नरदेवं इव अनुगाः ॥१६॥

नरदेवं	राजाके (पीछे)	अनुप्राणन्ति	(देह इन्द्रियादि) सब
अनुगाः	अनुचरोंकी		सक्रिय रहते हैं,
इव	भाँति	अपानन्तं	(उस प्राणके)
सर्वजन्तुषु	सब प्राणियोंमें		शिथिल पड़ जानेपर
यं	जिस	अपानन्ति	सब शिथिल पड़
प्राणाः	प्राणके		जाते हैं ॥१६॥
प्राणन्तं	सक्रिय रहनेपर		

प्राणेन क्षिपता क्षुत् तृडन्तरा जायते प्रभोः ।
पिपासतो जक्षतश्च प्राङ्मुखं निरभिद्यत ॥१७॥

प्राणेन क्षिपता क्षुत् तृड् अन्तरा जायते प्रभोः पिपासतः जक्षतः च प्राङ् मुखं निरभिद्यत ॥१७॥

प्रभोः	विराट् पुरुषको	पिपासतः	पीनेकी
प्राणेन	प्राणोंके	च	तथा
क्षिपता	(आने जानेके)	जक्षतः	खानेकी इच्छा
	संघर्षसे		होनेपर
अन्तरा	भीतर	प्राङ्	पहिले
क्षुत्	भूख	मुखं	मुख
तृड्	प्यास	निरभिद्यत	उत्पन्न हुआ ॥१७॥
जायते	उत्पन्न होती है,		

मुखतस्तालु निर्भिन्नं जिह्वा तत्रोपजायते ।
ततो नानारसो जज्ञे जिह्वया योऽधिगम्यते ॥१८॥

मुखतः तालु निर्भिन्नं जिह्वा तत्र उपजायते ततः नानारसः जज्ञे जिह्वया यः अधिगम्यते ॥१८॥

मुखतः	मुखमें	ततः	उस (जीभ) से
तालु	तालू	नानारसः	अनेक प्रकारके रस
निर्भिन्नं	बना	जज्ञे	उत्पन्न हुए
तत्र	उस (तालु) में	यः	जो
जिह्वा	जीभ	जिह्वया	जिह्वासे
उपजायते	उत्पन्न होती है	अधिगम्यते	जाने जाते हैं ॥१८॥

विवक्षोर्मुखतो भूम्नो वह्निर्वाग् व्याहृत तयोः ।
जले वै तस्य सुचिरं निरोधः समजायत ॥१९॥

विवक्षोः मुखतः भूम्नः वह्निः वाक् व्याहृतं तयोः जले वै तस्य सुचिरं निरोधः समजायत ॥१९॥

भूम्नः	उन व्यापक विराट् पुरुषके	व्याहृतं	बोलना, (व्यक्त हुआ)
विवक्षोः	बोलनेकी इच्छा करनेपर	वै	फिर
		तस्य	उन विराट् पुरुषका
मुखतः	(उनके) मुखसे	सुचिरं	बहुत देरतक
वाक्	वाक् इन्द्रिय,	जले	जलमें ही
वह्नि	(उसके देवता)अग्नि,	निरोधः	चुपचाप बने रहना
तयोः	उसका विषय	समजायत	हुआ ॥१९॥

नासिके निरभिद्येतां दोधूयति नभस्वति ।
तत्र वायुर्गन्धवहो घ्राणो नसि जिघृक्षतः ॥२०॥

नासिके निरभिद्येतां दोधूयति नभस्वति तत्र वायुः गन्धवहः घ्राणः नसि जिघृक्षतः ॥२०॥

नभस्वति	वायुके	वायुः	वायु उत्पन्न हुआ,
दोधूयति	वेगसे चलनेके कारण	जिघृक्षतः	सूँघनेकी इच्छा होनेपर
नासिके	नासिका		
निरभिद्येतां	प्रकट हुई,	नसि	नासिकामें
तत्र	उस (नाक) से	घ्राणः	घ्राणेन्द्रिय उत्पन्न हुई ॥२०॥
गन्धवहः	गन्ध ढोनेवाला		

यदाऽऽत्मनि निरालोकमात्मानं च दिदृक्षतः ।
निर्भिन्ने ह्यक्षिणी तस्य ज्योतिश्चक्षुर्गणग्रहः ॥२१॥

यदा आत्मनि निरालोकं आत्मानं च दिदृक्षतः निर्भिन्ने हि अक्षिणी तस्य ज्योतिः चक्षुः गुणग्रहः ॥२१॥

यदा	जब	अक्षिणी	(तब) आँखोंके
निरालोकं	प्रकाश रहित*	निर्भिन्ने	प्रगट हो जानेपर
हि	क्योंकि	चक्षुः गुण	आँखका गुण (और)
आत्मनि	अपने शरीरमें	ग्रहः	(आँखसे) ग्रहण होनेवाला
आत्मानं	अपनेको		
च	भी	ज्योतिः	ज्योति (रूप) प्रकट हुआ ॥२१॥
दिदृक्षतः	देखनेकी इच्छा हुई		
तस्य	उनकी		

बोध्यमानस्य ऋषिभिरात्मनस्तज्जिघृक्षतः ।
कर्णौ च निरभिद्येतां दिशः श्रोत्रं गुणग्रह ॥२२॥

बोध्यमानस्य ऋषिभिः आत्मनः तत् जिघृक्षतः कर्णौ च निरभिद्येतां दिशः श्रोतं गुणग्रह ॥२२॥

ऋषिभिः	नित्य (वेदरूप) ऋषियोंसे	च	भी
		निरभिद्येतां	प्रकट हुए
बोध्यमानस्य	जगाये जानेपर	दिशः	(उनसे) दिशाएँ,
तत्	उसे	श्रोत्रं	कर्णेन्द्रिय,
आत्मनः	स्वयं	गुणग्रहः	(उनसे) ग्रहण होने वाला गुण (शब्द) उत्पन्न हुआ ॥२२॥
जिघृक्षतः	सुननेकी इच्छा होनेपर		
कर्णौ	कान		

वस्तुनो मृदुकाठिन्यलघुगुर्वोष्णशीतताम् ।
जिघृक्षतस्त्वङ् निर्भिन्ना तस्यां रोममहीरुहाः ।
तत्र चान्तर्बहिर्वातस्त्वचा लब्धगुणो वृतः ॥२३॥

वस्तुनो मृदु काठिन्य लघु गुरु उष्ण शीततां जिघृक्षतः त्वङ् निर्भिन्ना तस्यां रोमः महीरुहाः तस्य च अन्तः बहिः वातः त्वचा लब्धगुण वृतः ॥२३॥

वस्तुनो	वस्तुओंकी	काठिन्य	कठोरता,
मृदु	कोमलता,	लघु	हल्कापन,

* लोकंका अन्वय दो बार होगा ।

गुरु	भारीपन,
उष्ण	गर्मी,
शीतताम्	शीतलता
जिघृक्षतः	जाननेकी इच्छा होनेपर
त्वक्	त्वचा
निर्भिन्ना	उत्पन्न हुई
महीरुहाः	(पृथ्वीसे) वृक्षोंकी भाँति
तस्याम्	उस (त्वचा) से
रोमः	रोम (उत्पन्न हुए),
तस्य	उस
त्वचा	त्वचासे
लब्धगुणः	(उसका) गुण स्पर्श पाकर
अन्तः	(उसके) भीतर
च	और
बहिः	बाहर भी
वातः	चलनेवाला वायु
वृतः	(त्वचा द्वारा) स्वीकृत हो गया ।२३।

हस्तौ रुरुहतुस्तस्य नानाकर्मचिकीर्षया ।
तयोस्तु बलमिन्द्रश्च आदानमुभयाश्रयम् ॥२४॥

हस्तौ रुरुहतुः तस्य नानाकर्म चिकीर्षयः तयोः तु बलं इन्द्रः च आदानं उभय आश्रयम् ॥२४॥

नानाकर्म	अनेक प्रकारके कर्म
चिकीर्षया	करनेकी इच्छा होनेपर
तस्य	उनके
हस्तौ	हाथ
रुरुहतुः	निकल आये
तयोः	उन (हाथों) में
तु	तो
बलं	बलं (ग्रहण करनेकी शक्ति)
च	और
इन्द्रः	इन्द्र (हाथके देवता का निवास हुआ)
उभय आश्रयं	दोनों (बल तथा इन्द्र) के आश्रयमें रहनेवाली
आदानं	ग्रहण क्रिया उत्पन्न हुई ॥२४॥

गतिं जिगीषतः पादौ रुरुहातेऽभिकामिकाम् ।
पद्भ्यां यज्ञः स्वयं हव्यं कर्मभिः क्रियते नृभिः ॥२५॥

गतिं जिगीषतः पादौ रुरुहाते अभिकामिकं पद्भ्यां यज्ञः स्वयं हव्यं कर्मभिः क्रियते नृभिः ॥२५॥

अभिकामिकं	इच्छानुसार
गतिं	चलनेकी
जिगीषतः	कामना होनेपर
पादौ	पैर
रुरुहाते	निकल आये
स्वयं	(उनमें) स्वयं
यज्ञः	यज्ञपुरुष विष्णु स्थित हुए
नृभिः	मनुष्यों द्वारा
पद्भ्यां	पैरोंके
कर्मभिः	कर्म (चलनेसे)
हव्यं	यज्ञीय सामग्री
क्रियते	(एकत्र) की जाती है ॥२५॥

निरभिद्यत शिश्नो वै प्रजानन्दामृतार्थिनः ।
उपस्थ आसीत् कामानां प्रियं तदुभयाश्रयम् ॥२६॥

निरभिद्यत शिश्नः वै प्रजा आनन्द अमृत अर्थिनः उपस्थ आसीत् कामानां प्रियं तद् उभय आश्रयम् ॥२६॥

प्रजा	सन्तान,
आनन्द	रति,
अमृत	स्वर्गसुख
अर्थिनः	चाहनेपर
शिश्नः	शिश्न
निरभिद्यत	प्रगट हुआ
कामानां	कामुकोंको
प्रियं	प्रिय
उपस्थ	उपस्थेन्द्रिय
आसीत्	(उसमें) स्थित हुई
तत्	उस
उभय	दोनों (शिश्न तथा उपस्थेन्द्रियेका) आश्रित (कामसुख) भी हुआ ॥२६॥

उत्सिसृक्षोर्धातुमलं निरभिद्यत वै गुदम् ।
ततः पायुस्ततो मित्रं उत्सर्ग उभयाश्रयः ॥२७॥

उत्सिसृक्षोः धातुमलं निरभिद्यत वै गुदं ततः पायुः ततः मित्रं उत्सर्गं उभय आश्रयम् ॥२७॥

धातुमलं	धातुओंका मल
उत्सिसृक्षोः	त्यागनेकी इच्छा होनेपर
वै	ही
गुदं	गुदा
निरभिद्यत	उत्पन्न हुई
ततः	उसमें
पायुः	पायु इन्द्रिय

ततः	उसके
मित्रं	मित्र-देवता हुए
उभय आश्रयं	इन दोनोंके आश्रयसे
उत्सर्गं	मलत्याग होता है ॥२७॥

आसिसृप्सोः पुरः पुर्या नाभिद्वारमपानतः ।
तत्रापानस्ततो मृत्युः पृथक्त्वमुभयाश्रयम् ॥२८॥

आसिसृप्सोः पुरः पुर्यां नाभिद्वारं अपानतः तत्र अपानः ततः मृत्युः पृथकत्वं उभय आश्रयं ॥२८॥

अपानतः	अपानमार्ग द्वारा
पुरः	एक शरीरसे
पुर्यां	दूसरे शरीरमें
आसिसृप्सोः	जानेकी इच्छा होनेपर
नाभिद्वारं	नाभिद्वार प्रकट हुआ ।
तत्र	वहाँ
अपानः	अपान वायु
ततः	उसके
मृत्युः	मृत्यु देवता हुए
उभय आश्रयं	दोनोंके आश्रयसे
पृथकत्वं	प्राण और अपानकी पृथकता (रूप मृत्यु) होती है ॥२८॥

आदित्सोरन्नपानानामासन् कुक्ष्यन्त्रनाडयः ।
नद्यः समुद्राश्च तयोस्तुष्टिः पुष्टिस्तदाश्रये ॥२९॥

आदित्सोः अन्न पानानां आसन् कुक्षि अन्त्र नाडयः नद्यः समुद्राः च तयोः तुष्टिः पुष्टिः तत् आश्रये ॥२९॥

अन्न	भोजन
पानानां	जलादि
आदित्सोः	लेनेकी इच्छा होनेपर
कुक्षि	कोख
अन्त्र	आँतें
नाडयः	नाड़ियाँ
आसन्	उत्पन्न हुईं,
तयोः	उनसे
नद्यः	नदियां (नाड़ियोंके देवता)
च	तथा
समुद्राः	समुद्र (कुक्षिके देवता) हुए
तत्	इनके ही
आश्रये	आश्रयसे
तुष्टिः	तृप्ति और
पुष्टिः	पोषण है ॥२९॥

निदिध्यासोरात्ममायां हृदयं निरभिद्यत ।
ततो मनस्ततश्चन्द्रः सङ्कल्पः काम एव च ॥३०॥

निदिध्यासोः आत्ममायां हृदयं निरभिद्यत ततः मनः ततः चन्द्रः सङ्कल्पः काम एव च ॥३०॥

आत्ममायां	अपनी मायापर	**चन्द्रः**	(मनका देवता) चन्द्र,
निदिध्यासोः	विचार करनेकी इच्छा होनेपर	**च**	तथा
हृदयं	हृदय	**सङ्कल्पः**	संकल्प
निरभिद्यत	उत्पन्न हुआ,	**काम**	कामनाएँ
ततः	उससे	**एव**	भी (उत्पन्न हुईं) ॥३०॥
मनः	मन,		
ततः	उससे		

त्वक्चर्ममांसरुधिरमेदोमज्जास्थिधातवः ।
भूम्यप्तेजोमयाः सप्त प्राणो व्योमाम्बुवायुभिः ॥३१॥

त्वक् चर्म मांस रुधिर मेदः मज्जाः अस्थि धातवः भूमि अप् तेजोमयाः सप्त प्राणः व्योम अम्बु वायुभिः ॥३१॥

भूमि	पृथ्वी	**रुधिर**	रक्त,
अप्	पानी	**मेदः**	चर्बी,
तेजोमयाः	तथा अग्निसे उत्पन्न	**मज्जाः**	मज्जा (और)
सप्त	सात	**अस्थि**	हड्डियाँ (इसी प्रकार)
धातवः	धातुएँ (विराट्के शरीरमें हुईं)	**व्योम**	आकाश
त्वक्	त्वचा (स्पर्शग्राही चमड़ा)	**अम्बु**	जल (तथा)
चर्म	चमड़ा,	**वायुभिः**	वायुसे
मांस	मांस,	**प्राणः**	प्राण (उत्पन्न हुआ ॥३१॥

गुणात्मकानीन्द्रियाणि भूतादिप्रभवा गुणाः ।
मनः सर्वविकारात्मा बुद्धिर्विज्ञानरूपिणी ॥३२॥

गुण आत्मकानि इन्द्रियाणि भूतादि प्रभवा गुणाः मनः सर्व विकार आत्मा बुद्धिः विज्ञान रूपिणी ॥३२॥

इन्द्रियाणि	इन्द्रियाँ (कर्ण आदि)	मनः	मन
गुण	गुण (शब्दादि)	सर्व विकार आत्मा	सब विषयोंका उत्पत्ति स्थान है ।
आत्मकानि	स्वरूप (गुणोंके ग्रहण करनेवाली) हैं ।	बुद्धिः	बुद्धि
भूतादि	अहङ्कारसे	विज्ञान रूपिणी	विशेष विशेष सब पदार्थोंका ज्ञान देने-वाली है ॥३२॥
गुणाः	गुण (शब्दादि)		
प्रभवाः	उत्पन्न हुए हैं ।		

एतद्भगवतो रूपं स्थूलं ते व्याहृतं मया ।
मह्यादिभिश्चावरणैरष्टभिर्बहिरावृतम् ॥३३॥

एतत् भगवतः रूपं स्थूलं ते व्याहृतं मया मही आदिभिः च आवरणैः अष्टभिः बहिः आवृतम् ॥३३॥

मही आदिभिः	पृथ्वी आदिके	एतत्	इस
च	ही	भगवतः	भगवानके
अष्टभिः	आठ (पंच महाभूत, अहंकार, महतत्त्व, प्रकृति)	स्थूलं	स्थूल-विराट्
		रूपं	रूपका
		मया	मैंने
आवरणैः	आवरणोंसे	ते	तुमसे
बहिः	बाहरसे	व्याहृतं	वर्णन किया ॥३३॥
आवृतम्	घिरे		

अतः परं सूक्ष्मतममव्यक्तं निर्विशेषणम् ।
अनादिमध्यनिधनं नित्यं वाङ्मनसः परम् ॥३४॥

अतः परं सूक्ष्मतमं अव्यक्तं निर्विशेषणं अनादि मध्य निधनं नित्यं वाङ् मनसः परम् ॥३४॥

अतः	इससे	सूक्ष्मतमं	अत्यन्त सूक्ष्म,
परं	(जो) परे है (वह)	अव्यक्तं	अव्यक्त,

निर्विशेषणं	निर्विशेष,	नित्यं	नित्य,
अनादि मध्य निधन	आदि, मध्य, अन्तसे रहित,	वाङ् मनसः	वाणी और मनसे
		परं	परे है ॥३४॥

अमुनी भगवद्रूपे मया ते अनुवर्णिते ।
उभे अपि न गृह्णन्ति मायासृष्टे विपश्चितः ॥३५॥

अमुनी भगवत् रूपे मया ते अनुवर्णिते उभे अपि न गृह्णन्ति माया सृष्टे विपश्चितः ॥३५॥

मया	मेरे द्वारा	उभे	दोनों
ते	तुमसे	अपि	ही को
अनुवर्णिते	वर्णन किये गये	विपश्चितः	ज्ञानी लोग
माया सृष्टे	मायाके द्वारा उत्पन्न	न	नहीं
भगवत् रूपे	भगवानके रूपोंको	गृह्णन्ति	ग्रहण (स्वीकार)
अमुनी	इन		करते ॥३५॥

स वाच्यवाचकतया भगवान् ब्रह्मरूपधृक् ।
नामरूपक्रिया धत्ते सकर्माकर्मकः परः ॥३६॥

स वाच्य वाचकतया भगवान् ब्रह्म रूप धृक् नाम रूप क्रिया धत्ते सकर्मा अकमकः परः ॥३६॥

स	वे	वाच्य	वाच्य (तथा)
भगवान्	भगवान्	वाचकतया	वाचक होकर
अकर्मकः	निक्रिय	नाम, रूप, क्रिया	नाम, रूप, क्रियाको
परः	सबसे परे हैं (वही)	धत्ते	धारण करके
ब्रह्म	ब्रह्माका	सकर्माः	कर्म करनेवाले बनते
रूप धृक्	रूप धारण करके		हैं ॥३६॥

प्रजापतीन्मनून् देवानृषीन् पितृगणान् पृथक् ।
सिद्धचारणगन्धर्वान् विद्याध्रासुरगुह्यकान् ॥३७॥

प्रजापतीन् मनून् देवान् ऋषीन् पितृगणान् पृथक् सिद्ध चारण गन्धर्वान् विद्याध्रा असुर गुह्यकान् ॥३७॥

किन्नराप्सरसो नागान् सर्पान् किम्पुरुषोरगान् ।
मातृ रक्षःपिशाचांश्च प्रेतभूतविनायकान् ॥३८॥

किन्नरा अप्सरसः नागान् सर्पान् किम्पुरुष उरगान् मातृ रक्षः पिशाचान् च प्रेत भूत विनायकान् ॥३८॥

कूष्माण्डोन्मादवेतालान् यातुधानान् ग्रहानपि ।
खगान्मृगान् पशून् वृक्षान्गिरीन्नृप सरीसृपान् ॥३९॥

कूष्माण्ड उन्माद वेतालान् यातुधानान् ग्रहान् अपि खगान् मृगान् पशून् वृक्षान् गिरीन् नृप सरीसृपान् ॥३९॥

द्विविधाश्चतुर्विधा येऽन्ये जलस्थलनभौकसः ।
कुशलाकुशला मिश्राः कर्मणां गतयस्त्विमाः ॥४०॥

द्विविधाः चतुर्विधाः ये अन्ये जल स्थल नभौकसः कुशला अकुशला मिश्राः कर्मणां गतयः तु इमाः ॥४०॥

द्विविधा	(चर-अचर भेदसे) दो प्रकारके	कुशला	शुभ
		अकुशला	अशुभ
चतुर्विधाः	चार प्रकारके उद्भिज, स्वेदज, अण्डज, जरायुज)	मिश्राः	(शुभ-अशुभ) मिश्रित
		कर्मणां	कर्मकी
		गतयः	गति (फलसे)
ये	जो	तु	तो
अन्ये	दूसरे भी	इमाः	ये सब हैं ॥४०॥
जल,स्थल,नभौकसः	जलचर,स्थलचर, नभचर प्राणी हैं,		

सत्त्वं रजस्तम इति तिस्रः सुरनृनारकाः ।
तत्राप्येकैकशो राजन् भिद्यन्ते गतयस्त्रिधा ।
यदैकैकतरोऽन्याभ्यां स्वभाव उपहन्यते ॥४१॥

---

* पिशाच, प्रेत, भूत, विनायक, कूष्माण्ड, उन्माद, वेताल तथा मातृका भी शिवगणोंके वर्ग हैं ।

सत्त्वं रजः तम इति तिस्रः सुरः नृः नारकाः तत्र अपि एक एकशः राजन् भिद्यन्ते गतयः त्रिधा यत् एकैकतरः अन्याभ्यां स्वभाव उपहन्यते ॥४१॥

राजन्	परीक्षित !	**तिस्रः**	(प्राणियोंके) तीन
सत्त्वं	सत्त्व गुण		भेद हैं ।
	(की प्रधानता) से	**तत्र अपि**	इनमें भी
सुरः	देवता,	**यत् एक एकशः**	क्योंकि एक एकके
रजः	रजोगुण	**एकतरः**	एकसे भिन्न
	(की प्रधानता) से	**अन्याभ्यां**	दूसरे (गुणों) के
नृः	मनुष्य,	**स्वभाव**	स्वभावके
तम	तमोगुण	**उपहन्यते**	अभिभूत कर लेनेसे
	(की प्रधानता) से	**गतयः**	ये (देव, मनुष्यादि)
नारकाः	नारकीय प्राणी,		गतियाँ
इति	इस प्रकार	**त्रिधा**	तीन तीन भागोंमें
		भिद्यन्ते	बँट जाती हैं ॥४१॥

स एवेदं जगद्धाता भगवान् धर्मरूपधृक् ।
पुष्णाति स्थापयन् विश्वं तिर्यङ्नरसुरात्मभिः ॥४२॥

स एव इदं जगद्धाता भगवान धर्मरूप धृक् पुष्णाति स्थापयन् विश्वं तिर्यङ् नर सुर आत्मभिः ॥४२॥

स	वे	**आत्मभिः**	बनकर
एव	ही		(अवतार लेकर)
जगद्धाता	जगत्के रक्षक	**इदं**	इस
भगवान्	भगवान्	**विश्वं**	विश्वकी
धर्मरूप	धर्मका रूप	**स्थापयन्**	स्थिति (मर्यादा)
धृक्	धारण करके		बनाये रखते
तिर्यङ्	पशु आदि (तथा)	**पुष्णाति**	(इसका) पोषण
नर	मनुष्य		करते हैं ॥४२॥
सुर	देवता		

ततः कालाग्निरुद्रात्मा यत्सृष्टमिदमात्मनः ।
संनियच्छति कालेन घनानीकमिवानिलः ॥४३॥

ततः काल अग्नि रुद्र आत्मा यत् सृष्टं इदं आत्मनः सन्नियच्छति कालेन घन अनीकं इव अनिलः ॥४३॥

ततः	फिर	**रुद्र**	रुद्र
कालेन	प्रलयकाल आनेपर	**आत्मा**	स्वरूप बनकर
यत्	जो	**घन अनीक**	मेघ समूहको
इदं	इस जगतको	**अनिलः**	वायुके
आत्मनः	अपनेसे ही	**इव**	समान
सृष्टं	बनाया हुआ है	**संनियच्छति**	(अपनेमें) पूर्णतः लीन कर लेते हैं ॥४३॥
काल	काल,		
अग्नि	अग्नि		

इत्थंभावेन कथितो भगवान् भगवत्तमः ।
नेत्थंभावेन हि परं द्रष्टुमर्हन्ति सूरयः ॥४४॥

इत्थं भावेन कथितः भगवान् भगवत्तमैः न इत्थं भावेन हि परं द्रष्टुं अर्हन्ति सूरयः ॥४४॥

इत्थं	इस प्रकारके	**भावेन**	(सृष्टि, स्थिति, प्रलयकर्ताके) रूपमें ही
भावेन	भावसे		
भगवत्तमैः	महापुरुषों द्वारा		
भगवान्	भगवानका	**परं**	इनसे परेको
कथितः	वर्णन हुआ है	**न**	नहीं
हि	किन्तु	**द्रष्टुं**	देखना
सूरयः	तत्वज्ञानियोंको	**अर्हन्ति**	चाहिये ॥४४॥
इत्थं	इसी		

नास्य कर्मणि जन्मादौ परस्यानुविधीयते ।
कर्तृत्वप्रतिषेधार्थं मायया रोपितं हि तत् ॥४५॥

न अस्य कर्माणि जन्म आदौ परस्य अनुविधीयते कर्तृत्व प्रतिषेधार्थं मायया आरोपितं हि तत् ॥४५॥

अस्य	इस	कर्तृत्व	कर्तापनके
परस्य	परमपुरुषके	प्रतिषेधार्थं	निषेधके लिए
कर्माणि	कर्म (और)	तत्	वह (जन्म, कर्मादि)
जन्म आदौ	जन्मादिका	मायया	मायासे
अनुविधीयते	विधान	आरोपितं	आरोपित किया
न	नहीं किया गया है		गया है ॥४५॥
हि	क्योंकि		

अयं तु ब्रह्मणः कल्पः सविकल्प उदाहृतः ।
विधिः साधारणो यत्र सर्गाः प्राकृतवैकृताः ॥४६॥

अयं तु ब्रह्मणः कल्पः सविकल्प उदाहृतः विधिः साधारणः यत्र सर्गाः प्राकृत वैकृताः ॥४६॥

अयं	यह	प्राकृत	प्रकृतिसे होनेवाले परिणाम (महतत्त्व, अहंकारादि)
तु	तो		
ब्रह्मणः	ब्रह्माजीके		
कल्पः	महाकल्पका	वैकृताः	उनके विकारकी (अहकारसे पंच तन्मात्रा, महाभूतादि)
सविकल्प	अवान्तर कल्पोंके साथ		
उदाहृतः	वर्णन किया गया है।	सर्गाः	सृष्टि
साधारणः	(सब अवान्तर कल्पोंमें) एकसी	यत्र	जिस (महाकल्प) में ही होते हैं ॥४६॥
विधिः	(सृष्टिकी) विधि रहती है		

विशेष—

ब्रह्माजीके एक दिनका नाम कल्प है। ब्रह्माजीके तीनसौ साठ दिन रातका एक वर्ष। ऐसे वर्षोंसे ब्रह्माजीकी आयु सौ वर्षकी है। इस पूरी आयुको महाकल्प कहते हैं। महाकल्पके प्रारम्भमें प्रकृतिमें क्षोभ होकर महत्तत्त्व, उससे अहंकार और अहंकारके सात्त्विक राजस तामस भेदोंसे पञ्चमहाभूत, पंचतन्मात्रा, मन, बुद्धि, चित्त, इनके देवता उत्पन्न होते हैं तथा परमपुरुष जल उत्पन्न करके उसमें शयन करनेके अनन्तर विराट् रूप

परिमाणं च कालस्य कल्पलक्षणविग्रहम् ।
यथा पुरस्ताद्व्याख्यास्ये पाद्मं कल्पमथो शृणु ॥४७॥

परिणामं च कालस्य कल्प लक्षण विग्रहं यथा पुरस्तात् व्याख्यास्ये पाद्मं कल्पं अथ शृणु ॥४७॥

कालस्य	कालका	**यथा**	जैसे वे हैं
परिमाणं	परिमाण	**पुरस्तात्**	आगे चलकर
च	तथा	**व्याख्यास्ये**	वर्णन करूँगा
कल्प	कल्पोंका	**अथ**	अभी
लक्षण	लक्षण	**पाद्मं**	पाद्म
विग्रहं	(उनके) अंग (मन्वन्तरोंका)	**कल्पं**	कल्पका (वर्णन)
		शृणु	सुनो ॥४७॥

शौनक उवाच–

यदाह नो भवान् सूत क्षत्ता भागवतोत्तमः ।
चचार तीर्थानि भुवस्त्यक्त्वा बन्धून् सुदुस्त्यजान् ॥४८॥

यत् आह नः भवान् सूत क्षत्ता भागवतोत्तमः चचार तीर्थानि भुवः त्यक्त्वा बन्धून् सुदुस्त्यजान् ॥४८॥

सूत	सूतजी !	**सुदुस्त्यजान्**	अत्यन्त दुस्त्यज
यत्	जो	**बन्धून्**	बन्धु-बान्धवोंको
भवान्	आपने	**त्यक्त्वा**	छोड़कर
नः	हम लोगोंसे	**भुवः**	पृथ्वीपर
आह	कहा था कि	**तीर्थानि**	तीर्थोंकी
भागवतोत्तमः	भगवद्भक्तोंमें श्रेष्ठ	**चचार**	यात्रा करते रहे ॥४८॥
क्षत्ता	विदुरजीने		

धारण करते हैं। यह सृष्टि पूरे महाकल्प अर्थात् ब्रह्माकी आयुपर्यन्त ज्यों की त्यों बनी रहती है। महाप्रलयमें अर्थात् महाकल्पके अन्तमें यह विलय होती है। ब्रह्माजी जितनी प्राणि-सृष्टि करते हैं, केवल वही उनके दिनान्तमें उनमें लीन होती है। यह ब्रह्माजीका दिन कल्प है और उसमें प्राकृत सृष्टिका लय नहीं होता।

कुत्र कौषारवेस्तस्य संवादोऽध्यात्मसंश्रितः ।
यद्वा स भगवांस्तस्मै पृष्टस्तत्त्वमुवाच ह ॥४९॥

कुत्र कौषारवेः तस्य संवादः अध्यात्म संश्रितः यत् वा स भगवान् तस्मै पृष्टः तत्त्वं उवाच ह ॥४९॥

तस्य	उनका	**पृष्टः**	पूछनेपर
कुत्र	कहाँ	**तस्मै**	उनको
कौषारवेः	मैत्रेयजीसे	**स भगवान्**	उन भगवान् मैत्रेयने
अध्यात्म	अध्यात्म	**तत्त्वं**	तत्त्वज्ञानका
संश्रितः	विषयक	**उवाच**	उपदेश
संवादः	संवाद हुआ	**ह**	किया ॥४९॥
यत् वा	जिसमें		

ब्रूहि नस्तदिदं सौम्य विदुरस्य विचेष्टितम् ।
बन्धुत्यागनिमित्तं च तथैवागतवान् पुनः ॥५०॥

ब्रूहि नः तत् इदं सौम्य विदुरस्य विचेष्टितं बन्धू त्याग निमित्तं च तथा एव आगतवान् पुनः ॥५०॥

सौम्य	सौम्य सूतजी !	**निमित्तं**	कारण
नः	हम लोगोंसे	**च**	और
तत्	वह	**तथा**	वैसे
इदं	यह	**एव**	ही
विदुरस्य	विदुरजीकी	**पुनः**	फिर (जैसे)
विचेष्टितं	विशेष चेष्टा(उनके)	**आगतवान्**	लौट आये
बन्धु त्याग	स्वजनोंके त्यागका	**ब्रूहि**	बतलाइये ॥५०॥

सूत उवाच–

राज्ञा परीक्षिता पृष्टो यदवोचन्महामुनिः ।
तद्वोऽभिधास्ये शृणुत राज्ञः प्रश्नानुसारतः ॥५१॥

राज्ञा परीक्षिता पृष्टः यत् अवोचत् महामुनिः तत् वः अभिधास्ये शृणुत राज्ञः प्रश्नानुसारतः ॥५१॥

राज्ञा	राजा	तत्	वह
परीक्षिता	परीक्षितके	वः	आप लोगोंसे
पृष्टः	पूछनेपर	अभिधास्ये	कहूँगा ।
यत्	जो	राज्ञः	राजाके
महामुनिः	शुकदेवजीने	प्रश्नानुसारतः	प्रश्नानुसार
अवोचन्	कहा	शृणुत	सुनें ॥५१॥

इति श्रीमद्भागवते महापुराणे वैयासिक्यां पारमहस्यां
संहितायां द्वितीयस्कन्धे दशमोऽध्यायः

॥ इति द्वितीय स्कन्धः समाप्तः ॥

हरिः ॐ तत्सत्